ADVAITA DVAITA VIŚIṢṬĀDVAITARĪTYĀ MAHĀVĀKYĀRTHA VICĀRAḤ

“अद्वैतद्वैतविशिष्टाद्वैतरीत्या महावाक्यार्थविचारः”

Thesis submitted to Mahatma Gandhi University, Kottayam, for the Degree of Doctor of Philosophy in Sanskrit under the Faculty of Language and Literature

By

G. Chandrasekhar Prabhu

Under the guidance of

Dr. M. Shanthichandra Kamath,

Hon. Professor of Sanskrit and Research Guide,
Sukrtindra Oriental Research Institute,
Kuthapady, Thammanam, Kochi - 682 032.

SUKṚTĪNDRA ORIENTAL RESEARCH INSTITUTE
KUTHAPADY, THAMMANAM, KOCHI - 32

January 2015

DECLARATION

I hereby declare that the thesis entitled **Advaita Dvaita Viśiṣṭādvaitarītyā Mahāvākyārtha Vicāraḥ** submitted for the award of degree of **Doctor of Philosophy** in Sanskrit of Mahatma Gandhi University, Kottayam, is my original work and has been carried out by me under the supervision of Dr. M. Shanthichandra Kamath. This thesis has not, in part or as a whole, previously formed the basis for the award of any degree or diploma.

Kochi - 32
30-01-2015

G. Chandrasekhar Prabhu

Dr. M. Shanthichandra Kamath,
Hon. Professor of Sanskrit and Research Guide,
Sukṛtīndra Oriental Research Institute,
Kuthapady, Thammanam, Kochi - 682 032.

"Shanthi Niketan",
Dharmadom,
Thalassery - 670 106
Mob : 9495389460

CERTIFICATE

Certified that the thesis entitled "Advaita Dvaita Viśiṣṭādvaitarītyā Mahāvākyārtha Vicāraḥ" submitted for the award of the Degree of Doctor of Philosophy in Sanskrit, Mahatma Gandhi University, Kottayam is a record of bona fide research carried out by Sri. G. Chandrasekhar Prabhu, under my supervision. This thesis has not, in part or as a whole, previously formed the basis for the award of any degree or diploma.

M.Kamath

Kochi - 32
30 -01-2015

Dr. M. Shanthichandra Kamath
Research Supervisor

प्राक्कथनम्

आर्षभूरिति प्रथिते भारतदेशे लब्धजन्मानः अनेके दार्शनिकाः आचार्याः जगदगुरवश्च सन्ति। अधिकारिभेदेन मोक्षाय सिद्धाः स्वीकार्याः अनेके दर्शनसिद्धान्ताश्च दर्शनक्षेत्रे विराजमानाः वर्तन्ते। देवतिर्यङ्मनुष्यवर्णाश्रमादि प्रविभागहेतुः ऋग्वेदादिशास्त्रं सर्वज्ञानाकारमिति श्रीशङ्कराचार्यः अभिप्रैति स्म। भौतिकानाम् आध्यात्मिकानाञ्च सर्वतत्त्वचिन्ताधाराणां स्रोतः भवति वेदः। अतः शुद्धभौतिकवादभूतचार्वाकदर्शनादारभ्य दर्शनशिरोमणिभूताद्वैतवादपर्यन्तं सर्वाणि दर्शनानि वेदादेव अङ्कुरितानीति वचने नास्त्यतिशयोक्तिः। मनुष्यजीवनस्य विविधासु अवस्थासु ईदृश्यः चिन्ताः उद्भूय क्रमशः विकासं प्राप्ताः विविधदर्शनत्वेन परिणताः इत्यतः इमानि दर्शनानि मिथः अविरुद्धानि अपि तु परस्परपूरकाणि इति चिन्तनीयम्।

व्यक्तिः, अवस्था, अभिरुचिः इत्येतेषां भेदः अपि प्रतिपत्तिभेदहेतुः भवति। प्रतिपत्तिभेदः दर्शनभेदं प्रापयति। एवं भारते अनेकानि दर्शनानि आविर्भूतानि। एषु कानिचन वेदप्रामाण्यम् अङ्गीकुर्वन्ति तानि वैदिकदर्शनानीति विख्यातानि। वेदप्रामाण्यं यानि नाङ्गीकुर्वन्ति तानि अवैदिकानीति आख्यायन्ते। कर्मवैचित्र्यं प्रपञ्चवैचित्र्यहेतुः। “स्वकर्मसूत्रग्रथितो हि लोकः” इति अध्यात्मरामायणे। विवेकिनः जननमरणरूपस्य जगतः

संसारचक्रान्तर्भूतस्य भ्रमणस्य शाश्वतविरामः भविष्यति वा? अस्ति चेत् क उपायः? इति अचिन्तयन्। तत्फलमेव एतादृशानां दर्शनप्रविभागानाम् आविर्भावः।

प्रस्थानत्रयमवलम्ब्य अद्वैतद्वैतविशिष्टाद्वैतादीनि वेदान्तदर्शनानि विकासं प्राप्तानि। श्रीशङ्कराचार्यः, श्रीमध्वाचार्यः, श्रीरामानुजाचार्यश्च एषां वेदान्तदर्शनानां क्रमशः प्रवक्तारः। एतैराचार्यैः भाष्यप्रकरणादिग्रन्थाः तत्तन्मतानुसारेण विरचिताः अपि सन्ति।

वेदान्तदर्शने उपनिषदन्तर्गतानि "अयमात्मा ब्रह्म", "प्रज्ञानं ब्रह्म", "तत्त्वमसि", "अहं ब्रह्मास्मि" इति चत्वारि वाक्यानि महावाक्यानीति संज्ञया प्रसिद्धानि। आत्यन्तिकतत्त्वस्य प्रतिपादकानि भवन्ति महावाक्यानीति केचित् अभिप्रयन्ति। किन्तु ब्रह्मात्मैक्यावगतेः प्रतिपादकानि सन्ति चत्वारि महावाक्यानीति केषाञ्चित् वादः।

यद्यपि एतानि वाक्यानि भिन्नोपनिषदन्तर्गतानि तथापि तानि परस्परसाकाङ्क्षवाक्यानि च भवन्ति इति वैशिष्ट्यम्। तस्मादेव कारणात् उपनिषदां मध्यात् एतानि वाक्यानि स्वीकृत्य परस्परान्वयेन दर्शनसमष्टेः विवरणाय प्रयुज्यन्ते। एतदेव महावाक्यानामेषां प्रथमं महत्त्वम्। यद्यपि महावाक्यचतुष्टयं बहुप्राचीनकालादारभ्य स्वीकृतं वर्तते तथापि तेषां विषये

इतःपर्यन्तं न कोऽपि पृथक् पठनं कृतवान् इत्यतः ममायं 'शोधप्रबन्धः' विषयेऽस्मिन् प्रथमः प्रयत्नः।

आत्मैक्यसूचकानि अन्यान्यपि वाक्यानि यद्यपि उपनिषत्सु प्रभूततया वर्तन्ते तथापि तानि नेह मुख्यतया स्वीकृतानि। एवमपि शोधप्रबन्धेऽस्मिन् तेषामपि यथायोग्यं सञ्चयनं कृत्वा पट्टिकारूपेण प्रदत्तानि वर्तन्ते इति शोधप्रबन्धस्यास्य द्वितीयं वैशिष्ट्यम्। एषां वाक्यानां ऋग्यजुस्सामाथर्ववेदाधारत्वं, महावाक्यानां संवेदनानुकूलक्रमः, शुकरहस्योपनिषदि, पैङ्गलोपनषदि पठितः महावाक्यक्रमश्च इत्येतद् शोधप्रबन्धेऽस्मिन् पट्टिकारूपेण प्रदत्तम्।

शोधप्रबन्धेऽस्मिन् सप्त अध्यायाः सन्ति। प्रथमेऽध्याये दर्शनानां सामान्यनिरूपणं कृतमस्ति।

द्वितीयाध्याये चतुर्णामपि महावाक्यानां सामान्यनिरूपणम्, स्वरूपं च प्रतिपादितम्। अत्र तावत् महावाक्यानां क्रमविषये च विमर्शनात्मकरूपेण चिन्तितम्। तृतीयाध्यायादारभ्य षष्ठाध्यायपर्यन्तं अद्वैतद्वैतविशिष्टाद्वैतप्रवक्तृणां श्रीशङ्कराचार्य-मध्वाचार्य-रामानुजाचार्याणां मतानुसारेण महावाक्यचतुष्टयस्य समीक्षात्मकं पठनं कृतमस्ति। अन्तिमे निर्णयसंक्षेपनामके सप्तमेऽध्याये शोधप्रबन्धस्यास्य निर्णयोऽपि विहितः अस्ति।

आदावेव कोट्टयस्थस्य महात्मागान्धि विश्वविद्यालयस्य अधिकृतेभ्यः तथा तम्मनस्थस्य सुकृतीन्द्र प्राच्यविद्यागवेषणकेन्द्रस्य च अधिकारिभ्यः

हार्दिकं धन्यवादं व्याहरामि। एतस्य गवेषणकेन्द्रस्य निदेशकाय डा. वि. नित्यानन्दभट्टमहोदयाय सविनयं कृतज्ञतां समर्पयामि। शोधप्रबन्धरचनायां साहाय्यं दत्तवद्भ्यः मम मार्गदर्शकेभ्यः डो. एम्. शान्तिचन्द्र कामत् महोदयेभ्यः हार्दिकं धन्यवादं समर्पयामि। शोधप्रबन्धं सम्यक् घटयितुं तथा संशयानपाकर्तुं बहुसाहाय्यं दत्तवद्भ्यः संप्रेरकेभ्यः मम गुरुपदमलङ्कुर्वद्भ्यः राष्ट्रपतिना संस्कृतपाण्डित्यम् अभिलक्ष्य प्रमाणपत्रेण पुरस्कृतेभ्यः ऋग्वेदव्याख्यातृभ्यः 'श्रीवराहं' डा. के. चन्द्रशेखरन् नायर - महोदयेभ्यः सविनयं कार्तज्ञ्यं व्याहरामि। यथासमयं मदीयसंशयनिवारणं ससन्तोषं कृतवद्भ्यः 'पण्डितरत्नं' इति उपाधिना पुरस्कृतेभ्यः डा. जि. गङ्गाधरन् नायर् महाशयेभ्यः सादरं धन्यवादं समर्पयामि। शोधप्रबन्धस्य रचनाय नानाविधं साहाय्यं कृतवत्यै मम धर्मपत्न्यै श्रीमत्यै इ. डि. पुष्पलतायै धन्यवादं व्याहरामि। उट्टङ्कनादि कार्यं यथाकालं विधाय साहाय्यं कृतवत्यै पैको मुद्रणशालायै धन्यवादं समर्पयामि। एवं शोधप्रबन्धलेखनार्थं प्रेरणां दत्तवद्भ्यः सुहृद्भ्यः, सर्वेभ्योऽपि पौनःपुन्येन धन्यवादं व्याहृत्य शोधप्रबन्धमिमं विद्वदग्रेसरणां शोधकाराणामग्रे सादरं समर्पयामि।

कोच्चि - 32 **जि. चन्द्रशेखर प्रभु**
30-1-2015

विषयानुक्रमणिका

पृष्ठसंख्या

प्राक्कथनम्

१. **प्रथमोऽध्यायः**

आमुखपठनम् १

१.१. नास्तिकदर्शनानां सामान्यनिरूपणम्

१.१.१. दर्शनम् - स्वरूपपर्यालोचना १

१.१.२. दर्शनम् - जिज्ञासाविर्भूतम् १

१.१.३. चार्वाकदर्शनम् ९

१.१.४. जैनदर्शनम् १५

१.१.५. बौद्धदर्शनम् २०

१.२. आस्तिकदर्शनानां सामान्यविचारः

१.२.१. सांख्यदर्शनम् २७

१.२.२. योगदर्शनम् ३०

१.२.३. न्यायदर्शनम् ३४

१.२.४. वैशेषिकदर्शनम् ४०

१.२.५. मीमांसादर्शनम् ४४

१.३. वेदान्तदर्शनम् (उत्तरमीमांसा) **४९**

१.३.१. श्रीशङ्कराद्वैतवेदान्तवादः **५१**

१.३.२. श्रीशङ्करोत्तरवेदान्तवादाः **६१**

१.३.२.१. विशिष्टाद्वैतदर्शनम् **६१**

१.३.२.२. द्वैतदर्शनम् **६४**

१.३.२.३. भेदाभेददर्शनम् **७१**

१.३.२.४. द्वैताद्वैतदर्शनम् **७३**

१.३.२.५. शुद्धाद्वैतदर्शनम् **७३**

२. द्वितीयोऽध्यायः

महावाक्यानां सामान्यविचारः स्वरूपकथनं च **८२**

२.१. महावाक्यानां सामान्यस्वभावः **८२**

२.२. महावाक्यानां पाठक्रमः **८३**

२.३. महावाक्यानां सार्थकता **८६**

२.४. शुकरहस्योपनिषदि महावाक्यानां स्वरूपम् **९२**

२.५. पैङ्गलोपनिषदि महावाक्यानां स्वरूपम् **९९**

२.६. बह्वृचोपनिषदि महावाक्यानां स्वरूपम् **१०४**

२.७. उपनिषत्संख्यायां मतभेदः **१०५**

२.८. मुक्तिकोपनिषदनुसारेण उपनिषत्संख्या **१०५**

३. **तृतीयोऽध्यायः**

"अयमात्मा ब्रह्म" इति महावाक्यस्य समीक्षा १११

३.१. शङ्करमतम् ११३

३.२. मध्वमतम् ११३

३.३. रामानुजमतम् ११५

४. **चतुर्थोऽध्यायः**

"प्रज्ञानं ब्रह्म" इति महावाक्यस्य गौरवात्मकं पठनम् १२३

४.१. शङ्करमतम् १२७

४.२. मध्वमतम् १३०

४.३. रामानुजमतम् १३२

५. **पञ्चमोऽध्यायः**

"तत्त्वमसि" इति महावाक्यस्य अन्वेषणात्मकं पठनम् १४०

५.१. शङ्करमतम् १४४

५.२. मध्वमतम् १४६

५.३. रामानुजमतम् १४८

६. **षष्ठोऽध्यायः**

"अहं ब्रह्मास्मि" इति महावाक्यस्य गहनतमं पठनम् १५४

६.१. शङ्करमतम् १५७

६.२. मध्वमतम् २११

६.३. रामानुजमतम् २२०

७. **सप्तमोऽध्यायः**

निर्णयसंक्षेपः २३३

प्रथमोऽध्यायः

आमुखपठनम्

१.१. नास्तिकदर्शनानां सामान्यनिरूपणम्

१.१.१. दर्शनम् - स्वरूपपर्यालोचना

प्रेक्षणार्थकाद् 'दृश्' धातोः (दृशिर् प्रेक्षणे) ल्युट् प्रत्यये कृते दर्शनशब्दो निष्पद्यते। दृश्यतेऽनेनेति दर्शनम्। येनेदं दृश्यते तद्दर्शनम्। दृश्यते साक्षात्क्रियते प्रपञ्चतत्त्वम् अनेन इति दर्शनम्। एतेन निर्वचनेन भाति यत् प्रपञ्चतत्त्वस्य साक्षात्करणोपाधिरेव दर्शनमिति।

उपनिषत्साहित्यं तु दर्शनस्य योनिरेव। लोके अतिप्राचीनग्रन्थात् वेदादारभ्य विरचितेषु अद्यापि विरच्यमानेषु ग्रन्थेषु द्रष्टुरात्मनः दृश्यस्य जगतश्च विचारो निर्बाधरूपेण प्रचलति। एतद्विचारशास्त्रं दर्शनमित्युच्यते।"

१.१.२. दर्शनम् - जिज्ञासाविर्भूतम्

येन साधनेन इदं विश्वम्, इदं वस्तुजातम्, ब्रह्म, जीवात्मा, प्रकृतिश्च यथार्थतया ज्ञायते - निरीक्ष्यते परीक्ष्यते विविच्यते च तद् दर्शनम् इति सामान्यतया सरलां रीतिम् अनुसृत्य वक्तुं शक्यते।

समस्तमपि आध्यात्मिकं, आधिदैविकं च विचिन्तनं दर्शनशब्दान्तर्गतं भवितुमर्हति। ब्रह्म नाम किम्? ब्रह्मणः स्वरूपं किम्? कः सर्वेश्वरः? ईश्वरसाक्षात्कारः कथम्? दृश्यमानः प्रपञ्चः शाश्वतः वा अशाश्वतः वा? जगति शाश्वतं तत्त्वं वर्तते वा? वयं कुतः आगताः भवामः? कुत्र गमिष्यामः? आत्मा अस्ति वा? जीवात्मनः स्वरूपं किम्? अनयोः कीदृशः सम्बन्धः? मरणानन्तरं पुनर्जननं अस्ति वा? स्वर्गः अस्ति वा? ब्रह्मलयो अस्ति वा? मोक्षो नाम कः? आत्मा चेतनो वा? अचेतनो वा? जगतः अस्य सृष्टेः कर्ता कः? जीविते वीक्षणं किञ्चिदस्ति वा? कः पन्थाः अयनाय? परमात्मनः स्वरूपमस्ति वा? अस्ति चेत् किम्? इत्यादयो विषयाः यत्र युक्तियुक्ततया सूक्ष्मरूपेण च विचिन्तिताः तद् दर्शनं भवति इत्येतद् पूर्वोक्तलक्षणैश्च समञ्जसं भवति। उपरि आशङ्किततानां संशयानां संक्षिप्तसमाहारः भवति केनोपनिषदः प्रथमः मन्त्रः। यथा-

> "केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः।
> केनेषितं वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति।"[1]

उक्तायाः उपनिषदः केनोपनिषदिति संज्ञा अस्याः आरम्भपदस्वरूपमादायैव। सामवेदस्थस्य तलवकारब्राह्मणस्थस्य चतुर्थभागे अस्याः उपनिषदः भानमित्यतः अस्याः तलवकारोपनिषदिति संज्ञा युज्यते। एतादृशाः संशयाः अन्यथा अवगन्तुं गत्यन्तराभावादेव इह अवतारिताः वर्तन्ते इति केनोपनिषदः तृतीये मन्त्रे विषयमिमम् अधिकृत्य विचारो वर्तते-

"न तत्र चक्षुर्गच्छति न वाक् गच्छति नो मनः।
न विद्म न विजानीमो यथैतदनुशिष्यात्"[2]।।

मानवः प्रकृत्या अर्थात् स्वभावतो मननशीलः प्राणी वर्तते। "मत्वा कर्माणि सीव्यन्तीति"[3] तस्य निरुक्तिरपि पूर्वोक्तरीत्या अन्वर्था एव। आत्मसाक्षात्कारायैव सर्वाण्यपि दर्शनानि प्रवृत्तानि। स हि कोऽहं कस्मादहमित्यपि समस्याः सन्ततं भावयित्वा "आत्मा वा अरे द्रष्टव्यः"[4] इति दर्शनस्य बीजम् उद्भावितवान्। दुःखनिवृत्तिमेव अभीप्समानाः जनाः सर्वे जीवन्ति। एवं चेदपि आत्मज्ञानम् अथवा आत्मदर्शनं दुःखनिवृत्तये अत्यन्तापेक्षितमिति पण्डिताः अभिप्रयन्ति। आङ्गलशब्दस्य 'फिलासफी' इत्यस्य मौलिकोऽर्थः अपि तदनुकूल एव।

अस्माकं भारतं तत्त्वज्ञानविचारप्रधान-देश इति सर्वे आमनन्त्येव। एतस्य तात्पर्यं यत् अन्यदेशस्थाः जनाः जीवन-संग्रामे अर्थात् तदर्थं जीवनसाधनेष्विव अखिलं कालं यापयितुम् उत्साहवन्तः सन्ति। परन्तु भारतीयाः जनाः प्रकृतिप्रदत्तानां जीवनसाधनानां सुलभप्राप्याम् ऐहलौकिकीं चिन्ताम् अधिकां विहाय पारलौकिकीं चिन्तामेव सर्वदा सर्वथा च आचरन्ति। अर्थात् अस्माकं भारतदेशः आध्यात्मिक-प्रधानः देशः। तदुक्तं श्रीमद् भगवद्गीतायाम्-

"सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्।।"[5]

समस्तसृष्टीनाम् आदिः, मध्यम्, अन्तश्च परब्रह्माख्यः अहमेव। विद्यासु अहं परम् अध्यात्मविद्या। प्रवादेषु अहमेव वादः इति।

भारते दर्शनानामुद्भवः वेदकाले एव समारब्धः। ऋग्वेदे प्रजापतिपरमेष्ठी जगतो मूलतत्त्वं मीमांसमानः प्राप्यते। अपरोऽपि संवनन-आङ्गिरसो नाम ऋषिः "सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्"[6] इत्यादि मन्त्रैः तस्यैव तत्त्वस्यान्वेषणाय जनान् संप्रेरयन्

प्रतिभाति। अनयोः ऋष्योः चिन्ताधारयोर्द्वयी दिशा-प्रथमा चिन्तनप्रवृतिः द्वितीया तर्कप्रवृतिः। एते द्वेऽपि मिलित्वा दर्शनानि अङ्कुरयितुं प्राभवताम्। वेद-संहितायाम् अङ्कुरितस्य दर्शनवृक्षस्य पल्लविततत्वम् उपनिषत्काले जातम्। "तत्त्वमसि"[7] इत्यादि मन्त्रेण (श्रुत्या) समानं तत्त्वमेव प्रकटितम् वर्तते। तत्पश्चात् सूत्रकालोदये दर्शनवृक्षस्य शाखाः विभक्ताः।

उपर्युक्तः दर्शनवृक्षः शाखाभेदेन बहुधा विभक्तः। नानारूपेण विभक्तस्य दर्शनस्य प्रथमं द्वौ भागौ स्तः। एतत् स्थूलरूपमिति वक्तुं शक्यते। वैदिकानि अवैदिकानि च दर्शनानि। वैदिकानि दर्शनानि आस्तिक-दर्शनानि इति पदेन, अवैदिकानि नास्तिक-दर्शनानीति पदेन, व्यवह्रियन्ते। अत्र वैदिकदर्शनानि न्यायदर्शनम्, वैशेषिकदर्शनम्, सांख्यदर्शनम्, योगदर्शनम्, मीमांसादर्शनम्, वेदान्तदर्शनञ्च षट् भवन्ति। एवमेव अवैदिकदर्शनानि त्रीणि-चार्वाकदर्शनम्, बौद्धदर्शनम्, जैनदर्शनञ्चेति।

देवतिर्यङ्मनुष्यवर्णाश्रमादि प्रविभाग-हेतुभूतं ऋग्वेदादिविज्ञानाकरं सर्वज्ञानाकारमिति श्रीमच्छङ्काराचार्यः अभिप्रैति। भौतिकाध्यात्मिकानां

सर्वेषां विचाराणां मूलस्रोतः वेदः एव। अतः भौतिकवादात् चार्वाकदर्शनादारभ्य अद्वैतवादपर्यन्तानि सर्वाण्यपि-दर्शनानि वेदादेवाङ्कुरितानीति पूर्वमेव सूचितम्। मानवजीवितस्य प्रत्येकं अवस्थासु भिन्नभिन्नविचाराः उद्भूय क्रमशः विकासं प्राप्य दर्शनानि सम्भूतानीति वक्तुं शक्यते। इमानि सर्वाण्यपि परस्परं विरुद्धानि न, किन्तु मिथः पूरकाणीति पण्डिताः केचन अभिप्रयन्ति। केवलं मार्गभेद एव, लक्ष्यन्तु एकमेव। अस्मिन् जगति व्यक्तिः, अवस्था, अभिरुचिः इत्यादीनां भेदाः प्रतिपत्तिभेदानां कारणं भवति। प्रतिपत्तिभेदाः दार्शनिकभेदानां कारणं भवति। एवं भारते अनेकानि दर्शनानि आविर्भूतानि।

भारतीयदर्शनस्य सूक्ष्मता नान्यदर्शनेन तुलयितुं शक्यते। लोके यत्रकुत्रापि दर्शनविषये विचाराः वर्तन्ते तान् सर्वान् अतिरिच्यन्ते भारतीयदर्शनविचारतल्लजानि। भूमौ विद्यमानेषु राज्येषु विविधकार्यवैदग्ध्यं प्रति यदि विचारः क्रियते, तुलना च क्रियते तस्मिन् विषये तर्हि वेदान्तदर्शनविषये परं भारतस्य अत्युन्नततमं स्थानं वर्तते इति वयं साभिमानं स्मरामः।

भारते तावत् सत्यं किमित्यवगन्तुं ऋषयः तपसा बहुवारं विचिन्तनं कृत्वा तेन विचिन्तनेन यत्किञ्चित् सत्यस्वरूपेण अन्तरङ्गे प्रतिबिम्बितमासीत् त एव दर्शनविषयाः आत्यन्तिकदुःखनिवृत्ति-लाभायैव तादृशानि विचिन्तनानि प्रादुर्भूतानि। तानि अपवर्गपदे जनान् नेतुं सर्वदा प्रभवन्ति च। तदुक्तं सांख्यकारिकायां यथा-

"दुःखत्रयाभिघातात् जिज्ञासा तदपघातके हेतौ।
दृष्टे सापार्था चेत् नैकान्तात्यन्ततोऽभावात्"[8]।।

दार्शनिकाचार्याः सर्वे महात्मानः किन्तु तेषु केचित् जगद्गुरुपदेन ज्ञायन्ते। अतः जगद्गुरोः स्थानं कदा? कस्मै? किमर्थं? ददाति इत्येतद् आलोचनीयं वर्तते। भारतीयरीत्या कश्चित्- महात्मा शताधिकग्रन्थतल्लजानां कर्ता भवतु तथापि जगद्गुरुपदं वोढुं स न प्रभवतीति विश्वसन्ति जनाः। यः कोऽपि महात्मा प्रस्थानत्रयस्य भाष्यं रचयितुं समर्थो भवति सः परं जगद्गुरुसंज्ञया व्यवहारयोग्यः। इदानीं दर्शनान्तर्गतानां अवान्तरभेदानां च स्वीकारं कृत्वा यदि पर्यालोच्येत तर्हि अत्र द्वादश दर्शनानि सन्तीति स्पष्टतया अवगन्तुं शक्यते। तानि तावत्-

१. चार्वाकदर्शनम्

२. जैनदर्शनम्

बौद्धदर्शनम् (चतुर्धा विभक्तम्)

३. शून्यवादः

४. क्षणिकविज्ञानवादः

५. ज्ञानाकारबाह्यार्थवादः

६. प्रत्यक्षस्वलक्षणक्षणिकबाह्यार्थवादः

७. सांख्यदर्शनम्

८. योगदर्शनम्

९. न्यायदर्शनम्

१०. वैशेषिकदर्शनम्

११. मीमांसादर्शनम् (पूर्वमीमांसा)

१२. वेदान्तदर्शनम् (उत्तरमीमांसा)

द्वादशात्मकेषु उक्तेषु दर्शनप्रभेदेषु सन्ति बहवः दार्शनिकाः महाधिषणाशालिनः। किन्तु दार्शनिकाचार्येषु एषु त्रयः दार्शनिकाः सुतरां

विविच्य वर्तन्ते यतः ते परं जगद्गुरवः। अतः के जगद्गुरवः? कथं जगद्गुरवः? इत्यादिकं किञ्चित्प्रतिपादनीयं वर्तते। इदानीं जगद्गुरवः श्रीशङ्कराचार्यः, श्रीरामानुजाचार्यः, श्रीमध्वाचार्यश्च। आचार्यत्रयेऽस्मिन् परं प्रस्थानत्रयभाष्यकर्तृत्वं विलसति इति अवगन्तुं शक्यते। एवं दर्शनव्याख्यातृषु श्रीशङ्कर-रामानुज-मध्वाचार्येभ्यः परं प्रस्थानत्रयस्य व्याख्यातारः इति आमनन्ति लोकाः। एते आचार्याः उपनिषदां, ब्रह्मसूत्रस्य, गीतायाश्च भाष्यरचनायां प्राभवन्। एवं प्रस्थानत्रयस्य भाष्यकर्तारः एते त्रयः आचार्याः जगद्गुरुसंज्ञाम् अलङ्कर्तुमर्हन्तीति आयातम्।

अथ दर्शनानि सामान्यतया निरूप्यन्ते।

१.१.३. चार्वाकदर्शनम्

भारतीयानि दर्शनानि नास्तिकानि आस्तिकानि च। ये वेदप्रामाण्यं न अङ्गीकुर्वन्ति ते नास्तिकाः, ये वेदप्रामाण्यं अङ्गीकुर्वन्ति ते आस्तिकाः।

औपनिषदां ग्रन्थानां पश्चात् तदा बुद्धमतात्पूर्वं राजनैतिकरीतिः सुघटिता नासीत्। मन्त्राणां दुर्व्याख्यानजनितां वैदिकपरम्पराम् आदाय

समाजे अनाचाराणां दुराचाराणां च ताण्डवमासीत्। गोमेधः, अजमेधः, अश्वमेधश्च वेदाचारत्वेन आचरितः आसीत्। सुरापानमपि सोमपानरीत्या कृतवन्तः याज्ञिकाश्च ये पशवः पक्वमांसलाभार्थं यज्ञकुण्डे निक्षिप्ताः तेषां स्वर्गप्राप्तिः भविष्यतीति कुप्रचारञ्च ते कृतवन्तः। इमाम् अयोग्यां जीवितसरणीम् उच्चाटयितुं केचित् कृतप्रयत्नाः अभवन्। ते भौतिकवादिनः इति ज्ञायन्ते। भारते चार्वाकदर्शनस्योदयः वैदिकानां दुराचाराणां सम्मार्जनाय समजनीति ज्ञायते।

चार्वाकाणां आकरग्रन्थः बृहस्पतिसूत्रमिति सर्वे आमनन्ति। मरणात् परतः किमपि नास्तीति तेषां विश्वासः "भस्मीभूतस्य देहस्य पुनरागमनं कुतः"[9]? कदापि न भविष्यतीति ते विश्वसन्ति। अतः "यावज्जीवं सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्"[10] इत्यादि ते स्वीकुर्वन्ति। बृहस्पतिसूत्राणि न इतः पर्यन्तं लब्धानि। परलोकं अमन्यमानाः ते शरीरमेव आत्मानं स्वीकुर्वन्ति। दर्शनमिदं भौतिकवादिनां मध्ये प्रचरितत्वात् अस्य लोकायतदर्शनमित्यपि नामान्तरम्। चार्वाकमतमुद्दिश्य जयन्तभट्टेन न्यायमञ्जर्याम् इत्थम् उक्तं वर्तते-

"न हि लोकायते किञ्चित् कर्तव्यमुपदिश्यते।

वैतण्डिककथैवासौ न पुनः कश्चिदागमः"[11]।।

श्रवणाय परं चार्वाकमतं युक्तं न तु अनुष्ठानाय इति केचित् वदन्ति। अतः मतस्यास्य चारु वाक् इति संज्ञया व्यवहारः। चारु वाक् इत्यस्य श्रवणाय परं सुन्दरं वचनमित्यर्थः। प्रस्थानस्यास्य परामर्शः ग्रन्थान्तराणां टीकासु परम् अवशिष्यते। चार्वाकाणां प्रत्यक्षं परं प्रमाणम्।

पृथिवी, जलं, अग्निः, वायुः इत्येतानि चत्वारि भूतानि तेषां तत्त्वानि। तेष्वेव चैतन्यम् उपजायते इति ते विश्वसन्ति। चार्वाकाणां मते अङ्गनाद्यालिङ्गनादिजन्यं सुखमेव पुरुषार्थः। देहस्य नाशे मुक्तिः, न ज्ञानात् मुक्तिः इत्यपि तेषामभिप्रायः, ते स्वर्गे, अपवर्गे, परलोके, आत्मनि वा न विश्वसन्ति। वर्णाश्रमादीनां फलदायकत्वं नास्तीति ते प्रख्यापयन्ति। यज्ञीयपशुहत्या तेषां मते पापाचारः। यज्ञीयपशुहन्तृन् प्रति तेषां प्रतिवचनं स्तोतारम् अवश्यं स्तब्धं करोति।

"पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति।

स्वपिता यजमानेन तत्र कस्मान्न हिंस्यते"[12]।।

यज्ञे अश्वगोऽजादीनां हिंसायां तेषां स्वर्गः लभते तर्हि कुतो न एते पाखण्डाः स्वमातरं पितरं च स्वर्गप्राप्त्यर्थं घ्नन्ति.।

शरीरमेव जीवः। सृष्टिकर्ता ईश्वरो नास्ति। सृष्टिस्तु आकस्मिकतया जायते। ईश्वरो नास्त्येव।

इदं चार्वाकमतं बहु नामनन्ति। न मतेऽस्मिन् सामान्यजनानाम् औत्सुक्यं च वर्तते। ये वक्रबुद्धयः ते परं स्वीकुर्वन्ति इदं प्रस्थानम्। तेष्वपि बहवः बाह्यव्यवहारे परं स्वीकुर्वन्ति इदं तत्त्वमित्यपि अस्ति प्रथा।

दुःखभयात् अनुकूलवेदनीयस्य सुखस्य त्यागः न उचितः। यदि कश्चिद् भीरुः हस्तामलकं सफलं त्यजेत् तर्हि स पशुवत् मूर्खो भवेत्।

तदुक्तम्-

"पिब खाद च जातशोभ, यदतीतं वरगात्रि, तन्न ते।

न हि भीरुगतं निवर्तते समुदायमात्रमिदं कलेवरम्"[13]।। इति।

अग्निहोत्रं, त्रयः वेदाः (ऋक्, यजुः, सामः), त्रिदण्डं

(मनोवाक्कायनियन्त्रणसूचकः संन्यासिनां दण्डः), भस्मगुण्ठनं च बुद्धिपौरुषहीनानां ब्राह्मणपुरोहितादीनां जीवनोपाधिः इति। तदुक्तम्-

"अग्निहोत्रं त्रयो वेदाः त्रिदण्डं भस्मगुण्ठनम्।

बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः"[14]

देशान्तरगतस्य बुभुक्षानिवारणार्थं गृहे पाथेयकल्पनवत् व्यर्थमेव मृतस्य श्राद्धादिकम्। शरीरमत्र त्यक्त्वा यदि एकः विनिर्गतः तर्हि कुतः सः बन्धुस्नेहात् पुनः नायाति?। तदुक्तम्-

"मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम्।

निर्वाणस्य प्रदीपस्य स्नेहः संवर्धयेच्छिखाम्"[15]।।

"चार्वाकदर्शनग्रन्थाः अधुना नोपलभ्यन्ते। आस्तिकदर्शनकारैरस्य दर्शनस्य निन्दा कृता यथा दर्शनमिदमस्तङ्गतम्। प्रागत्र दर्शने ग्रन्थाः आसन्, कालेन ते कवलीकृताः।"[16]

"पतञ्जलिसमये अस्मिन् दर्शने ग्रन्थाः प्राप्यन्ते स्म।३।३।४३ सूतस्य भाष्ये पतञ्जलिना उक्तम्- वर्णिका - भागुरी लोकायतस्य - वर्णिका व्याख्यात्री, भागुरी टीकाविशेष इति तद्भाष्योपरि कैयटः इति

रीत्या संस्कृतसाहित्येतिहासे उक्तं वर्तते”[17]। एतेन तत्काले चार्वाकदर्शनग्रन्थानां प्रचारः सिद्ध्यति।

तदुपरि हुतशेषं भक्षयेदिति श्रुतिं प्रामाण्यत्वेनाङ्गीकृत्य तस्य बलेन ये मद्यपाः ते अल्पमात्रं मद्यं हविसः सङ्कल्पेन यज्ञकुण्डे प्रक्षिप्य शेषं मद्यं पिबन्ति। सुरापानं नरकसाधकमिति श्रुतेः बलं विषयेऽस्मिन् नास्तीति ते वदन्ति। हुतशेषं भक्षयेदिति श्रुतेरपि प्रामाण्यात् इति ते अभिप्रयन्ति। एवं वादिनः मद्यासक्तान् जनान् प्रति भर्त्सनरूपेण कथितं एकं पद्यं महाभाष्यकारेण आनुषङ्गिकतया उद्धृतं दृश्यते यथा-

“यदुदुम्बरवर्णानां घटीनां मण्डलं महत्।
पीतं न गमयेत्स्वर्गं किं तत् क्रतुगतं नयेत्”[18]।। इति।

सम्प्रति तु दर्शनग्रन्थेषु यत्र तत्रोद्धरणमात्रं पूर्वपक्षरूपेण दृश्यते। “वाल्मीकिरपि जाबालिद्वारा चार्वाकमतानुसारेण किञ्चिद्वदति। अन्ते श्रीरामस्य मनोगतस्य अवगमनाय परं चार्वाकदृष्ट्या प्रश्नाः कृताः इत्युक्त्वा स्वयं तस्मात् विरमति”[19]।

१.१.४. जैनदर्शनम्

जिनदेवस्य दर्शनं जैनदर्शनम्। पूर्वं दर्शनस्यास्य व्यवहारः 'निगण्ठ' शब्देन कृतः आसीत्। ग्रन्थात् निर्गतः निर्गन्थ इति निगण्ठ शब्दो संस्कृतशब्दस्य पालीभाषायाः रूपान्तरम्। दर्शनस्यास्य अनुयायिनाम् 'अर्हत' इति शब्देन व्यवहारः लोके वर्तते। तस्मात् कारणात् दर्शनस्यास्य आर्हतदर्शनमित्यपि व्यवहारः। महावीरः अस्य प्रवक्ता। अनेन रागादिरिपवः जिताः इति असौ जिनशब्देन उक्तः। अत एव तदीयतया लब्धं दर्शनमिदं जैनदर्शननाम्ना प्रथितम्। मतस्यास्य प्रचारकाः तीर्थङ्करशब्दैः व्यवह्रियन्ते। ऋषभदेवः तीर्थङ्करेषु प्रथमः इति प्रथा। मतस्यास्य प्रवक्तृत्वेन स्वीकृतः महावीरः तीर्थङ्करेषु अन्तिमः। अतः जैनमतं न आद्येन तीर्थङ्करेण ज्ञायते अपि तु अन्त्येन तीर्थङ्करेण ज्ञायते इति वैशिष्ट्यं मतान्तरापेक्षया। तीर्थङ्करेष्वाद्यः ऋषभदेवः आसीत्। पार्श्वनाथः धर्मस्यास्य प्रवर्तकेषु मुख्यः। सः काशीराजस्य अश्वसेनस्य पुत्रश्च। महावीर-पार्श्वनाथौ समकालीनौ इति प्रतिभाति। अनयोः उभयोर्मध्ये पार्श्वनाथः वस्त्रधारणं

अङ्गीकरोति। महावीरस्तु नग्नत्वम् अनुमन्यते। अस्मादेव कारणात् धर्मेऽस्मिन् दिगम्बर-श्वेताम्बराख्यौ विभागौ भवतः।

जैनमतानुसारेण एकस्मिन् पदार्थे विरुद्धधर्मस्यावकाशो वर्तते। अतः न कस्यापि पदार्थस्य पूर्णतया विवरणं कर्तुं शक्यते। अतः जैनैः वस्तुविषयविवरणवेलायाः पूर्वं स्यात् शब्दस्य प्रयोगः क्रियते। अतः ते स्याद्वादिनः इति उच्यन्ते। अस्य विषयस्य सप्तभङ्गीशब्देन व्यवहारः। सप्तनयः इत्यपि तस्य नामान्तरम्। यथा-

१. स्यात् अस्ति।

२. स्यात् नास्ति।

३. स्यात् अस्ति नास्ति च।

४. स्यात् अवक्तव्यम्।

५. स्यात् अस्ति अवक्तव्यम् च।

६. स्यात् नास्ति अवक्तव्यम् च।

७. स्यात् अस्ति नास्ति अवक्तव्यम् च।

जैनमते भूतसामान्यार्थकत्वेन पुद्‍गलशब्दो प्रयुक्तो दृश्यते। जीवपुद्‍गलयोः सहकारिकारणस्वरूपो धर्मो वर्तते इति तेषामभिप्रायः। अधर्मश्च जीवपुद्‍गलयोः सहकारिकारणस्वरूपाभावः। सम्यक् दर्शनम्, सम्यक् ज्ञानम्, सम्यक् चारित्रं चेति रत्नत्रयं जैनदर्शने अङ्‍गीकृतं दृश्यते। एतत् रत्नत्रयं मोक्षमार्गप्रदर्शकमिति च ते विश्वसन्ति। सप्तपदार्थविचारोऽपि दर्शनेऽस्मिन् कृतः वर्तते, यथा-

१. अजस्रः

२. बन्धः

३. संवरः

४. निर्ज्जरः

५. मोक्षः

६. जीवः

७. अजीवः इति।

येन रूपेण जीवाद्यर्थो व्यवस्थितस्तेन अर्हत्वप्रतिपादिते तत्त्वार्थे विपरीताभिनिवेशरहितत्वाद्यपरपर्यायं श्रद्धाधानं सम्यग्दर्शनम्। सम्यक्

ज्ञानन्तु परोक्षप्रत्यक्षरूपेण द्विधा विभज्य अवान्तरभेदैः सुष्ठु निरूपितमस्ति। डा. एस्. एस्. विवेकानन्देन भारतीयतत्त्वचिन्तासारे सूचितमस्ति - "संसरणकर्मोच्छित्तावुद्यतस्य श्रद्धाधानस्य ज्ञानवतः पापगमनकारणक्रियानिवृत्तिः सम्यक्चारित्रम्। तदेवमुच्यते–

सर्वथावद्ययोगानां त्यागश्चारित्रमुच्यते।
कीर्तितं तदहिंसादिव्रतभेदेन पञ्चधा।।

अहिंसा सुनृतास्तेयब्रह्मचर्यापरिग्रहाः"[20] इति।

जैनदर्शने 'नयसिद्धान्तः' अतीव प्रधानः अस्ति। डा. रमेशचन्द्र शुक्लेन 'प्रबन्धरत्नाकरे' उक्तम् – "नीयते परिच्छिद्यते एकदेशविशिष्टोऽर्थोऽनेनेति 'नय' इति एष अस्य पदस्य व्युत्पत्तिः स्याद्वादमञ्जर्यां कृता। न्यायावतारे प्रोक्तम् – 'एकदेशविशिष्टोऽर्थो नयस्य विषयो मत' इति।"[21]

जैनैः प्रपञ्चत्वं जीवाजीवभेदेन द्विधा विभक्तम्। जीवाजीवयोः परस्परसम्बन्धः अस्तीति तस्य मतस्य विश्वासः। तेषां मते अजीवाः पञ्च। ते तु - पुद्गलः, स्थलम्, कालः, धर्मः, अधर्मः चेति। जीवस्तु

अन्यान् पश्यति, कार्याणि जानीते, धर्माधर्मफलान्युपभुङ्क्ते च। पुद्गलस्य सूक्ष्मांशः परमाणुरिति उच्यते। परमाणोः गुरुत्वमेव चलनात्मकतायाः कारणम्। परमाणुसंयोगेन स्कन्धाः उपजायन्ते। सर्वाणि कार्यद्रव्याणि परमाणुसंङ्घातात् पुद्गलादुद्भूतानि इति तेषां मतम्। "परमाणुषु चैतन्यम् अस्तीति जैनमतम्। सर्वाणि स्थावराणि स्पर्शनेन्द्रिययुक्तानि। अन्यानि तु त्रसाणि। द्रव्यगुणयोः युगपदेव स्थितिः। मनोद्रव्ययोः बन्धं जैनाः अङ्गीकुर्वन्ति च।"[22] जैनाः केवलं प्रत्यक्षं, परोक्षमिति प्रमाणद्वयम् अङ्गीकुर्वन्ति।

आत्मनः नित्यत्वे महावीरः विश्वसिति स्म। तस्य मते आत्मा प्रतिदेहं भिन्नः। निर्वाणन्तु तीर्थङ्करप्राप्तिरेव। एते ईश्वरं नाङ्गीकूर्वन्ति। अभिनन्दनः, सुमतिनाथः, पद्मप्रभुः, चन्द्रप्रभः, सुविधिनाथः, शीतलनाथः, श्रेयांसनाथः, वासुपुष्यः, विमलनाथः, अनन्तनाथः, इत्यादयः मतस्य-अस्य प्रवर्तकाः सन्ति। एतन्मतसिद्धान्तान् प्रतिष्ठापयितुं बहवो ग्रन्थाः अरच्यन्त, यथा-देवनन्दिमहाभागस्य सर्वार्थसिद्धिः, दिगम्बरस्य समन्तभद्रस्य सिद्धसेनदिवाकरस्य च गन्धहस्तीभाष्यम्, भट्टाकलङ्कस्य राजवार्तिकम्। जैनदर्शनस्य

सर्वस्वभूताः ग्रन्थाः इमे चत्वारः, प्रवचनसारश्चेति। हरिभद्रविद्यानन्द प्रभृतयः अपि आचार्याः प्रसिद्धाः एव।

महावीरस्य निर्वाणानन्तरं धर्मेऽस्मिन् परिवर्तनानि बहूनि सम्भूतानि। तस्यानुयायिनः दिगम्बरश्वेताम्बरभेदाभ्यां विभक्ताः। जैनधर्मस्य मूलागमग्रन्थानां रचनामधिकृत्य दिगम्बर-श्वेताम्बर सम्प्रदाययोर्मध्ये मतभेदो दृश्यते। दिगम्बरसम्प्रदाये ज्ञानचन्द्र-गुण-रत्नसूरि-यशोविजयगुणिप्रभृतयः आचार्याः प्रसिद्धाः।

श्वेताम्बरसम्प्रदायस्य आचार्येषु भद्रबाहुः, उमास्वातिः कुन्दकुन्दाचार्यादयः प्रसिद्धाः। जैनदर्शनस्य साहित्यं प्राकृतभाषायां विरचितं दृश्यते। प्रामाणिकग्रन्थेषु जैनधर्मस्य मौलिकसिद्धान्तानां सङ्ग्रहो वर्तते। प्राक्तनदुष्कर्मणां नाशः सद्विचारैः सद्वचनैः सत्कर्मभिरेव सम्भवतीति तेषां विश्वासः।

१.१.५. बौद्धदर्शनम्

बौद्धदर्शनं जैनदर्शनानन्तरं संजातमिति पण्डिताः अभिप्रयन्ति। अस्य दर्शनस्य द्वौ भागौ स्तः। दार्शनिकभागः, धार्मिकभागश्च।

दार्शनिकभागे तत्त्वदर्शनविचारः। धार्मिकभागे आध्यात्मिकं तत्त्वदर्शनञ्च प्रपञ्चितं वर्तते। बौद्धसिद्धान्तस्य दार्शनिकभागस्य सूक्ष्मविवेचनं तार्किकदृष्ट्या कृतं वर्तते। भगवान् बुद्धः क्रिस्तोः पञ्चशतवर्षात्पूर्वं जन्म लेभे। लौकिकदुःखनिवृत्तये बुद्धदेवः ज्ञानं सम्पादितवान्। सः भिक्षुभ्यः उपदेशरूपेण धर्मचक्रं प्रवर्तयामास। अस्य महाशयस्य जन्म, तपसा बुद्धत्वप्राप्तिः, देहत्यागपूर्वकनिर्वाणञ्च वैशाखपूर्णिमायां एव जातमिति तस्य अनुयायिनः वदन्ति।

डा. रमेशचन्द्रशुक्लेन स्वकीये “प्रबन्धरत्नाकरः” इति नामके पुस्तके उक्तं यत्–

बौद्धधर्मेऽधोलिखिताः दश प्रश्नाः ‘अव्याकतानि’ इत्युच्यन्ते–

१. अपि किं लोकोऽयं शाश्वतः? २. किं वा अशाश्वतः?

३. अपि किं सान्तोऽयम्? ४. उत अनन्तः

५. आत्मशरीरयोर्मध्य ऐक्यं किम्?

६. अथवा आत्मा शरीराद् भिन्नः?

७. अपि किं तथागता मरणानन्तरं जीवनं धारयन्ति?

८. न वा धारयन्ति?

९. अपि किं धारयन्ति धारयन्त्यपि न ?

१०. आहोस्वित् ते न भवन्ति अमरा न च मरणधर्माणः?"[23]

दर्शनस्यास्य विभागचतुष्टयमस्ति। वैभाषिकः, सौत्रान्तिकः, योगाचारः माध्यमिकः इति रीत्या तेषां गणना। अत्र वैभाषिकाः बाह्यार्थप्रत्यक्षत्वम् अङ्गीकुर्वन्ति। सौत्रान्तिकाः बाह्यार्थः अनुमेयः इति स्वीकुर्वन्ति। योगाचाराः विज्ञानवादिनः भवन्ति। माध्यमिकास्तावत् शून्यवादमङ्गीकुर्वन्ति। अस्याशयस्य भानं श्रीनारायणभट्टपादविरचिते मानमेयोदये वर्तते-

"मुख्यो माध्यमिको विवर्त्तमखिलं शून्यस्य मेने जगत्
योगाचारमते तु सन्ति मतयस्तासां विवर्तोऽखिलः।
अर्थोऽस्ति क्षणिकस्त्वसावनुमितो बुद्ध्येति सौत्रान्तिकः
प्रत्यक्षं क्षणभङ्गुरञ्च सकलं वैभाषिको भाषते"[24]।।

दर्शनेऽस्मिन् त्रीणि रत्नानि सन्ति। तानि शीलं, समाधिः प्रज्ञा च। बुद्धस्य बहवः सिद्धान्ताः उपनिषत्सिद्धान्तेन साम्यम् आवहन्ति।

ऋते ज्ञानान्न मुक्तिः इति सिद्धान्तः औपनिषदः। बुद्धस्य सिद्धान्तान् तस्य शिष्याः पिटकाख्यानरूपेण वर्णयन्ति। सुत्तपिटकं, विनयपिटकं, अभिधम्मपिटकम् इति तानि त्रीणि पिटकानि। सुत्तपिटके सदृष्टान्तोपदेशाः विनयपिटके सदाचारविषयकाः नियमाः, अभिधम्मपिटके दार्शनिकाः नियमाः च सङ्कलिताः। एतानि त्रीणि बुद्धधर्मस्य आधारभूतानि प्रमाणानि इति उच्यन्ते। बुद्धस्य उपदेशाः द्विधा विभक्ताः दुःखसत्यानि, प्रतीत्यसमुत्पादः च इति।

बौद्धदर्शने विद्यमानानि अष्टाङ्गानि अतीव प्रसिद्धानि सर्वेभ्यो दुःखेभ्यो मुक्तिं प्रयच्छन्ति। तानि-सम्यक् दृष्टिः, सम्यक् सङ्कल्पः, सम्यक् वाक्, सम्यक् कर्मान्तः, सम्यक् आजीवः, सम्यक् व्यायामः, सम्यक् स्मृतिः, सम्यक् समाधिः इति। अष्टाङ्गमार्गैः मूलकारणभूतायाः तृष्णायाः निरासः लक्ष्यीक्रियते।

दुःखस्य कारणम् अहङ्कारः एव। अतः आत्मानमधिकृत्य चिन्तनं परित्यज्य दुःखनिवारणमार्गानेव विचिन्तयन्तु इति उपदेशं ददाति बुद्धः। बुद्धः निरीश्वरवादी आसीत्। दुःखान्मोचनं, तेन द्वारा जन्मनः

मोचनं एतदेव निर्वाणमिति बुद्धः जनान् उपदिदेश। भिक्षुपदप्राप्तये पालनीयाः नियमाः धर्मेऽस्मिन् सरलीकृताः विद्यन्ते।

बुद्धस्य निर्वाणप्राप्तेरनन्तरं शिष्याणां मध्ये मतभेदाः आरब्धाः। कालेन एतद्दर्शनस्य हीनयानं, महायानमिति शाखाद्वयमभवत्। हीनयानस्य ग्रन्थाः पालीभाषायां विरचिताः दृश्यन्ते। महायानस्य तु संस्कृतेनेति विरचिताः दृश्यन्ते। अपि च, कालान्तरे बौद्धधर्मस्य बह्व्यः शाखाः सम्पन्नाः। तत्र प्रमुखतः मतचतुष्टयमस्ति। तानि मतानि भवन्ति माध्यमिकः, योगाचारः, सौत्रान्तिकः, वैभाषिकः चेति।

महायानस्य अनुयायिनः भवन्ति माध्यमिकाः योगाचाराश्च। माध्यमिकमतं शून्यवादनाम्ना प्रसिद्धम्। बाह्यार्थज्ञानं, विज्ञानञ्च सर्वं शून्यमिति ते अभिप्रयन्ति। अस्य मतस्य आचार्येषु नागार्जुनः मुख्यः। द्रव्यस्य कापि सत्ता नास्तीति शून्यवादिनां माध्यमिकानां मतम्। अर्थात् द्रव्यगुणयोः सापेक्षिका सत्ता एव अस्ति। यथा–

"गन्ता न तिष्ठति तावदगन्ता नैव तिष्ठति।
अन्यो गन्तुरगन्तुश्च कस्तृतीयोऽथ तिष्ठति"[25]।।

यदा प्रपञ्चः निवर्तते तदा शून्यता आपद्यते। सैव शून्यता निर्वाणमित्युच्यते। यथा–

"कर्मक्लेशक्षयान्मोक्षः कर्मक्लेशाः विकल्पतः।

ते प्रपञ्चात् प्रपञ्चस्तु शून्यतायां निरुध्यते"[26]।।

अस्य माध्यमिकशास्त्रनामा ग्रन्थः नितान्तख्यातः। योगाचाराः बाह्यार्थस्य शून्यत्वमेवास्ति इति कथयन्ति। विज्ञानमेव यथार्थमिति ते वदन्ति इति हेतुना एते विज्ञानवादिनः इति प्रसिद्धाः। दिङ्नागः, धर्मकीर्तिः, धर्मपालः, असङ्गः, वसुबन्धुः अपि एतन्मतस्य पोषकाः आसन्। लङ्कावतारसूत्रम् अस्य वादस्य प्रधानः ग्रन्थः।

एवमेव सौत्रान्तिकाः, वैभाषिकाश्च हीनयानस्य अनुयायिनः, अभवन्। एतेषु सौत्रान्तिकाः बाह्यार्थानुमेयत्वमेव अङ्गीकुर्वन्ति। सौत्रान्तिकसम्प्रदायस्थापकाश्चत्वारः कुमारलातः श्रीलातः, धर्मत्रातः, बुद्धदेवश्च। प्रत्युत, बाह्यार्थप्रत्यक्षवादिनः एव वैभाषिकाः। वसुबन्धुप्रणीतः 'अभिधर्मकोशः' एतेषां प्रमुखः ग्रन्थः भवति। प्रत्यक्षम् अनुमानञ्च प्रमाणद्वयमेव अङ्गीकरोति बौद्धदर्शनम्।।

एवं रीत्या विचारे कृते नास्तिकदर्शनानि षट् विधत्तां यान्ति इत्यनुमातुं शक्यते। आचार्यः रामचन्द्रमिश्रः "संस्कृतसाहित्येतिहासे" कथयति यथा।

१. शून्यवादेनैकं प्रस्थानं माध्यमिकानाम्।

२. क्षणिकविज्ञानवादेनापरं प्रस्थानं योगाचाराणाम्।

३. ज्ञानाकारबाह्यार्थवादेनान्यत् प्रस्थानं सौत्रान्तिकानाम्।

४. प्रत्यक्षस्वलक्षणक्षणिकबाह्यार्थवादेनापरं वैभाषिकाणाम्।

५. एकं प्रस्थानं देहातिरिक्तदेहात्मवादिनां दिगम्बराणाम्।

६. स्थूलदृश्यदेहात्मवादिनां चार्वाकाणां चैकं प्रस्थानम्।

तदित्थं षट् नास्तिकदर्शनानि।। इति।

१.२. आस्तिकदर्शनानां सामान्यविचारः

१.२.१. सांख्यदर्शनम्

कपिलमुनिः सांख्यदर्शनस्य प्रवक्ता भवति। अतः स एव प्रस्थानेऽस्मिन् आदिमाचार्यः। आसुरिपञ्चशिख-ईश्वरकृष्णाः कपिलमुनेः सकाशात् परम्परया दर्शनेऽस्मिन् विद्वत्वं सम्पादितवन्तः। दृश्यमानं एतत् जगत् न मिथ्या अपितु सत्यमिति ते वदन्ति। बौद्धानां शून्यवादं वेदान्तिनां मायावादञ्च सांख्यमतानुयायिनः न अङ्गीकुर्वन्ति। युक्तिहीनं ईश्वरास्तित्ववादमपि ते न आमनन्ति। अतः सांख्याः निरीश्वरवादिनः। तथापि ते न भौतिकवादिनः। अत्मनः अस्तित्वं ते स्वीकुर्वन्ति। तेषां परिणामवादः अथवा सत्कार्यवादः अवश्यं दर्शनविषये श्रद्धाम् अर्हति।

सांख्यं संख्यासम्बन्धि भवति। प्रकृतिः, प्रकृतेः विकारभूतानि त्रयोविंशतितत्त्वानि, पुरुषश्च इत्याहत्य पञ्चविंशतितत्त्वानि सांख्याः अङ्गीकुर्वन्ति। तदुक्तं महाभारते-

'संख्यां प्रकुर्वते चैव प्रकृतिञ्च प्रचक्षते।
तत्त्वानि च पञ्चविंशत् तेन सांख्याः प्रकीर्तिताः'[27]।।

न्यायवैशेषिकवत् सांख्ययोगौ परस्परपूरकौ।

प्रकृतिपुरुषान्यथाख्यातिरेव 'संख्या' इति उच्यते। संख्यापदस्यार्थोऽस्ति- 'सम्यक् ज्ञानम्'। तदुक्तं शाङ्करविष्णुसहस्रनामभाष्ये – "शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयते"[28]

सांख्यदर्शनं पञ्चविंशतितत्त्वानि मन्यते। तदुक्तं सांख्यकारिकायाम्-

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।

षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः"[29]।।

सांख्याः सत्कार्यवादिनः। सांख्यकारिकायां उक्तञ्च–

"असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।

शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्"[30]।।

प्रकृतिः अचेतना। पुरुषस्तु निर्विकारः चेतनः।

"कार्यदर्शनात् तदुपलब्धेः",

"अव्यक्ते त्रिगुणाल्लिङ्गादि"[31]

निर्विकारचेतनपुरुषस्य सद्भावे किं मानमित्यत्र ईश्वरकृष्णः सांख्यकारिकायां वदति यत्–

"संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च"[32]।।

आत्मनः (पुरुषस्य) बाहुल्यमेव सांख्यसिद्धान्तः अङ्गीकरोति। अर्थात् प्रतिशरीरम् आत्मा भिन्न इति सांख्यानां मतम्। सांख्यसूत्रं ब्रूते "जन्मादिव्यवस्थातः पुरुषबहुत्वम्"। सांख्यकारिकायाम् अपि–

"जननमरणकारणानां प्रतिनियमाद् अयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव"[33]।। इति।

सृष्टिस्तु प्रकृतिपुरुषसंयोगादेव भवतीति सांख्यमतम्। प्रकृतिः जडा इति हेतोः न तस्या एव सकाशात् संसारो जायेत, पुरुषस्य निष्क्रियत्वादपि न। अतः सृष्टये प्रकृति-पुरुषयोः संयोगोऽपेक्ष्यते। पुरुषसान्निध्यात् जडप्रकृत्यां विकारः जायते। अथ सृष्टिविषये सांख्यकारिकायाम्–

"पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः"[34]।। इति।

संसारस्य मूलकारणम् अविवेकः अस्ति। दुःखनिवृत्तेः साधनम् अविवेक एव।

“द्वयोरेकतरस्य वौदासीन्यमपवर्गः”[35] इति सांख्यसूत्रम्। प्रकृतिपुरुषयोः परस्परवियोग एव अपवर्गः। वस्तुतः पुरुषः बन्धमोक्षहीनः।

प्रकृतिपुरुषयोरविवेकात् संसारो, विवेकज्ञानात् मोक्षो सिद्ध्यति”

गीतायां सांख्यं प्रति परामर्शो वर्तते। सांख्यपदेन गीता ज्ञानयोगं लक्ष्यीकरोति। सांख्यम् अतिप्राचीनकाले निरीश्वरवादि आसीत्। अधुना तु ईश्वरवादि सञ्जातम्। प्रकृतिपुरुषाभ्यामेव जगतः उत्पत्तिः समर्थयितुं शक्यते इत्यतः तत्रेश्वरकल्पना नावश्यकीति ते वदन्ति। बौद्धैः ईश्वरे अनास्था, दुःखस्य सत्ता, जगतः परिणामशीलता इत्यादयः सांख्यदर्शनतः स्वीकृताः वर्तन्ते इति केषाञ्चित् विदुषां मतम्।

१.२.२. योगदर्शनम्

सांख्यदर्शनवत् योगदर्शनानुयायिनामपि दृश्यमानः अयं प्रपञ्चः मनःसृष्टः भवति। इदं दर्शनं नानासिद्धीनां जननी भवति। ऋषयः योगशास्त्रानुसारेणैव अतीतानागतान् व्यवहितान् च प्रत्यक्षेण ज्ञातुं

प्रभवन्ति स्म। अद्वयतारकामृतनादाद्युपनिषत्सु योगस्य विस्तृतं विवेचनं वर्तते। पतञ्जलिना योगरहस्यप्रकाशनार्थं योगसूत्राणि प्रणीतानि वर्तन्ते। पादचतुष्टयात्मके ग्रन्थेऽस्मिन् कैवल्यरूपं परमं प्रयोजनं निरूपितमस्ति। पतञ्जलिः एव योगशास्त्रस्य प्रवर्तकः।

वस्तुतः सांख्ययोगयोः पार्थक्यं नास्ति। सांख्ये ये सिद्धान्ताः सन्ति तेषां प्रायोगीकरणमेव योगे कृतम् अस्ति। तत्त्वचिन्ताविषये सांख्यस्य यो विचारः वर्तते स एव योगस्यापि अस्ति इति विदुषाम् अभिप्रायः। सांख्याभिमतं प्रमाणत्रयं योगदर्शनमप्यङ्गीकरोति। तदुक्तं पातञ्जलयोगदर्शने – "प्रत्यक्षानुमानागमाः प्रमाणानि"[36]

चिन्तयति, करोति, उत्पद्यते, वर्धते, म्रियते, जागर्ति, स्वपिति, स्मरति, विस्मरति इत्यादयः आत्मनः धर्माः न। जननमरणादयो धर्माः शरीरस्यैव सन्ति। शयनजागरणादिक्रिया मनसः एव। वस्तुतः आत्मा सर्वेभ्यः एभ्यः विकारेभ्यः परः। भ्रमेण जीवः स्वं पञ्चक्लेशानामास्पदं मन्यते।

अविद्या - अस्मिता - राग - द्वेषाभिनिवेशाः पञ्च सन्ति। यथा- "अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः"[37]

सांख्यदर्शनोक्तानां सिद्धान्तानां प्रवर्तनपथ एव योगदर्शनमिति केचित् विश्वसन्ति। अत एव न्यायवैशेषिकवत् सांख्ययोगयोः समानशास्त्रत्वम् अङ्गीकृतम्। सांख्ये ईश्वरस्यापि अभ्युपगमात् योगदर्शनस्य सेश्वरसांख्यदर्शनमित्यपि नाम। मनसः परिपक्वतालाभाय, तद्वारा पवित्रतां चानेतुं योगशास्त्रे अष्टाङ्गानि प्रतिपादितानि वर्तन्ते तानि तु-

यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणा, ध्यानम्, समाधिः इति। तदुक्तं सूत्रे-

"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि"[38]

यमस्तु पञ्चविधः यथा– "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः"[39]

"शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः"[40]

"स्थिरसुखमासनम्"[41]

"तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः"[42]

"स्वविषयासम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः"[43]

"देशबन्धश्चित्तस्य धारणा"[44]

"तत्र प्रत्ययैकतानता ध्यानम्"[45]

"तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः"[46]

एवं क्रमशः पतञ्जलिना अष्टाङ्गानां लक्षणं प्रोक्तं योगदर्शने।

समाधिस्तु योगस्यान्तिमं सोपानम्। स तु ईश्वरप्रणिधानात् सिद्ध्यति। तदुक्तं "समाधिसिद्धिरीश्वरप्रणिधानात्"[47]

यावत् आत्मनो दर्शनं न भवति तावत् मानवो योगी न भवेत्। अत एव गीतायाम् उक्तम्-

"तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवार्जुन"[48]।।

तादृशः योगिवर्यः एव परमां गतिं प्राप्तुं योग्यो भवति। तदुक्तं गीतायां कृष्णेन-

"प्रयत्नात् यतमानस्तु योगी संशुद्धकिल्बिषः

अनेकजन्मसंसिद्धस्ततो याति परां गतिम्"[49]

सर्वोपरिस्थानं योगी परं प्राप्नोतीति गीतायां सुष्ठु उक्तं वर्तते-

"वेदेषु यज्ञेषु तपःसु चैव

दानेषु यत्पुण्यफलं प्रदिष्टम्।

अत्येति तत्सर्वमिदं विदित्वा

योगी परं स्थानमुपैति चाद्यम्।।"[50]

१.२.३. न्यायदर्शनम्

न्यायदर्शनस्य प्रवर्तकः सूत्रकारो गौतमः। सः क्रिस्तोः पूर्वं पञ्चशततमे वर्षे अजायत। तेन न्यायसूत्राणि प्रणीतानि। प्रमाणप्रमेयाद्याः षोडशपदार्थाः तेन अभ्युपगताः। "प्रमाणप्रमेयसंशयप्रयोजन-दृष्टान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"[51]

शास्त्रस्यास्य पदार्थमीमांसाशास्त्रत्वेन व्यवहारः। सूत्राणामेषां भाष्यं रचितवान् वात्स्यायनः। वात्स्यायनभाष्योक्तानां सिद्धान्तानां तिरस्कारः दिङ्नागेन बौद्धनैयायिकेन "प्रमाणसमुच्चय"नामके ग्रन्थे कृतो वर्तते।

न्यायदर्शनं न्यायं प्रतिपादयति। न्यायस्य अर्थः भवति विभिन्नप्रमाणानां साहाय्यतया वस्तुतत्त्वस्य परीक्षणम्। वात्स्यायनेन उक्तम् यत्–

"प्रमाणैरर्थपरीक्षणं न्यायः"[52] इति। आन्वीक्षिकी इति नाम्नापि शास्त्रमिदं प्रसिद्धं वर्तते। उक्तञ्च न्यायभाष्ये–

"प्रत्यक्षागमाश्रितम् अनुमानं सा अन्वीक्षा अथवा प्रत्यक्षागमाभ्यामीक्षितस्य अन्वीक्षणम्"[53] इति।

प्रत्यक्षानुमानोपमानशब्दाख्यानि प्रमाणानि। तर्कभाषा वदति– "साक्षात्कारिप्रमाकरणं प्रत्यक्षम्"[54] अन्यत्र "इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्" इत्युक्तम्।

प्रत्यक्षप्रमाणेन ज्ञातीकृतेन केनचन लिङ्गेन अर्थस्यावगमनानन्तरं बोद्धा यद् ज्ञानमश्नुते तदेव 'अनुमानम्' इति उच्यते।

अनुमानप्रमाणस्य लक्षणं तु – "लिङ्गपरामर्शोऽनुमानम्"। उक्तञ्च वात्स्यायनेनापि – "मितेन लिङ्गेन अर्थस्य अनु पश्चान्मानमनुमानम्"[56] इति।

उपमानं न्यायदर्शने तृतीयप्रमाणत्वेन स्वीकृतमस्ति। "उपमितिकरणं उपमानम्"। उपमानम् इत्थं परिभाषते हरिभद्रसूरिः–

"प्रसिद्धवस्तुसाधर्म्यादप्रसिद्धस्य साधनम्।

उपमानं समाख्यातं यथा गौर्गवयस्तथा"।।

अन्तिमं प्रमाणं भवति 'शब्दः'। न्यायसूत्रे प्रोक्तं यत् – "आप्तोपदेशः शब्दः"[57]। वस्तुनः यथार्थरूपज्ञाता 'आप्तः इति भण्यते।

नैयायिकानां मते आत्मा प्रतिशरीरं भिन्नः। सः विभुः, अविनाशी, नित्यश्चास्ति।

नैयायिकमते सुखदुःखात्मनोः वृत्योः नाशे जाते मुक्तिरिति विश्वासः। यथा- "सुखदुःखात्मकमनोवृत्योर्नाशे जाते मनः साम्यावस्थां प्रतिपाद्यते, तदा यत्र न दुःखं नापि सुखं तिष्ठति, सैव मुक्तिः।"[58]

नैयायिकाः दुःखस्य आत्यन्तिकीं निवृत्तिं मोक्षं मन्यन्ते। 'दुःखानि हि एकविंशतिसंख्याकानि' इति ते वदन्ति। एतेभ्यः परिपूर्णतया मुक्त्यां सत्यां अपवर्गः लभ्यते। विषयेऽस्मिन् न्यायसूत्रं वदति – "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः"[59]।

पदार्थानां तत्त्वज्ञानात् निःश्रेयसप्राप्तिरिति न्यायमतम्। तत्त्वज्ञानेन निःश्रेयसप्राप्तिं नयति इति कारणात् शास्त्रस्यास्य न्यायः इति नाम सुतरां युज्यते। शास्त्रान्तराण्यपि न्यायशास्त्रम् आश्रयन्ति तदुक्तं वात्स्यायनभाष्ये-

"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता।।"[60]

शास्त्रस्यास्य वादविद्या, तर्कविद्येत्यपि नामान्तरम्। चत्वारि प्रमाणानि अस्य शास्त्रस्य अभिमतानि। यथा प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः इति।

प्रमेयं द्वादशात्मकं भवति। यो अर्थः प्रमीयते तत् प्रमेयम्। ते तावत्

“आत्मा, शरीरम्, इन्द्रियम्, अर्थः, बुद्धिः, मनः, प्रवृत्तिः, दोषः, प्रेत्यभावः, फलम्, दुःखम्, अपवर्गः।”[61] इति।

न्यायशास्त्रप्रवक्ता गौतमः कश्चन भौतिकवादी आचार्यः आसीत्। पश्चात्काले आत्मवादिनः आचार्याः न्यायशास्त्रस्यास्य प्रवक्तारः अभवन्। ते तावत् आत्मवादविषयान् न्यायशास्त्रे योजयामासुः। नव्यन्यायः इति प्रविभागः शास्त्रस्यास्य अस्ति। अस्य न्यायस्य प्रारम्भः गङ्गेशाचार्यात् भवति।

एवं काले गते न्यायविषये खण्डनमण्डनादयः नैयायिकयोः बौद्ध नैयायिकयोः मध्ये बहुप्रचरिताः दृश्यन्ते। ज्ञानादेव तु कैवल्यमिति सर्वदर्शनसिद्धं कार्यम्।

तदुक्तं सर्वदर्शनसङ्ग्रहे-अक्षपाददर्शने “तत्त्वज्ञानाद्दुःखात्यन्तो-च्छेदलक्षणं निःश्रेयसं भवतीति समानतन्त्रेऽपि प्रतिपादितम्।।”[62]

तादृशं शुद्धं ज्ञानं कथं प्राप्यते इति विषयः एव न्यायशास्त्रे उक्तः वर्तते। न्यायशास्त्रे तावत् -“प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ता-

वयवतर्कनिर्णयवादजल्पवितण्डहेत्वाभासच्छलजातिनिग्रहस्थानानां यथार्थज्ञानान्निःश्रेयसाधिगमः"[63] इति न्यायसिद्धान्तः।

न्यायदर्शनम् ईश्वरवादपरम् अस्ति। न्यायसूत्रकारः गौतमः कथयति यत् ईश्वरः जीवकर्मानुरूपं जगत् सृजति। जीवो यादृशं कर्माचरति स तत्कर्मानुकूलमेव फलमपि ददाति। तस्य इच्छाधीन एव सृष्टिः प्रलयश्च। सः सर्वज्ञोऽस्ति।

न्यायशास्त्रस्य शास्त्रीया विवेचनात्मिका रीतिः अत्यन्तं प्रशंसनीया अस्ति। भारतीयदर्शनसाहित्यं एतदर्थं न्यायदर्शनम् आश्रयति। दर्शनस्यास्य बहुतत्त्ववादित्वात् सामान्यविद्वांसः शास्त्रेऽस्मिन् नाधिकं सन्तुष्यन्ति। ईश्वरस्य जगतः निमित्तकारणत्वेन उक्तत्वात् सर्वस्यापि कारणत्वं ते ईश्वरे सन्निवेशयन्ति। यः ईश्वरः उपादानापेक्षी स केन प्रकारेण सर्वशक्तिमान् परमस्वतन्त्रश्च भवितुमर्हतीति प्रश्नः सन्निवेशयन्ति अन्ये शास्त्रज्ञाः। आत्मा न स्वभावतः चेतनः इत्येतदपि तेषां कथनं न युक्तिसहम्। अतः न्यायसिद्धान्तः न सर्वादरास्पदमिति केचित् वदन्ति। तथापि न्यायदर्शनस्य ईश्वरवादः वस्तुतः शिक्षायोग्यः

शान्तिप्रदायकश्च। अतः मानवजीवने इदं शास्त्रम् प्राधान्यम् अर्हति।

१.२.४. वैशेषिकदर्शनम्

भारतीयदर्शनेषु वैशेषिकदर्शनं प्राचीनतमं भवति। महर्षिः कणादः दर्शनस्यास्य प्रवक्ता अस्ति। कणादश्च कश्यपगोत्रे जात इति तत्त्वमङ्गीकृत्य काश्यपसंज्ञयापि व्यवहारः। "ऋषिः कणादः कापोतिं वृत्तिम् अनुतिष्ठन् रथ्यानिपतितान् तण्डुलकणान् आदाय प्रत्यहम् आहारं चकार। अतः सः कणाद इति कणभक्षः इति वा नाम्ना प्रसिद्धिमवाप इति 'सर्वदर्शनसङ्ग्रहे' व्याख्याने वासुदेवशास्त्री-अभ्यङ्करेण लिखितं वर्तते।"[64] कणभुक् (कणशास्त्रज्ञः) कणज्ञानस्वांशीकरणात् कणाद इति संज्ञा।

महाभारतेऽपि अस्य उलूकर्षिरिति संज्ञा अपि प्रदत्ता दृश्यते। नैषधीयेऽपि-

"औलूकमाहुः खलु दर्शनं तत्
क्षमं तमस्तत्त्वनिरूपणाय"[65]

दर्शनसंवेदने निष्णातः सः शास्त्रप्रभुः सूर्यस्य अस्तमयानन्तरमपि संवेदने निरतोऽभवत्। रात्रावपि महात्मनः अस्य कर्मपटुत्वमादाय अभिनन्दनपूर्वम् उलूकसंज्ञया व्यवहारः। रात्रौ उलूकः खलु कर्मपटुः।

पदार्थः इत्यस्य अर्थः भवति तद् वस्तु यस्य बोधः केनापि पदेन जायते। तेन कारणेन अस्मिन् जगति यावन्ति वस्तूनि सन्ति अथवा यानि केनापि नाम्ना व्यपदिश्यन्ते तानि सर्वाणि 'पदार्थाः' इत्युच्यन्ते।

"द्रव्यगुणकर्मसामान्यविशेषसमवायाभावान् वैशेषिकाः पदार्थत्वेन अङ्गीकुर्वन्ति।"[66] वैशेषिकाणां तार्किकेष्वन्तर्भावः। ते श्रुतिं पृथक् प्रमाणत्वेन नाङ्गीकुर्वन्ति।

"शब्दोपमानयोर्नैव पृथक् प्रामाण्यमिष्यते।
अनुमानगतार्थत्वादिति वैशेषिकं मतम्।।"[67]

शब्दोपमाने अनुमानप्रमाणेनैव गतार्थत्वात् न पृथक् परिगणना क्रियते इति तेषां मतम्।

विशेषपदार्थस्वीकारमूलकमेव अस्य दर्शनस्य वैशेषिकमिति नामकरणम्। तदुक्तं सुब्बरायिडु-महाभागेन "सप्तपदार्थेषु

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावास्सप्तपदार्था इति सूत्रकथितेषु मध्ये विशेषनामकपदार्थस्यानिवार्यतया आवश्यकतया विलक्षणतया विशेषतया स्वीकारात् साध्यमानत्वाच्चास्य नामधेयं वैशेषिकदर्शनमिति प्रसिद्धम्"[68]

वैशेषिकसूत्राणि दर्शनस्यास्य प्रमाणभूतानि। "दशभिरध्यायैः ३७० सूत्रैश्च निबद्धमिदं दर्शनम्।'[69]

इच्छा-सुख-दुःखादिकं येन साधनेन प्रत्यक्षं भवति तत् मनः इति कथ्यते। उक्तञ्च–

"सुखाद्युपलब्धिसाधनमिन्द्रियं मनः"[70]

तन्मनः अणुरिति वैशेषिकाणां मतम्। उक्तञ्च भाषापरिच्छेदे-

"साक्षात्कारे सुखादीनां करणं मन उच्यते।
अयौगपद्यात् ज्ञानानां तस्याणुत्वमिहेष्यते"।।

न मनः विभुः। एककाले एकस्यैव विषयस्य ग्राह्यत्वात्।

नित्यमेकमनेकानुगतं सामान्यम् अथवा जातिः। तदुक्तं तर्कभाषायां– "अनुवृत्तिप्रत्ययहेतुः सामान्यम्"[71]। मनुष्याः भिन्नभिन्नाः

चेदपि तेषु 'मनुष्यत्वं' नाम सामान्यम् अनुगतमस्ति।

जगति कार्याणि सर्वाण्यपि परमाणुभिः निर्मीयन्ते इति वैशेषिकाणाम् अभिप्रायः। अत एव एतत् दर्शनं परमाणुवादीति प्रसिद्धं सञ्जातम्।

कणादस्य अभिप्रायः अस्ति यत्– यत्कर्मणो निःश्रेयसलाभोऽभ्युदयश्च भवति सैव 'धर्मः' इति। तदुक्तं सूत्रे–

"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः"[72]

प्रशस्तपादभाष्ये च उक्तम् - "दग्धेन्धनानलवदुपशमो मोक्षः"[73] इति।

प्रशस्तपादेन सूत्राणामेषां भाष्यं कृतं वर्तते। "धर्मविशेषप्रसूतात् द्रव्यगुणकर्म-सामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसाधिगमः"[74] इति वैशेषिकशास्त्रतत्त्वम्।

वैशेषिकाणां विषये एकः आप्तश्लोकः वर्तते। तदुक्तं सर्वदर्शनसङ्ग्रहव्याख्याने-

“द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे।

यस्य न स्खलिता बुद्धिस्तं वै वैशेषिकं विदुः।।”[75]

अनेन वैशेषिकाः विभागं विभागजन्यं मन्यन्ते इति वयं ज्ञातुं शक्नुमः।

द्रव्याश्रयाः गुणाः। किन्तु इमे स्वयं न गुणाश्रयाः। भावोऽयं द्रव्यं गुणमाश्रित्य तिष्ठति परं गुणो गुणमाश्रित्य न तिष्ठति।

कणादः रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग विभाग-परत्वापरत्वबुद्धि-सुख-दुःखेच्छाद्वेषप्रयत्नान् सप्तदशगुणान् उल्लिखति। प्रशस्तपादो गुरुत्व-द्रवत्व-स्नेह-संस्कार-धर्माधर्मशब्दाख्यान् सप्त गुणान् अन्यांश्च उल्लिखति, इत्थं चतुर्विंशतिगुणाः सन्ति। नैयायिक-वैशेषिकयोर्मध्ये गुणविषयकाः केचन मतभेदाः प्राप्यन्ते। नो चेत् उभावपि सहमतौ इति प्रतीतिः।

१.२.५. मीमांसादर्शनम् (पूर्वमीमांसा)

मीमांसादर्शनमपि प्राचीनं दर्शनम्। वेदसंहितायाम्, उपनिषत्सु, ब्राह्मणेषु च दर्शनस्यास्य सूचना वर्तते। कौषीतकि-ब्राह्मणे

मीमांसाशब्दः कण्ठतः उक्तः वर्तते। "उदिते होतव्यमनुदिते होतव्यमिति मीमांसन्ते"[76] इति।

कर्मकाण्डविषयकान् सिद्धान्तान् नानायुक्तिभिः प्रतिपाद्य कर्मकाण्डं परिपुष्णाति मीमांसादर्शनम्। मीमांसा इति इदं पदं जिज्ञासार्थक 'मान' धातोः 'मानेर्जिज्ञासायां' इति वार्तिकेन निष्पाद्यते। अत एवोक्तं शास्त्रस्यास्य प्रयोजनमधिकृत्य कुमारिलभट्टेन श्लोकवार्तिके "धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्"[77] इति।

वेदानामपौरुषेयत्वम् अधिकृत्य मीमांसादर्शनस्य इदम् अभिधानम् - वर्णो नित्यः। श्रूयमाणो ध्वनिः केवलं तदभिव्यक्तिः। शब्दो नित्यः। अर्थेन सहैव शब्दस्य स्वाभाविकः सम्बन्धः। यत्र शब्दस्तत्र अर्थः। यत्र अर्थः तत्र शब्दः। मीमांसासूत्रे उक्तम्–

"औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः"[78] इति।

एवं वेदस्य नित्यशब्दसमूहात्मकत्वात् तस्य नित्यत्वं सिद्ध्यति।

मीमांसादर्शनव्याख्यानसमये डा. रमेशचन्द्रशुक्लेनोक्तं यत्- "एतस्मिन् लोके कृतं कर्म अदृष्टशक्तिं प्रादुर्भावयति। सा हि 'अपूर्वम्'

इति नाम्ना विख्याता अस्ति। यथासमयं सा अदृष्टशक्तिः (अपूर्वम्) फलति"[79]।

डा. रमेशचन्द्रशुक्लः प्रबन्धरत्नाकरे वदति यत्– प्रपञ्च-सम्बन्धिविलयो मोक्षः इति मीमांसा वदति। त्रेधा हि प्रपञ्चः पुरुषं बध्नाति भोगायतनं शरीरं, भोगसाधनानि इन्द्रियाणि, भोग्याः शब्दादयो विषयाः। अस्य त्रिविधस्य बन्धस्य आत्यन्तिकः विलयो मोक्षः"[80] इति।

शब्दनित्यता, ईश्वरानङ्गीकारश्च शास्त्रस्य अस्य विशेषता। शास्त्रस्यास्य द्वादशाध्यायात्मकः शबरस्वामिविरचितः भाष्यग्रन्थः वर्तते। शास्त्रेऽस्मिन् आचार्यानुसारेण मतत्रयं वर्तते (१) कुमारिलभट्टमतम् (२) प्रभाकरगुरुमतम् (३) मिश्रमतम् च ख्यातम्।

मीमांसकाः वेदस्य ईश्वरसृष्टत्वं न अङ्गीकुर्वन्ति। किन्तु अपौरुषेयत्वम् अङ्गीकुर्वन्ति। वेदस्तु ज्ञानस्य भण्डागारः। ये सनातनस्य ज्ञानस्य द्रष्टारः ते ऋषयः। ज्ञानस्य नित्यत्वात् विद्यमानानां तेषां परम् उपलब्धिः ऋषिभिः साधितः वर्तते। जन्तुहिंसादयः मन्त्राणां कुत्सितव्याख्यानेन संजाताः। अतः न प्रामाणिकाः। तदुक्तं शान्तिपर्वणि महाभारते-

"सुरा मत्स्याः पशोर्मांसं

द्विजातीनां बलिस्तथा।

धूर्तैः प्रवर्तितं यत्र

नैतद् वेदेषु कथ्यते।।"[81]

मीमांसादर्शने मांसाशनं सुष्ठु निषिद्धं वर्तते यथा-

"मांसपाकप्रतिषेधश्च तद्वत्"[82]

"मांसपाको विहितप्रतिषेधः स्यादाहुतिसंयोगात्"[83]

सामान्यतया दर्शनानि विविधानां सिद्धान्तानाम् आकराः। एवं भिन्नानि दर्शनानि जीवः, ईश्वरः, कर्म, दृश्यप्रपञ्चः इत्यादीन् विषयानधिकृत्य भिन्नान् आशयान् प्रकटयन्तो वर्तन्ते। किन्तु मीमांसादर्शनाचार्यः जैमिनिमहर्षिः उपर्युक्तान् विषयानधिकृत्य परोक्षसूचनाः परं प्रददाति। प्रत्यक्षतः ते विषयाः चर्चाविषयत्वेन न स्वीकृताः। यज्ञानुष्ठानविषयः एव तस्य मुख्यः चर्चाविषयः अतः केचन पाश्चात्याः नूतनसिद्धान्ताः शास्त्रे-अस्मिन् न दृश्यन्ते इत्यतः नेदं शास्त्रमिति अभिप्रयन्ति। किन्तु नायमभिप्रायः योग्यः। यज्ञानां लक्ष्यं किम्? के

यज्ञाधिकारिणः? यज्ञद्रव्यानधिकृत्य वैदिकविधयः के? यज्ञे कानि मुख्याङ्गानि? एते विषयाः अस्मिन् शास्त्रे चर्चाविषयाः। एवमपि धर्मान्वेषणं करोति इत्येव तेन महात्मना शास्त्रे प्रथमतः उक्तं वर्तते। यथा "अथातो धर्मजिज्ञासा।"[84] अतः मीमांसाशास्त्रं धर्मान्वेषणपरं शास्त्रमिति प्रथा।

मीमांसकानां मतं संक्षेपेण इत्थं वक्तुं शक्यते – तेषां मते ईश्वरो नास्ति, जगतः नित्यत्वम्, वेदस्य अपौरुषेयत्वं नित्यत्वञ्च, जीवनलक्ष्यं धर्मार्थकाममोक्षाः, धर्मः- चोदनालक्षणः चोदनेति विधायकं वाक्यम्, यजेतेत्यादि। चोदनालक्षणं - ज्ञापकम्, चोदनालक्षणः अर्थः, धर्मः वेदप्रतिपाद्यः, धर्मः प्रयोजनवत् अर्थः, कर्मफलम् अपूर्वरूपेण तिष्ठतीति ते विश्वसन्ति। अर्थात् कर्मजन्यं स्वर्गादिफलजनकम् 'अपूर्वः' इति।

मीमांसा वस्तुतः यज्ञहोमादिवैदिकानुष्ठानानां तात्त्विकविवेचनाय बहून् सिद्धान्तान् आविश्चकार ते सर्वेऽपि महत्त्वयुक्ताः भवन्ति।

१.३. वेदान्तदर्शनम् (उत्तरमीमांसा)

उत्तरमीमांसासंज्ञया प्रथितमिदं वेदान्तदर्शनं शारीरिकमीमांसा इति संज्ञया अपि व्यवह्रियते। बादरायणप्रणीतं ब्रह्मसूत्रमेव उत्तरमीमांसान्तर्गतानां अखिलवेदान्तग्रन्थानाम् आधारः। वैदिकसाहित्यचयेषु अवसाने वर्तन्त इत्यतः वेदान्तर्गतविज्ञानस्य उपनिषदः अपि वेदान्तसंज्ञया व्यवहारः। ताः साकल्येन ब्रह्मविद्यां बोधयन्ति।

लोकतत्त्वान्वेषणपरम्परासु अत्युत्कृष्टमिदं वेदान्तदर्शनं परमपुरुषार्थस्वरूपमोक्षोपाय प्रतिपादनब्रह्मज्ञानप्राप्तिपरम्, उत्तरमीमांसा इति अपरनाम्नापि प्रसिद्धमेव।

उपनिषद्वचनानां सरलया रीत्या अवबोधाय भगवान् श्रीवेदव्यासः ब्रह्मसूत्रनामकं ग्रन्थं व्यरचयत्। इदं "ब्रह्मसूत्रम्" एव वेदान्तदर्शनस्य अथवा उत्तरमीमांसायाः प्रामाणिको ग्रन्थः।

ब्रह्मसूत्रं चतुर्लक्षणसमन्वितम् प्रथमं समन्वयलक्षणम्। तत्र सर्वेषां वेदान्तवाक्यानां ब्रह्मणि समन्वयः उपपत्तिभिः प्रदर्शितः। अविरोधलक्षणे द्वितीयेऽध्याये सांख्यादितर्कविरोधस्य निराकरणं प्रदर्शितम्। साधनलक्षणो

नाम तृतीयेऽध्याये वैराग्यादि मोक्षसाधनानि विरचितानि। फललक्षणः चतुर्थोऽध्यायः तत्र मोक्षस्वरूपविचारः कृतः"[85]।

श्रीशङ्करभगवत्पादैः सम्पोषितम् अद्वैतवेदान्तदर्शनं वेदान्तदर्शनेषु प्रामुख्यं भजते। तत्र सर्वेषां वेदान्तवाक्यानां परमं तात्पर्यं जीवब्रह्मैक्यमेवेति सुष्ठु उपपादितम्। श्रीशङ्कराचार्येण अद्वैतमतं वेदान्तसूत्राणां, भगवद्गीतायाः, उपनिषदां च व्याख्यानैः सुदृढं व्यवस्थापितम्। वस्तुतः अद्वैत-द्वैत-विशिष्टाद्वैत-शुद्धाद्वैत-भेदाभेदवादैः सम्पोषितं सर्वेषु दर्शनेषु प्रप्रधानं भवति वेदान्तदर्शनमिति केषाञ्चित् विदुषाम् अभिप्रायः।

यदा 'वेदान्तः' इति पदं श्रूयते तदा अद्वैतवेदान्तस्यैव भानं मनसि जायेत, तथापि विशिष्टाद्वैतद्वैतप्रभृतय अपि वेदान्ता एव। "अपरोक्षानुभूतिः"-विमर्शनात्मकम् अध्ययनम् इति ग्रन्थे डा. सी. ए. षैला महाभागा सूचयति यत् "मीमांसा कर्मणि रज्यति अत एव "अथातो धर्मजिज्ञासा" इत्यारभ्यते। तदाशयप्रतिपादकः श्लोकः यथा–

कर्तव्यं श्रुतितो विदन्ति मनुजाः कृत्वा लभन्ते सुखं

निर्दिष्टा श्रुतिरेव मानमपरं तत्सम्मतं मन्यते।

मुक्तौ साधनमिष्टकामरहितं कर्माग्निहोत्रादिकं

नो ईशो न चित्तवृत्तिरमला ज्ञानं न मीमांसकः”[86]।। इति।

महावाक्यानां पठनन्तावत् भिन्नानां अद्वैत-द्वैत-विशिष्टाद्वैत दर्शनप्रविभागानां आधारेण कर्तव्यं वर्तत इत्यतः तदर्थं यत्नं करिष्ये।

१.३.१. श्रीशङ्कराद्वैतवेदान्तवादः

अद्वैतवेदान्तपरिणामकालविषये द्वौ प्रविभागौ स्तः। प्रथमः शङ्करपूर्वकालः। द्वितीयस्तु शङ्करोत्तरकालः इति। शङ्करोत्तरकालवेदान्ते कर्मविषये महत्त्वपूर्णं स्थानं प्रदत्तं दृश्यते। शङ्करवेदान्तकाले ज्ञानस्य महत्त्वपूर्णं स्थानं प्रदत्तं दृश्यते। शङ्करपूर्वकाले अवैदिकदर्शनानां वैदिकदर्शनानां मिथः सङ्घर्षः आसीत्। शङ्करोत्तरकाले यद्यपि तादृशः सङ्घर्षः समाप्तः तथापि अद्वैतद्वैतयोः न्यायदर्शनाद्वैतदर्शनयोश्च सङ्घर्षः विद्यते स्म। अतः वैष्णवाचार्याः शङ्करं ‘प्रच्छन्नबौद्ध’ इति उक्तवन्तः। तद्रीत्या ते

ब्रह्मवादेन शून्यवादस्य समानताञ्च प्रख्यापितवन्तः। एवं श्रीशङ्करस्य मायावादस्य स्थानं बौद्धमहायानप्रस्थाने च ते दर्शितवन्तः शङ्करोत्तराद्वैतवेदान्तिनः शङ्करे आरोपितं प्रच्छन्नबौद्धतां निरसितुं प्रभवन्ति स्म। शून्यवादे 'नेति नेति' निषेधमार्गः इति अन्वयमार्गः इति भेदञ्च युक्तितया ते प्रदर्शितवन्तः।

आचार्यशङ्करेण रचितेषु भाष्यग्रन्थेषु शारीरिकभाष्यं, बृहदारण्यकोपनिषद्भाष्यं, श्रीमद्भगवद्गीताभाष्यं च महत्त्वविषये सर्वातिशायि वर्तते। उक्तेषु भाष्यत्रयेऽपि शारीरिकभाष्यं नितान्तमौलिकतां वहति। रामानुजमध्वौ शारीरिकभाष्यस्य खण्डनं कृतवन्तौ। पद्मपादः, वाचस्पतिमिश्रः, सर्वज्ञात्मा, चित्सुखाचार्यः, आनन्दगिरिः, गोविन्दानन्दः, अनुभूतिस्वरूपाचार्याश्च शङ्करभाष्यस्य मण्डनं कृतवन्तो दृश्यन्ते।

भाष्यस्य अस्य वाचस्पतिमिश्रस्य भामती, अमलानन्दस्य कल्पतरु, गोविन्दानन्दस्य रत्नप्रभा, सर्वज्ञात्मनः संक्षेपशारीरकं इत्यादयो अतिमहत्त्वपूर्णाः ग्रन्थतल्लजाः। टीकोपरि टीकाः अपि लिखिताः दृश्यन्ते, येन विवादानां मतभेदानाम्, कोलाहलः जनितो दृश्यते।

श्रीशङ्कररचितस्य बृहदारण्यकोपनिषद्भाष्यस्य महत्त्वं महात्मनः शिष्यभूतस्य सुरेश्वराचार्यस्य बृहदारण्यकोपनिषद्भाष्यवार्तिकनामकस्य बृहद्ग्रन्थस्य महत्त्वमाश्रित्य वर्तते। सुरेश्वराचार्यकृतेऽस्मिन् ग्रन्थे आनन्दगिरिकृतटीका सुवर्णकुम्भस्य तिलकवत् शोभते। शङ्करमतमनुसृत्य ब्रह्मणः लक्षणद्वयमस्ति। ते तटस्थलक्षणस्वरूपलक्षणे। तटस्थलक्षणस्य निरूपणं "जन्माद्यस्य यतः" इत्यस्मिन् वर्तते। आशयस्तु ब्रह्म तत् तत्त्वं भवति, यत् जगतः उत्पत्तिः स्थितिः तथा लयस्य च कारणं भवति। शङ्करमतमनुसृत्य ब्रह्मणः ज्ञानं अनुमानेन न लभ्यते। किन्तु तत् स्तुत्या भवति। ब्रह्मणः स्वरूपलक्षणं "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यस्मिन् वर्तते। आशयस्तु ब्रह्म सत्यं, ज्ञानं, अनन्तं च अथवा आनन्दश्च सच्चिदानन्दः।

पूर्वोक्ते ब्रह्मणः लक्षणद्वये मतभेदो वर्तेते। लक्षणद्वयात् ब्रह्मणः द्वैविध्यमस्ति वा इति प्रथमः संशयः। लक्षणभेदेन लक्ष्यभेदोऽस्ति वा इति द्वितीयः संशयः। अद्वैतवेदान्तविरोधिनः अद्वैतवेदान्तस्य सगुणब्रह्म, निर्गुणब्रह्मरूपं ब्रह्मद्वयमस्तीति आक्षेपं प्रकटयन्ति। नेदं तथ्यम्। शङ्करमतानुसारेण "जन्माद्यस्य यतः" इत्यस्य अर्थः आनन्दस्वरूपं

ब्रह्मेति। “आनन्दादेव सृष्टिस्थितिलयाः” सम्भवन्ति। इत्थं सच्चिदानन्दं ब्रह्मेत्यायाति। निष्कर्ष्य विचारे कृते ब्रह्म एव आनन्द इति प्रतिभाति। इत्थं विचारे कृते स्वरूपलक्षणं तटस्थलक्षणं च न विरुद्धमिति आयाति। अत एव ब्रह्मणः एकत्वं अद्वितीयत्वञ्च। तत् ब्रह्म सत् चित् तथा आनन्दो भवति। चिदानन्दौ न गुणार्थकौ। अपि तु तद्रूप एव। तद्रूपत्वेऽपि चिदानन्दौ सतः न अधिकौ भवतः, न वा न्यूनौ भवतः। सदिति पूर्णतायाः पर्यायः।

किञ्च सतः, चितः, आनन्दस्य च कः सम्बन्धः? एषु कस्य मुख्यत्वम्? कस्य गौणत्वम्? विषयेऽस्मिन् मतभेदाः, वर्तन्ते। एकेषां मते सत् ब्रह्म भवति, चित् ब्रह्म भवति आनन्दोऽपि ब्रह्म भवति। अन्येषां मते सदुपरि चित् अधिकं व्यापकम्। तथा चिदुपरि आनन्दः अधिकः व्यापकः। अपरेषां मते सत् चित् आनन्दश्च केवलस्य ब्रह्मणः सङ्केताः। उपर्युक्तानि कार्याणि यद्यपि ब्रह्मणः स्वरूपं प्रकाशयन्ति तन्निष्ठगुणस्य प्रकाशकानि न भवन्ति। गुणस्तु अनुभवैकगम्यो भवति। केषाञ्चित् मते सच्चिदानन्दरूपाः त्रयः शब्दाः निषेधात्मकार्थकाः। तथा च सत् इत्यस्य असत् नेति चित् इत्यस्य ब्रह्म अचित् नेति। तथा

आनन्द इत्यस्य ब्रह्म, दुःखं नेति। उक्तनिषेधं त्रयद्वारा सच्चिदानन्दशब्दाः एकस्य तथ्यस्य परं विवरणं कुर्वन्ति।

वस्तुतस्तु एषां शब्दानाम् अभिधात्मकत्वं नास्ति। किन्तु एते लक्षणात्मकाः। अत्र लक्षणापदेन जहदजहल्लक्षणायाः स्वीकारः। अतः ब्रह्म सद्भवति तथापि सतः अतिरिक्तोऽपि। ब्रह्म आनन्द एव, तथापि आनन्दाद् किञ्चित् अतिरिक्तमपि। इत्थंभूतस्य ब्रह्मणः विभुत्वात्, नित्यत्वात् देशकालनिमित्तात् अपरिच्छिन्नं भवति। तस्य यथातथवर्णनम् असाध्यं भवति।

एकः प्रश्नः अस्मिन् विषये अवशिष्यते। ब्रह्म ज्ञातं वा? अज्ञातं वा? यदि ज्ञातम् इति स्वीक्रियते वेदान्तदर्शनस्य निरर्थकत्वमापद्येत। यदि अज्ञातम् इति स्वीक्रियते तत्र जिज्ञासा न भविष्यति। एवमपि वेदान्तदर्शनं निरर्थकं स्यात्। अवतारितस्य प्रश्नस्य अस्य समाधानं शाङ्करवेदान्ते वर्तते। ब्रह्मणः आत्मस्वरूपत्वात् तद् ब्रह्म ज्ञातमेव। सर्वेषां आत्मनः आत्मानं प्रति प्रतीतिर्भवत्येव। किन्तु इयं प्रतीतिः निर्विशेषस्वरूपेण भवति। तस्य विशेषस्वरूपस्तु अज्ञात एव वर्तते।

अज्ञातस्य तस्य अवबोधाय दर्शनानि यत्नं कुर्वन्ति। अतः वेदान्ताः सार्थकाः।

सर्वेऽपि प्राणिनः स्वसत्तायां विश्वसन्ति सुदृढतया। न कोऽपि जीवः य आत्मा स्वसत्तायां संशयीत। अतः एव आचार्यः ब्रह्मसूत्रभाष्ये प्राह–

"सर्वो हि आत्मास्तित्वं प्रत्येति, न नाहमस्मीति। यदि हि नात्मत्वप्रसिद्धिः स्यात् सर्वो लोको नाहमस्मीति प्रतीयात्"[87]

श्रीशङ्कराचार्यस्य अद्वैतवेदान्तदर्शनं केवलं ब्रह्मैव सत्यं जगत्तु मिथ्येति उद्घोषयति। तदुक्तम् आचार्येण–

"श्लोकार्धेन प्रवक्ष्यामि कथितं ग्रन्थकोटिभिः।
ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः"।।

ब्रह्मणः अस्तित्वे श्रुतिमेव प्रमाणत्वेत अङ्कीकुर्वन्ति शङ्करमतानुयायिनः। किञ्च स्वानुभूत्या ऋषयः ब्रह्मणः साक्षात्कारं कृतवन्तः। "अयमात्मा ब्रह्म" "अहं ब्रह्म भवामि" "अहं ब्रह्मास्मि"

इत्यादयः श्रुतयः ऋषीणां ब्रह्मसाक्षात्कारत्वे प्रमाणतया वर्तन्ते। अयमात्मा स्वयंसिद्धे भवति। न केनापि ज्ञानोपाधिना वृत्या वा तस्य ज्ञानं सिद्धं भविष्यति। आत्मा सर्वव्यापी भवति, विभुर्भवति, ब्रह्म भवति निरपेक्षः "सद्" भवति।

आत्मसत्ता सर्वमपि अभिव्याप्य तिष्ठति। सा सत्ता नामरूपदेशकालाद्युपाधिना भिन्नभिन्नेव भूत्वा अवभासते। कठोपनिषदि समानार्थप्रतिपादिका श्रुतिः द्रष्टुं शक्यते। यथा–

"यदेवेह तदमुत्र यदमुत्र तदन्विह।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति"[88]।।

"अग्निर्मथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च"[89]।।

वेदान्तदर्शने मायासंज्ञकमेकं तत्त्वं वर्णितमस्ति। शङ्करमतानुसारेण आत्मनः भिन्ना या प्रतीतिः वर्तते सा माया। श्रीशङ्कराचार्यः वदति यत् माया भगवतो ब्रह्मणोऽव्यक्तशक्तिरस्ति। सा च अविद्यारूपिणी, त्रिगुणा। तस्याः आदिः न ज्ञायते। सैव जगदिदमुत्पादयति–

“अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका या।

कार्यानुमेया सुधियैव माया यया जगत् सर्वमिदं प्रसूयते”[90]।।

मायायाः अनिर्वचनीयत्वमाह आचार्यः इत्थम्–

सन्नाप्यसन्नाप्युभयात्मिका नो

भिन्नाप्यभिन्नाप्युभयात्मिका नो।

साङ्गाप्यनङ्गाप्युभयात्मिका नो

महाद्भुतानिर्वचनीयरूपा”[91]।।

अस्याः मायायाः आवरणविक्षेपरूपे द्वे शक्ती स्तः। विषयेऽस्मिन् दृग्दृश्यविवेके प्रोक्तं। यथा–

“शक्तिद्वयं हि मायाया विक्षेपावृतिरूपकम्।

विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत् सृजेत्।।

अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः।

आवृणोत्यपरा शक्तिः सा संसारस्य कारणम्”[92]।।

इयं माया स्वप्नात् भिन्ना। जाग्रदवस्थायां स्वप्नस्य मिथ्यात्वं ज्ञायते। किन्तु, मायायाः मिथ्यात्वं स्वप्नावस्थायां, जाग्रदवस्थायां च

सिद्धं न भवति। मायायाः मिथ्यात्वम् आत्मज्ञाने सञ्जाते परं वार्यते। आत्मज्ञानरूपा अवस्था तत्त्वज्ञानिनां परं सुलभा। सामान्यजनाः मायापाशेन बद्धा वर्तन्ते। अतः ते जनाः अध्यासग्रस्ताः। अध्यासः मायाहेतुज इति प्रकारान्तरेण वक्तुं शक्यते। अस्य अध्यासस्य निवारणे कृते मायायाः निवारणम् अपि स्वतः भविष्यति। अयमध्यासः अविद्यापरपर्याया। अतः अविद्यायाः निराकरणे ब्रह्मसाक्षात्कारः।

ईश्वरः जगतः उपादानकारणं निमित्तकारणञ्चास्तीति अद्वैतवेदान्तदर्शनस्य सिद्धान्तः। मुण्डकोपनिषदः श्रुतिः। यथा–

"यदा पश्यः पश्यते रुक्मवर्णं।
कर्तारमीशं पुरुषं ब्रह्मयोनिम्।।"[93]

ब्रह्मसूत्रेऽपि– "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्"[94] इति सूत्रेण अयमेवाशय इति आचार्यः।

आचार्यः शङ्करः जीवमधिकृत्य वदति यत्– "अस्ति आत्मा जीवाख्यः शरीरेन्द्रियपञ्जराध्यक्षः कर्मफलसम्बन्धीति"[95] इति।

दृश्यमानः शरीरस्वरूपः न पारमार्थिकः आत्मा परं पारमार्थिकः। शरीरिणः यथा आत्मस्वरूपम् अवगच्छन्ति तथा संसारबन्धनात् मुक्तो भवति। वस्तुतस्तु आत्मनः अवबोध एव मोक्षः। जीविनः अज्ञानवशात् इदं तथ्यं न जानन्ति। अतः ते अनात्मतत्त्वे तिष्ठन्ति। मोक्षाय यो न प्रयतते सः आत्महा इति आचार्यमतम्। तदुक्तम्–

"यस्त्वात्ममुक्तौ न यतेत मूढधीः
स ह्यात्महा स्वं विनिहन्त्यसद्ग्रहात्"[96]।।

मोक्षः ब्रह्मतत्त्वस्य ज्ञानादेव भवितुमर्हति। पञ्चदशी वदति–

"मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा।
स्वप्रबोधं विना नैव स्वस्वप्नो हीयते यथा"[97]।।

आत्मब्रह्मणोः ऐक्यं उक्तमस्ति नैष्कर्म्यसिद्धिः नाम्नि ग्रन्थे। यथा–

"सामानाधिकरण्यं च विशेषणविशेष्यता
लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम्।।"[98]

एवं शङ्करमतानुसारेण आत्मज्ञानस्य प्राप्तिः, तद्वारा अज्ञाननिवृत्तिश्च मोक्षाय उपकरोति। आत्मज्ञानप्राप्तिः अज्ञाननिवृत्तिः इत्येतयोर्मध्ये कस्य कारणत्वं कस्य कार्यत्वमिति विवेचना कृता न दृश्यते। अस्तङ्गतकार्यकारणजं ज्ञानं ब्रह्मज्ञानम्। तत्र कार्यकारणविचिन्तनस्य अवकाशो नास्ति इति वक्तव्यं मे प्रतिभाति। उक्तमस्ति छान्दोग्योपनिषद्भाष्ये आचार्येण मोक्षस्वरूपमधिकृत्य।

श्रीशङ्करस्य पाण्डित्यपूर्णव्यक्तित्वे आदरमादाय बहवः अनुयायिनः महद्ग्रन्थानां प्रणयनं कुर्वन्ति स्म। अस्मिन् पथि अन्तर्भूतेषु आचार्येषु मण्डनमिश्रः, सुरेश्वरः, पद्मपादः, प्रकाशात्मा, वाचस्पतिमिश्रः, श्रीहर्षः, चित्सुखः, आनन्दगिरिः, विमुक्तात्मा, अमलानन्दः, रामाद्वयः, विद्यारण्यः, नृसिंहाश्रमः, ब्रह्मानन्दः, अप्पय्यदीक्षितः, मधुसूदनः, प्रभृतयः, महान्तः पण्डिताः ग्रन्थकर्तारश्च विद्यन्ते।

१.३.२. श्रीशङ्करोत्तरवेदान्तवादाः

१.३.२.१. विशिष्टाद्वैतदर्शनम्

शङ्करोत्तरवेदान्ते विशिष्टाद्वैतवादिनः रामानुजस्य महत् स्थानमस्ति। विशिष्टाद्वैत-सम्प्रदायस्यास्य श्रीसम्प्रदायनाम्ना व्यवहारो वर्तते।

रामानुजाचार्यकृतस्य ब्रह्मसूत्रभाष्यस्य नाम भवति 'श्रीभाष्यम्'। भाष्यस्यास्य संज्ञामाश्रित्य आविर्भूतोऽयं सम्प्रदायः 'श्रीसम्प्रदायः' इति अन्वर्था संज्ञा। श्रीभाष्यं भवति विशिष्टाद्वैतवादस्य आधारग्रन्थः। प्रायेण वैष्णवाः अस्य प्रस्थानस्य अनुयायिनः। वैष्णवैः तैः स्वीकृतानां सिद्धान्तानां व्यवहारेण साकं 'श्री'पदस्यापि व्यवहारः क्रियते।

रामानुजाचार्यस्य मते चित्, अचित्, ईश्वरः इति त्रीणि मूलतत्त्वानि स्वीकृतानि दृश्यन्ते।

एषु त्रिषु ईश्वरः अङ्गी, अन्ये द्वे अङ्गे च। ईश्वरः चिद्विशिष्टः। चिदचितौ ईश्वराङ्गे। अतः रामानुजस्य ईश्वरः इति एकं तत्त्वं परम् अवशिष्यते। इदानीं रामानुजमतमपि अद्वैतवत् प्रतिभाति इति केचित् वदन्ति। तन्न युक्तम्, शङ्कररामानुजयोः विचिन्तने भेदो वर्तत एव। शङ्करमते ब्रह्मणः अखण्डत्वम्। तत्र चितः अचितः च भेदः न वर्तते।

ईश्वरः प्रत्यक्षेण साधयितुं न शक्यते। अर्थात् अयमीश्वरः लौकिकप्रत्यक्षस्य विषयो न भवति। यामुनाचार्येण 'सिद्धित्रयाख्ये स्वीये

ग्रन्थे ईश्वर सिद्धिप्रकरणे ईश्वरसिद्धिः आगमेनैव भवतीति प्रतिपादितम्। यथा–

"व्यवस्थितमितस्वार्थं न तावदिह लौकिकम्।

साधनं तेन सर्वार्थतज्ज्ञानादेरसिद्धितः"[99]।।

यतीन्द्रमतदीपिकायां श्रीनिवासदासः वदति जीवविषये यथा– "चेतनत्वं ज्ञानाश्रयत्वम् आत्मत्वं शरीरप्रतिसम्बन्धित्वम्। कर्तृत्वं सङ्कल्पज्ञानाश्रयत्वम्। स च देहेन्द्रियमनःप्राणादिभ्यो विलक्षणः"[100] इति।

रामानुजमते त्रीणि प्रमाणानि अङ्गीकृतानि। तदुक्तं यतीन्द्रमतदीपिकायाम्। यथा–

"तानि प्रमाणानि प्रत्यक्षानुमानशब्दाख्यानि त्रीणि"[101]।

शङ्करोत्तरवेदान्तिषु वैष्णवावतारत्वेन स्वीकृताः द्वादशपण्डिताः अपि वर्तन्ते। ते तावत् विष्णुचित्तः, आण्डालः कुलशेखरः, विप्रनारायणः, मुनिवाहनः, पोयगः, भूततालवारः, पेयालवारः,

भक्तिसारः, नीलनः, मधुरकविः, शठकोपः च। अन्येऽपि आचार्याः अस्मिन् गणे अन्तर्भूताः विद्यन्ते।

अद्वैतं परं परमार्थमिति अद्वैतवेदान्तिनः। किन्तु भक्त्यर्थभावितं द्वैतम् अद्वैतादपि सुन्दरं वर्तते। भक्तिरसार्णवे उक्तमस्ति–

"पारमार्थिकमद्वैतं द्वैतं भजनहेतवे।

तादृशी यदि भक्तिः स्यात् सा तु मुक्तिशताधिका।।

तथा 'भक्त्यर्थभावितं द्वैतमद्वैतादपि सुन्दरम्' इति।

द्वैतमूलिकां भक्तिम् अद्वैतवेदान्तिनः आहार्यज्ञानसंज्ञया व्यवहरन्ति।

१.३.२.२. द्वैतदर्शनम्

द्वैतदर्शनस्यास्य वक्ता श्रीमध्वाचार्यः। 'आनन्दतीर्थनाम्ना, 'पूर्णप्रज्ञनाम्ना' च महाशयोऽयं प्रसिद्धः।

पूर्णप्रज्ञमते द्रव्यं, गुणः, कर्म, सामान्यं, विशेषः, अभावः, विशिष्टः, अंशी, शक्तिः, सादृश्यमिति दशपदार्थाः सन्ति। परमात्मा सर्वज्ञः, सर्वद्रष्टा, सर्वस्रष्टा च। लक्ष्मीः पत्नी च। ब्रह्मादयः पुत्राः।

श्रीदुर्गादयः लक्ष्म्याः मूर्तिभेदाश्च। मुक्तियोग्यः, तमोमयः, नित्यसंसारी इति भेदत्रयं जीवस्य।

मध्वाचार्येण प्रस्थानत्रयस्य भाष्यं लिखितं वर्तते। मध्वभाष्यस्य व्याख्या जयतीर्थेन कृता वर्तते। प्रस्थानेऽस्मिन् व्यासतीर्थस्य न्यायामृतमपि मौलिको ग्रन्थः। भक्तिः कर्म च मोक्षसाधने इति आचार्यस्य अभिप्रायः। उपनिषद् विद्यायाः अध्ययनं जीवात्मानं परमात्मानं नयतीति आचार्यस्य विश्वासः। इयं विद्या जन्ममरणादीनां उपद्रवाणां नितान्तनाशाय प्रभवति। संसारबीजभूतायाः अविद्यायाः तज्जनितसंस्कारस्य च नाशः विद्यया अनया सिद्ध्यति। अतः उपनिषद्विद्या परात्मविद्या भवति। उपनिषद्भाष्यविषये मध्वाचार्यः इतरव्याख्यातृन् अपेक्ष्य आत्मनः प्रभावं प्रकटयति। ऐतरेयोपनिषदः अध्यायत्रयाय परं व्याख्यानम् अन्यैः आचार्यैः लिखितं दृश्यते। किन्तु ऐतरेयस्य मध्वस्य व्याख्यानं उपनिषदं साङ्गोपाङ्गम् आवहति।

माण्डूक्योपनिषद्मध्ये दृश्यमानाः कारिकाः गौडपादप्रणीताः इति अन्ये आचार्याः आमनन्ति। किन्तु रामानुजमध्वाचार्यौ तादृशं विश्वासं

विहाय ताः कारिकाः उपनिषदः भागत्वेन स्वीकुरुतः।

गद्यरूपेण लब्धं प्रमाणलक्षणनामकं पुस्तकं यद्यपि लघुग्रन्थः तथापि विषयप्राधान्यात् महत्तमं भवति। कथालक्षणं नाम पुस्तकं श्लोकरूपे निबद्धं वर्तते। कथालक्षणं तु शास्त्रचर्चायां अवश्यं स्वीकरणीयान् नियमान् व्यवस्थाविशेषांश्च प्रतिपादयति। ग्रन्थेऽस्मिन् पञ्चविंशतिश्लोकाः विद्यन्ते। श्रुतिस्मृतिपुराणादिषु कृतिषु यानि आचारानुष्ठानानि कथितानि तानि कृष्णामृतमहार्णवः, तन्त्रसारसंग्रहः, सदाचारस्मृतिः, जयन्तीनिर्णयः यतिप्रणवकल्पः, न्यासपद्धतिः, तिथिनिर्णयप्रभृतिषु ग्रन्थेषु सुतरां प्रतिपादितानि वर्तन्ते। नरसिंहनखस्तुतिः, द्वादशस्तोत्राणि प्रभृतीनि पुस्तकानि स्तुतिविभागे अन्तर्भवन्ति। बाल्यकाले कन्दुकक्रीडां प्रति रचितः 'कन्दुकस्तुति'नामकः लघुग्रन्थश्च आचार्यविरचितो दृश्यते। उक्तानां लघुग्रन्थानाम् उपरि महात्मना अनेन विरचितं प्रस्थानत्रयभाष्यं तेन विरचितेषु ग्रन्थेषु मध्ये सर्वातिशायि वर्तते।

द्वैतमते द्विविधं तत्त्वं स्वतन्त्रपरतन्त्रभेदात्। तदुक्तं "तत्त्वविवेके"-

“स्ततन्त्रं परतन्त्रं च द्विविधं तत्त्वमिष्यते।

स्वतन्त्रो भगवान्विष्णुर्निर्दोषोऽशेषसद्गुणः”[102]।।

हरेः सर्वोत्तमत्वमेव श्रीमन्मध्वाचार्येण संस्थापितं बहुभिः प्रमाणैः - यथा

“यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व तद्ब्रह्म”[103]

“ईशावास्यमिदं सर्वम्”[104]

एष सर्वेषु भूतेषु गूढो आत्मा न प्रकाशते”[105]

“अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय।।

मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव”[106]

“यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।

अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः”[107]।।

श्रीमन्मध्वाचार्यः विष्णुरेव परब्रह्मेति श्रुतिस्मृत्यादिभिः स्पष्टीकरोति।

यथा–

अग्निर्वै देवानामवमो विष्णुः परमः"[108]

"तद् विष्णोः परमं पदम्"[109]

"परं पदं वैष्णवमामनन्ति"[110]

"द्रव्यं कर्म च कालश्च स्वभावो जीव एव च।
वासुदेवात्परो ब्रह्मन् न चान्योऽर्थोऽस्ति तत्त्वतः"[111]।।

"विभुत्वात् विष्णुरुच्यते"[112]

"विश प्रवेशने धातुस्तत्र स्नुप्रत्ययादनु।
विष्णुर्यः सर्ववेदेषु परमात्मा सनातनः"[113]।।

"ब्रह्मशब्दश्च विष्णावेव"[114]

श्रीमध्वाचार्यः जगतः सत्यत्वं श्रुतिबलेन स्वकीयग्रन्थेषु संस्थापयति। यथा–

"विश्वं सत्यम्"[115]

"यच्चिकेत सत्यमित् तन्न मोघम्"[116]

"कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्।

व्यवधाच्छाश्वतीभ्यः समाभ्यः"[117]।।

"प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।

विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान्"[118]

भेदवादी मध्वाचार्यः "तत्त्वतो भेदः" इति वाक्येन भेदत्त्वं स्पष्टीकरोति। तद्यथा–

"भेदस्तु स्वरूपदर्शन एव सिद्धः। प्रायः सर्वतो विलक्षणं हि पदार्थस्वरूपं दृश्यते"[119]

आचार्येण पञ्चविधो भेदः स्पष्टतया निरूप्यते। यथा–

जीवेशयोर्भिदा चैव जीवभेदः परस्परम्।

जडेशयोर्जडानां जडजीवभिदा तथा[120]।।

जीवगणाः अथवा जीवात्मानः हरेः (विष्णोः) अनुचराः अर्थात् सेवकाः इति द्वैतमतम्। यथा–

"तद्विजिज्ञासस्व तद् ब्रह्म"[121]

हरिरेव जीवेभ्यः मोक्षप्रदायक इति आचार्यमतम्।

“नायमात्मा प्रवचनेन लभ्यो

न मेधया न बहुना श्रूतेन।

यमेवैष वृणुते तेन लभ्य-

स्तस्यैष आत्मा विवृणुते तनूं स्वाम्”[122]।।

ब्रह्मसूत्रभाष्येऽपि उक्तं यथा–

“बलमानन्द ओजश्च सहो ज्ञानमनाकुलम्।

स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विभोः”[123]।।

अमला भक्तिरेव मोक्षस्य साधनम्। तदुक्तम् आचार्येण महाभारत तात्पर्यनिर्णये। यथा–

माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः।

स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा”[124]।।

मोक्षसाधनभूतायाः भक्तेः प्राधान्यं अनुव्याख्याने आचार्यः सूचयति। यथा–

भक्त्या ज्ञानं ततो भक्तिः ततो दृष्टिस्ततश्च सा।

ततो मुक्तिस्ततो भक्तिः सैव स्यात्सुखरूपिणी"[125]।।

श्रीमद्भगवद्गीतागतान् श्लोकानपि आचार्यः प्रमाणत्वेन दर्शयति। यथा-

"भक्तास्तेऽतीव मे प्रियाः"[126]

"मां च योऽव्यभिचारेण भक्तियोगेन सेवते।

स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते"[127]।।

"भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः"[128]।

प्रमाणत्रयमेव आचार्यस्य सम्मतम्। तत्तु प्रत्यक्षम्, अनुमानम्, आगमश्च। प्रमाणलक्षणे एषां लक्षणं प्रोक्तं यथा–

"निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षम्। निर्दोषोपपत्तिरनुमानम्। निर्दोषः शब्दः आगमः"[129]।

१.३.२.३. भेदाभेददर्शनम्

शङ्करोत्तरवेदान्तपण्डितेषु भास्कराचार्यस्य भेदाभेदप्रवर्तकस्य महत् स्थानमस्ति। अस्य भेदाभेददर्शनमत्यन्तं श्रद्धेयं भवति।

अश्मरथ्यः, औडुलोमिः इत्येतौ आचार्यौ भेदाभेददर्शनस्य उपज्ञातारौ। दर्शनमिदं जनसामान्यमध्ये आनेतुं भास्कराचार्यः विजयी बभूव। दर्शनचिन्तायाः अस्याः 'ज्ञानकर्मसमुच्चयः' इत्यपरनाम्ना प्रथा अस्ति। अस्मिन् विभागे अन्तर्भूतानाम् अन्येषाम् आचार्याणां ग्रन्थाः इतः पर्यन्तं लब्धाः। अश्मरथ्यस्य, औडुलोमेः च नाम ब्रह्मसूत्रे उद्धृतं वर्तते। तादृशेषु अतिप्राचीनेषु ग्रन्थेषु भास्कराचार्यः न परामृष्टो दृश्यते। अतः भास्कराचार्यः न दर्शनविभागस्य अस्य प्रवक्ता अपितु व्याख्याता परम्।

मुक्तिलाभाय न ज्ञानं परं पर्याप्तं, कर्म अपि अनिवार्यमिति तस्य अभिप्रायः। संसारावस्थायां जीवात्मपरमात्मनोः भेदो वर्तते। मुक्तावस्थायां तु तत्र भेदो नास्ति। अतः जीवात्मपरमात्मनोः भेदो वर्तते, न वर्तते च। अत एव भास्कराचार्यदर्शनस्य भेदाभेदसंज्ञया व्यवहारः।

अद्वैतभेदाभेदयोः दर्शनयोः मुख्यभेदस्तु जगतः अस्तित्वनास्तित्वविषये वर्तते। अद्वैते जगतः मिथ्यात्वम्। भास्करस्तु ब्रह्मणः जगतश्च अस्तित्वमङ्गीकरोति।

१.३.२.४. द्वैताद्वैतदर्शनम्

द्वैताद्वैतदर्शनस्य निम्बार्कवेदान्तसंज्ञया व्यवहारः। भागवतपुराणे हंसरूपेण ईश्वरः सनकाय धर्मोपदेशं दत्तवानिति कथितं वर्तते। सनकः कुमाराय, कुमारः नारदाय च धर्मोपदेशं दत्तवान्। अयं नारद एव निम्बार्कस्य गुरुः। ईश्वरः हंसरूपं स्वीकृत्य दर्शनस्य उपदेशं दत्तवान् इति कार्यमादाय सम्प्रदायस्यास्य हंससम्प्रदाय नाम्ना अपि व्यवहारः। वस्तुतः भास्करस्य वेदान्तदर्शनात् दर्शनस्यास्य परमार्थतः भेदो नास्ति।

१.३.२.५. शुद्धाद्वैतदर्शनम्

वल्लभाचार्यः शुद्धाद्वैतदर्शनस्य प्रवक्ता। 'पुरुषोत्तमप्रस्थान-रत्नाकरः' दर्शनस्यास्य मुख्यः ग्रन्थः। यद्यपि श्रीशङ्करस्य सिद्धान्तम् अनुसरति वल्लभः तथापि सृष्टिप्रक्रियाम् अधिकृत्य स्वाभिप्रायं प्रकटयति सः। अस्मिन् विषये सः श्रीशङ्करानुयायी न भवति। तस्मादेव कारणात् अद्वैतदर्शनात् दर्शनस्यास्य भिन्नतां द्योतयितुं शुद्धाद्वैतदर्शनसंज्ञया व्यवहारः।

परामर्शाः

1. केनोपनिषद् - 1-1

2. केनोपनिषद् - 1-3

3. निरुक्तम् - 3-2

4. बृहदारण्यकोपनिषद् - 2-4-5

5. श्रीमद्भगवद्गीता - 10-32

6. ऋग्वेदः - म-10, सू-191, ऋक्-2

7. छान्दोग्योपनिषद् - अ-6, खण्डः-8, मन्त्रः-7

8. सांख्यकारिका - श्लोकः-1

9. भारतीयतत्त्वचिन्तासारः - पुटसंख्या - 19

10. भारतीयतत्त्वचिन्तासारः - पुटसंख्या - 19

11. न्यायमञ्जरी - संस्कृतसाहित्येतिहासः - पुटसंख्या - 192

12. सर्वदर्शनसंग्रहः - पुटसंख्या - 19

13. भारतीयतत्त्वचिन्तासारः - पुटसंख्या - 20

14. सर्वदर्शनसंग्रहः - पुटसंख्या - 19

15. सर्वदर्शनसंग्रहः - पुटसंख्या - 19

16. संस्कृतसाहित्येतिहासः - पुटसंख्या - 193

17. संस्कृतसाहित्येतिहासः - पुटसंख्या - 193

18. व्याकरणमहाभाष्यम् - प्रथमाध्यायः - पस्पशाह्निकम् - पुटसंख्या - 18

19. वाल्मीकिरामायणम् - अयोध्याकाण्डम् - सर्गः-108

20. भारतीयतत्त्वचिन्तासारः - पुटसंख्या-28

21. प्रबन्धरत्नाकरः - पुटसंख्या - 143

22. भारतीयतत्त्वचिन्तासारः - पुटसंख्या - 27

23. प्रबन्धरत्नाकरः - पुटसंख्या - 128

24. मानमेयोदयः - मानभागः (प्रमाणानि) श्लोकः-3

25. माध्यमिककारिका - 2-15

26. माध्यमिककारिका - 18-5

27. महाभारतम् - संस्कृतसाहित्येतिहासः - पुटसंख्या - 199

28. विष्णुसहस्रनामशाङ्करभाष्यम् - प्रबन्धरत्नाकरः - पुटसंख्या - 75

29. सांख्यकारिका - 2-15

30. सांख्यकारिका - 9

31. सांख्यदर्शनम् - 1-1-10, 1-1-136

32. सांख्यकारिका - 17

33. सांख्यकारिका - 18

34. सांख्यकारिका - 21

35. सांख्यदर्शनम् - 3-65

36. योगदर्शनम् - 1-7

37. योगदर्शनम् - 2-3

38. पातञ्जलयोगदर्शनम् - साधनपादः - सू-29

39. योगदर्शनम् - 2-30

40. योगदर्शनम् - 2-32

41. योगदर्शनम् - 2-46

42. योगदर्शनम् - 2-49

43. योगदर्शनम् - 2-54

44. योगदर्शनम् - 3-1

45. योगदर्शनम् - 3-2

46. योगदर्शनम् - 3-3

47. योगदर्शनम् - 2-45

48. श्रीमद् भगवद्गीता - 6-46

49. श्रीमद् भगवद्गीता - 6-45

50. श्रीमद् भगवद्गीता - 8-28

51. न्यायदर्शनम् - 1-1-1

52. सवात्स्यायनभाष्यं गौतमीयन्यायदर्शनम् - पुटसंख्या - 3

53. सवात्स्यायनभाष्यं गौतमीयन्यायदर्शनम् - पुटसंख्या - 3

54. तर्कभाषा - पुटसंख्या - 5

55. तर्कभाषा - पुटसंख्या - 8

56. सवात्स्यायनभाष्यं गौतमीयन्यायदर्शनम् - पुटसंख्या - 8

57. न्यायदर्शनम् - 1-1-7

58. संस्कृतसाहित्येतिहासः - पुटसंख्या - 198

59. न्यायदर्शनम् - 1-1-2

60. सवात्स्यायनभाष्यं गौतमीयं न्यायदर्शनम् प्रथमाध्यायः–
प्रथमाह्निकम् अभिधेयप्रयोजनसम्बन्धप्रकरणम् पुटसंख्या - 5

61. सवात्स्यायनभाष्यं गौतमीयं न्यायदर्शनम् - 1-1-9

62. सर्वदर्शनसंग्रहः - पुटसंख्या - 371

63. सवात्स्यायनभाष्यं गौतमीयं न्यायदर्शनम् - 1-1-1

64. सर्वदर्शनसंग्रहः - पुटसंख्या - 333

65. नैषधीयचरितम् - 22-35

66. तर्कसङ्ग्रहः - पदार्थविभागः

67. भाषापरिच्छेदः - पुटसंख्या - 140

68. सर्वदर्शनसमन्वयः - वैशेषिकनामकरणम् - पुटसंख्या - 8

69. संस्कृतसाहित्येतिहासः - पुटसंख्या - 196

70. तर्कसंग्रहः - पुटसंख्या - 15

71. तर्कभाषा - पुटसंख्या - 29

72. वैशेषिकदर्शनम् - 1-1-2

73. प्रबन्धरत्नाकरः - पुटसंख्या - 126

74. संस्कृतसाहित्येतिहासः पुटसंख्या - 197

75. सर्वदर्शनसङ्ग्रहः - पुटसंख्या - 349

76. संस्कृतसाहित्येतिहासः - पुटसंख्या - 200

77. मीमांसालोक - प्राङ्मुख - पुटसंख्या - 5

78. मीमांसादर्शनम् - 1-1-5

79. प्रबन्धरत्नाकरः - पुटसंख्या - 115

80. प्रबन्धरत्नाकरः - पुटसंख्या - 117

81. महाभारतम् - शान्तिपर्व

82. मीमांसादर्शनम् - 12-2-2

83. मीमांसादर्शनम् - 12-2-6

84. मीमांसादर्शनम् - 1-1-1

85. सर्वदर्शनकौमुदी - पुटसंख्या - 128

86. अपरोक्षानुभूतिः - विमर्शनात्मकमध्ययनम् - पुटसंख्या - 6

87. ब्रह्मसूत्रभाष्यम् - 1-1-1

88. कठोपनिषद् - 1-4-10

89. कठोपनिषद् - 1-5-9

90. विवेकचूडामणिः - 110

91. विवेकचूडामणिः - 111

92. अपरोक्षानुभूतिः - विमर्शनात्मकमध्ययनम् - पुटसंख्या - 11

93. मुण्डकोपनिषद् - 3-1-3

94. ब्रह्मसूत्रभाष्यम् - 1-1-1

95. अपरोक्षानुभूतिः - विमर्शनात्मकमध्ययनम् - पुटसंख्या - 32

96. विवेकचूडामणिः - 4

97. अपरोक्षानुभूतिः - विमर्शनात्मकमध्ययनम् - पुटसंख्या - 21

98. नैष्कर्म्यसिद्धिः - 3-3

99. सिद्धित्रयम् ईश्वरसिद्धिप्रकरणम् - पुटसंख्या - 2

100. यतीन्द्रमतदीपिका - अष्टमोऽवतारः - पुटसंख्या - 102, 103

101. यतीन्द्रमतदीपिका - प्रथमोऽवतारः - पुटसंख्या - 8

102. तत्त्वविवेकः - 1

103. तैत्तिरीयोपनिषद् - 3-1

104. ईशावास्योपनिषद् - 1

105. कठोपनिषद् - 1-3-12

106. श्रीमद् भगवद्गीता - 7-6

107. श्रीमद् भगवद्गीता - 15-18

108. ऐतरेयब्राह्मणम् - 1-1

109. कठोपनिषद् - 1-3-9

110. भागवतम् - 2-2-18

111. भागवतम् - 2-5-14

112. कूर्मपुराणम् - 48-11

113. वराहपुराणम् - 72-5

114. ब्रह्मसूत्रम् - 1-1-1

115. ऋग्वेदः - 2-24-6

116. ऋग्वेदः - 10-55-6

117. ईशावास्योपनिषद् - 8

118. श्रीमद् भगवद्गीता - 13-19

119. विष्णुतत्त्वविनिर्णयः प्रथमपरिच्छेदः (सर्वमूलग्रन्थाः) - पुटसंख्या - 94

120. महाभारततात्पर्यनिर्णयः - 1-70

121. तैत्तिरीयोपनिषद् - 3-1

122. कठोपनिषद् - 2-23

123. ब्रह्मसूत्रभाष्यम् - 2-3-31

124. महाभारततात्पर्यनिर्णयः - 1-86

125. अनुव्याख्यानम् - 3-2-25

126. श्रीमद् भगवद्गीता - 12-20

127. श्रीमद् भगवद्गीता - 14-26

128. श्रीमद् भगवद्गीता - 18-68

129. प्रमाणलक्षणम् (सर्वमूलग्रन्थाः) - पुटसंख्या - 3, 4

द्वितीयोऽध्यायः
महावाक्यानां सामान्यविचारः स्वरूपकथनं च

२.१. महावाक्यानां सामान्यस्वभावः

महावाक्यचतुष्टयं नियतक्रमसहितं भवति। मोक्षपथप्रदर्शकं च । इदानीं महावाक्यसमीक्षायाः पूर्वं तेषां सामान्यस्वभावः विवरणं च विस्तरणीयं वर्तते।

"अयमात्मा ब्रह्म" प्रभृतीनि चतुर्महावाक्यानि उपनिषदः उद्धृतानि वर्तन्ते। महावाक्यमिति श्रुते सामान्यजनानां मनसि कस्यचित् अति दीर्घवाक्यस्य अवबोधः सञ्जायेत। किन्तु महावाक्यानां तत्त्वं वाक्यघटनां, वाक्यदैर्घ्यतां वा नाश्रयति। वेदान्तविचिन्तने आत्मनः परं परमतत्त्वेन भानम्। लोके तत्त्वेषु आत्मतत्त्वं परं महत्त्वं, बृहत्त्वं च साकल्येनावहति। अत्र अनन्तस्य अज्ञातस्य अवर्णनीयस्य आत्मतत्त्वस्य गांभीर्यं निवेदयितुं अल्पाक्षरयुक्तपदस्य अन्वेषणे वेदान्तिनः "महच्छब्दं प्रापुः। अत एव तैः आत्मतत्त्वस्वरूपस्य आत्यन्तिकतत्त्वस्य प्रतिपादकं वाक्यं महावाक्यसंज्ञया स्वीकृतं दृश्यते।

“ब्रह्मात्मैक्यावगतेः प्रतिपादकानि भवन्ति चत्वारि महावाक्यानि” इति केचन वदन्ति।

महावाक्यानि आकारेण स्वतः न पूर्णानि वाक्यानि। तानि उपनिषन्मन्त्रवाक्ये अन्तर्भूतानि वर्तन्ते। वस्तुतः तानि, वाक्यांशाः भवन्ति। तावन्मात्रांशस्य पृथक्करणे कृतेऽपि ते अंशाः सम्पूर्णवाक्यताम् आपादयन्तीति महते आश्चर्याय भवति।

२.२. महावाक्यानां पाठक्रमः

सर्वाणि महावाक्यानि ब्रह्मज्ञानपराणि भवन्ति। महावाक्यान्तर्भूतानि वाक्यचतुष्टयं सर्वं ब्रह्मज्ञानपरमित्यतः तेषां पृथक् अस्तित्वाय प्रमाणम् अन्वेषणीयं वर्तते। तद्रीत्या विचिन्तने कृते अस्य वाक्यचतुष्टयस्य वैशिष्ट्यार्थः क इति निर्णेतव्यः। केन महावाक्येन किं कार्यं साधकं प्रति उपदिशति इत्येतदपि निर्णेतव्यं वर्तते। तथा च माण्डूक्योपनिषत्स्थम् “अयमात्मा ब्रह्म”[1] इति महावाक्यमेव प्रथमतः परीक्षामहे। साधकाय ब्रह्मज्ञानोपदेशः गुरुणा यदा आरभ्यते तदा शिष्याय प्रथमतः कश्चन विषयनिर्देशः प्रदातव्यः। संवेदनविषयस्तावत् आत्मनिष्ठं कथनं भवति। तस्मात् प्रथममेव विषयनिर्देशस्य अवकाशः।

महावाक्यान्तर्भूतेषु उपनिषद्वाक्येषु "अयमात्मा ब्रह्म" इति माण्डूक्योपनिषदि अन्तभूर्तं महावाक्यं ब्रह्मज्ञानसंवेदनविषये निर्देशवाक्यतां प्राप्नोति। अर्थत् "अयमात्मा ब्रह्म" इति महावाक्येन ऋषिणा ब्रह्मज्ञानसंवेदनाय निर्देशः प्रदीयते इति आयाति।

पूर्वं अपरिचितस्य पठनविषयरूपेण स्वीकरणीयस्य विषयस्य निर्देशे कृते तत्र तस्य स्वरूपज्ञानाय आकाङ्क्षायाः उद्गमनं इत्येतद् स्वाभाविकम्। शिष्यस्य मनोगतम् अवगम्य निर्देशवाक्यघटकस्य ब्रह्मणः स्वरूपस्य उपदेशो भवति "प्रज्ञानं ब्रह्म"[2] इति ऐतरेयोपनिषद्घटकं महावाक्यम्।

"अयमात्मा ब्रह्म" इति माण्डूक्योपनिषद्भागीनमहावाक्येन वस्तुनिर्देशः, 'प्रज्ञानं ब्रह्म' इति ऐतरेयोपनिषदन्तर्भूतेन महावाक्येन ब्रह्मस्वरूपकथने कृते तत् ब्रह्मस्वरूपं कुत्र? इति एका जिज्ञासा साधकमनसि भविष्यति इत्येतद् स्वाभाविकम्। इमाम् अवस्थाम् अवगम्य आचार्यः ब्रह्म कुत्र वर्तते? इति उपदिशति शिष्यम्। स उपदेशः एव "तत्त्वमसि"[3] इति महावाक्यम्। 'तत्त्वमसि' इति महावाक्यस्य उपदेशे स्वीकृते अस्य प्राप्तिः कथमिति पुनरपि अत्र

जिज्ञासा। जिज्ञासायाः अस्याः परिहारः शिष्यं 'ब्रह्माभिन्न इति' बोधयितुम् आचार्यः यतते। ब्रह्मणा शिष्यस्य अपृथक्त्वमेव ब्रह्मज्ञानम् नान्यत् किञ्चित्। तदेतदादाय ब्रह्माभिन्नविषयतां शिष्ये अन्तर्भावयति "अहं ब्रह्मास्मि"[4] इति तस्य मनसि सञ्जातेन प्रज्ञानेन। अत एव अन्त्यस्य महावाक्यस्य "अहं ब्रह्मास्मि" इत्यस्य अनुभववाक्यमिति प्रथा।

चत्वारीमानि वाक्यानि परं कुतो महावाक्यत्वेन स्वीकृतानि?। अन्यास्वपि उपनिषत्सु तत्तुल्यानि वाक्यानि न सन्ति किम्।? प्रभूततया वर्तन्त एव। किन्तु तेषाम् इह अपरिगणना न रोचते। उक्तमहावाक्यानि अतिक्रम्य तत्तुल्ययोग्यार्थकथनम् अन्येषु महावाक्यसदृशेषु न वर्तते। तथापि एकदेशविकृतस्य महावाक्यस्य महावाक्यानां साधर्म्यार्थप्रतिपादनं स्यात्। अत एव तेषां सङ्कलनम् **एकैकस्य महावाक्यस्य समीक्षायाः अन्ते दीयते।** तदर्थं बह्व्यः उपनिषदः परिगणिताः।

उपनिषत्सु विद्यमानेषु "अयमात्मा ब्रह्म" "प्रज्ञानं ब्रह्म", "तत्त्वमसि", "अहं ब्रह्मास्मि" प्रभृतीनां परं महावाक्यसंज्ञा इति निर्णयः आत्यन्तिकतया युक्तो न प्रतिभाति। उक्तानां महावाक्यानां तद्रीत्यां

स्थित्वा तानि औपनिषदानि अन्यानि वाक्यान्यपि महावाक्यरीत्या सूचयतीति प्रतीतिः। तस्मात् कारणात् उक्तस्य वाक्यचतुष्टयस्य आधिकारिकं पठनं यदि पूर्णतया अभिलषति तर्हि आकारविषये, आशयविषये च तुल्यानां साधर्म्ययुक्तानां अन्येषाम् उपनिषद्वाक्यानां च सञ्चयनं कृत्वा तत्तन्महावाक्येन साकं विशकलनीयं वर्तते। अतः यद्यपि तादृशानि उपनिषद्वाक्यानि जगद्गुरूणां भाष्येषु नान्तर्भवन्ति तथापि सामान्येन पठितव्यानि वर्तन्ते। अतः प्रथमतया अष्टोत्तरशतोपनिषदः तादृशानां वाक्यानां समाहरणं कृत्वा नातिविस्तरेण तत्तन्महावाक्येन साकं गवेषणबुद्ध्या पठितव्यं वर्तते। इदं कर्म महावाक्यचतुष्टयस्य विशकलने न किञ्चिदपि न्यूनतां करोति अपि तु सम्पुष्टिं ददात्येव।

"अयमात्मा ब्रह्म" "प्रज्ञानं ब्रह्म", "तत्त्वमसि", "अहं ब्रह्मास्मि" इति वाक्यचतुष्टयस्य महावाक्यत्वमधिकृत्य पूर्वं किञ्चिदुक्तं खलु। अत्र अन्यानि कानिचन कार्याण्यपि विचिन्तनीयानि वर्तन्ते।

२.३. महावाक्यानां सार्थकता

१) के महात्मानः प्रथमतः एतानि वाक्यानि महावाक्यत्वेन परिगणयामासुः?

(२) तस्यां परिगणनायां यत्किञ्चित् वैशिष्ट्यम् अन्तर्गततया वर्तते वा? किं नाम ब्रह्मेति? किं ब्रह्मस्वरूपम्? तद् प्रज्ञानं भवति। तद् साधके अन्तर्हितं वर्तते। तादृशेन ब्रह्मणा सह साधकस्य आत्यन्तिकः लयः। एतानि कार्याणि उपर्युक्तेषु महावाक्येषु अन्तर्हितानि वर्तन्ते। ब्रह्मणः बोधः, तस्य स्वरूपज्ञानम्, तस्य औपाधिकम् आस्थानम्, तस्मिन् आत्यन्तिकः लयश्च यथा प्राप्यते तथा साधकः तस्मिन् विलीनो भूत्वा तदेव जायते। इह कथितस्य अस्य महावेदान्ततत्त्वस्य समस्तमपि तत्त्वम् उक्ते वाक्यचतुष्टये निगुम्फितं वर्तते। तानि वेदान्ततत्त्वस्य साकल्येन प्रतिफलनं कुर्वन्ति। अत एव तानि महावाक्यानि सञ्जातानि। न केनापि ऋषिवर्येण महावाक्यलेखने विचारितं वर्तते इति प्रतिभाति। अनेके ऋषिपुंगवाः तपश्चर्यया वेदान्ततत्त्वं प्रति, तस्य प्राप्तिं प्रति च उपनिषद्वाक्यद्वारा वाचालाः अभवन्। तेषु आधिक्येन यानि जाज्वल्यमानानि दृष्टानि तान्येव महावाक्यनाम्ना पश्चात्काले प्रथितानि। पश्चात्काले ये उपनिषदः पठितवन्तः ते भिन्नाभ्यः उपनिषद्भ्यः एतानि वाक्यानि महावाक्यत्वेन पृथक्कृतवन्तः। महावाक्यस्य प्रादुर्भावः इत्थं समजनीति

ज्ञायते। असंख्यासु उपनिषत्सु विद्यमानेषु वाक्येषु येषु सूक्ष्मं औपनिषदं वेदान्ततत्त्वं वर्तते तेषां कृत्स्नमपि स्वरूपं अन्यूनानतिरिक्तरीत्या केवले वाक्यचतुष्टयेऽस्मिन् अन्तर्हितं क्रियते। एतद् ज्ञात्वा आश्चर्यचकिताः आचार्याः, ऋषयश्च पश्चात्काले महावाक्यसंज्ञया एतानि व्यवहृतवन्तः। एवम् आनुषङ्गिकतया उपनिषद्वाक्येभ्यः सङ्कलितानि एतानि वाक्यानि वेदान्तविचिन्तनस्य साकल्यतामुपयान्ति। महावाक्यानामाविर्भावः इहोक्तरीत्या स्पष्टीकर्तुं शक्यते।

महावाक्यमधिकृत्य डा. टि.एन्.एन्. भट्टतिरिप्पाट्महोदयेन मलयालभाषायां लिखिते लघुग्रन्थे महावाक्यानां क्रमः वेदक्रमानुसारेण लिखितः दृश्यते। यथा-

'प्रज्ञानं ब्रह्म'	ऋग्वेदः
'अहं ब्रह्मास्मि'	यजुर्वेदः
'तत्त्वमसि'	सामवेदः
'अयमात्मा ब्रह्म'	अथर्ववेदः

महावाक्यस्वरूपमनुसृत्य तेषां क्रमः यथा-

‘अयमात्मा ब्रह्म’	माण्डूक्योपनिषद्
‘प्रज्ञानं ब्रह्म’	ऐतरेयोपनिषद्
‘तत्त्वमसि’	छान्दोग्योपनिषद्
‘अहं ब्रह्मास्मि’	बृहदारण्यकोपनिषद्

महावाक्यानि सिद्धार्थबोधकानि। वेदान्तवाक्यानि इत्यपि एषां संज्ञा। ब्रह्मात्मैक्यसूचकानि अनेकानि वेदान्तवाक्यानि उपनिषत्सु दृष्टानि तथापि एषु चतुर्षु महावाक्येषु चतुर्णां परं यथार्थतया महावाक्यव्यवहारः। एषु महावाक्येषु “अयमात्मा ब्रह्म” इति महावाक्यं जीवात्मपरमात्मनोः अपरोक्षत्वं सूचयति। किञ्च स्वरूपसाक्षात्कारेऽपि इदं वाक्यं सूचनां ददाति। महावाक्येषु द्वितीयं वाक्यं भवति “प्रज्ञानं ब्रह्म” इति। इदं वाक्यं जीवब्रह्मणोः लक्षणवाक्यं भवति। तृतीयं महावाक्यं तु “तत्त्वमसि” इति। इदं वाक्यं गुरूपदेशपरं भवति। शिष्यस्य अज्ञानकल्मषापनोदनाय, तस्यैव ब्रह्मत्वावबोधनाय च। “अहं ब्रह्मास्मि” इति चतुर्थं महावाक्यम्। इदं महावाक्यं तत्त्वावबोधानन्तरं शिष्ये सञ्जातम् अनुभवविशेषं बोधयति।

एषां महावाक्यानां स्वरूपावबोधः केवलेन वाच्यार्थेन न कदापि सिद्ध्यति। तस्मात् कारणात् कदाचित् वाच्यार्थं विहाय लक्ष्यार्थः स्वीकरणीयो वर्तते। प्रसङ्गमनुसृत्य वाच्यार्थलक्ष्यार्थयोः भेदश्च विवरणीयः वर्तते। वाच्यार्थो यथा - शक्तं पदम्, शक्यो अर्थः शक्तिवृत्त्या लब्धः अवबोधः शक्यार्थः। वाच्यार्थ इति शक्यार्थस्य अस्य अपरं नाम। घटः इति श्रुते कपालद्वयसंयोगविशिष्टस्य वस्तुविशेषस्य अवबोधः। अयमवबोधः वाच्यार्थजः।

लक्ष्यार्थो यथा - शक्तिवृत्या यदि पदार्थज्ञानं न सिद्ध्यति तर्हि तत्र लक्ष्यार्थमादाय परिहारः कर्त्तव्यः इति आचार्याः अभिप्रयन्ति। मुख्यार्थबाधे लक्षणा इति तेषां मतम्। तथा च मुख्यार्थेन अर्थबोधाननुभववेलायां वाच्यार्थं विहाय तेन सम्बद्धः अन्यार्थस्य स्वीकारः लक्षणावृत्तिः। एवं शक्तिवृत्तिः, लक्षणावृत्तिश्चेति वृत्तिद्वयं अस्तीत्यायाति। 'गङ्गायां घोषः, इत्युदाहरणम्। गङ्गामध्ये घोषस्य अवर्तनात् 'गङ्गायां घोषः' इत्यत्र मुख्यार्थावबोधस्य बाधा। अतः लक्षणया अत्र गङ्गापदस्य गङ्गातीरमित्यर्थः स्वीक्रियते। लक्षणायाः अस्याः जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा इति त्रैविध्यं

वर्तते। वाच्यार्थं त्यक्त्वा वाच्यसम्बन्धिनः अन्यस्य अर्थस्य स्वीकार एव जहल्लक्षणा। लक्षणायाः कृते दत्तं 'गङ्गायां घोषः' इति उदाहरणमेवात्र स्वीकरणीयम्। उदाहरणस्यास्य गङ्गायां गोपग्राम इति बोधः। अयमर्थः न साधु। गङ्गा सर्वदा स्यन्दनं कुर्वती वर्तते। तत्र ग्रामस्य स्थितिः, असम्भवा एव। अतः गङ्गायाः वाच्यार्थं परित्यज्य गाङ्गायाः तीरे स्थितः गोपानां ग्रामः इत्यर्थः स्वीक्रियते। अतः 'गङ्गायां घोषः' इत्युदाहरणं वाच्यार्थत्यागस्य लक्ष्यार्थस्वीकारस्य च।

अजहल्लक्षणा यथा - वाच्यार्थस्य त्यागं विना वाच्यार्थेन सम्बद्धस्य अन्यस्य अर्थस्य स्वीकार एव अजहल्लक्षणा। उदाहरणतया "श्वेतो धावति" इति। अत्र श्वेतवर्णयुक्तः अश्वः धावतीत्येव अर्थः। श्वेतः गुणविशेषः। अत्र श्वेतरूपं गुणं त्यक्त्वा "श्वेतवर्णगुणयुक्तः" अश्वः इति स्वीकृते अर्थः युक्तो भवति। केवलस्य श्वेतस्य धावनं कदापि न सम्भवति खलु।

अर्थस्य किञ्चिदंशपरित्यागः किञ्चिदंशपरिरम्भणं च क्रियते तर्हि तत्र जहदजहल्लक्षणा। लक्षणायाः अस्याः भागत्यागलक्षणा इत्यपि नाम। अत्रोदाहरणम् - "अयं स रामः" पूर्वस्मिन् काले देशान्तरे यम्

अपश्यत् स एव इदानीम् अस्मिन् देशे अस्माभिः दृश्यते। पूर्वस्थलकालस्य वर्तमानस्य स्थलकालस्य च वस्तुतया अत्र प्रसक्तिर्नास्ति। तयोः उपेक्षायां 'रामः' परं शिष्यते तथा 'अयं रामः' इत्यर्थलाभः सिद्ध्यति। अस्यैव परं प्राधान्यं खलु 'तत्त्वमसि' प्रभृतीनां महावाक्यानाम् अर्थलाभः इमां जहदजहल्लक्षणाम् आश्रित्यैव।

२.४. शुकरहस्योपनिषदि महावाक्यानां स्वरूपम्

शुकरहस्योपनिषदि महावाक्यचतुष्टयस्य प्रतिपादनं वर्तते। तत्र महावाक्यानां ऋग्यजुस्सामाथर्वाणां वेदानां क्रमम् आश्रित्य वर्तते। तद्रीत्या महावाक्यानां रेखाचित्रं यथा-

महावाक्यम्	वेदः	उपनिषत्
१. प्रज्ञानं ब्रह्म	ऋग्वेदः	ऐतरेयोपनिषद्
२. अहं ब्रह्मास्मि	यजुर्वेदः	बृहदारण्यकोपनिषद्
३. तत्त्वमसि	सामवेदः	छान्दोग्योपनिषद्
४. अयमात्मा ब्रह्म	अथर्ववेदः	माण्डूक्योपनिषद्

वेदानां पौर्वापर्यक्रममनुसृत्य कृतं रेखाचित्रं साधुतां भजते। संहितायाः महत्तमं प्राधान्यं अस्त्येव। अतः तत्रत्यं क्रमम् अनुसृत्यैव

शुकरहस्योपनिषदि चर्चा कृता वर्तते। संहिताकालानन्तरं खलु ब्राह्मणारण्यकोपनिषदां कालः। ब्रह्मविद्यायाः संवेदनोपाधिषु उपनिषदां महत् स्थानमस्ति। अतः उपनिषदन्तर्भूतानां तत्त्वचिन्तापराणां योग्यतमानां वाक्यानां सञ्चयनाय ऋषयः कृतप्रवृत्ताः आसन्निति अनुमातुं शक्यते। तादृशस्य परिश्रमस्य फलमेव उपनिषद्भ्यः उद्धृतानि एतानि महावाक्यानि। संवेदनक्षमत्वं मनसि निधायैव ते आशयसञ्चयनाय यत्नं चक्रुः। अतः तदनुरोधेन एतेषां वाक्यानां क्रमीकरणमपि कृतं स्यादिति मन्यामहे। यत् वाक्यचतुष्टयं उपनिषद्भ्यः ते स्वीचक्रुः तेषां योग्यः क्रमोऽपि तैः आकलितः स्यात्। स एव संवेदनानुकूलक्रमः पश्चात्काले महावाक्येषु पण्डितैः स्वीकृतः।

स क्रमः यथा-

महावाक्यम्	वेदः	उपनिषद्
१. अयमात्मा ब्रह्म	अथर्ववेदः	माण्डूक्योपनिषद्
२. प्रज्ञानं ब्रह्म	ऋग्वेदः	ऐतरेयोपनिषद्
३. तत्त्वमसि	सामवेदः	छान्दोग्योपनिषद्
४. अहं ब्रह्मास्मि	यजुर्वेदः	बृहदारण्यकोपनिषद्

द्वितीये रेखाचित्रे अङ्गीकृता पौर्वापर्यसरणिः ब्रह्मज्ञानोपदेशकर्म अनायासं करोति। गुरुः अथवा गुरुकल्पः शिष्यजां आकाङ्क्षाम् अनुसृत्य खलु उपदेशाय प्रभवति। अधुना अस्माकं पुरोभागे विचारद्वयं वर्तते-

१. वेदानां स्वतस्सिद्धप्रामाण्यं, पौर्वापर्यं च आदाय प्रथमरेखाचित्रस्थः क्रमः महावाक्यानां क्रमः एकः।

२. संवेदनक्षमम् अनुसृत्य स्वीकृतः द्वितीयरेखाचित्रस्थः क्रमः। इह एकं कार्यं मुख्यतया मनसि निधातव्यं वर्तते यत् महावाक्यानां सञ्चयनं वेदानां पौर्वापर्यज्ञापनाय अथवा विज्ञानसंवेदनक्षमाय वा कृतमिति। एवं रीत्या विचारे कृते शुकरहस्योपनिषदि स्वीकृतस्य महावाक्यक्रमस्य अत्यादरो नास्तीति निश्चप्रचम्। तत्तद्वाक्यार्थावबोधाय तादृशपाठे स्वीकृतेऽपि अत्र दोषलेशोऽपि नास्ति। किन्तु संवेदनक्षमतां यदि स्वीक्रियते तर्हि द्वितीयरेखाचित्रस्य क्रमः अवश्यं स्वीकरणीयः।

'महावाक्यचतुष्टयं' माण्डूक्योपनिषदि, ऐतरेयोपनिषदि, छान्दोग्योपनिषदि, बृहदारण्यकोपनिषदि च उपनिषद्वाक्यान्तर्भूतत्वेन दृष्टम्। अतः तेषां स्वतः स्वतन्त्रतया वाक्यत्वं नास्ति। किन्तु

"शुकरहस्योपनिषदि"[5] महावाक्यानि तत्तदाकारतया पूर्णवाक्यवद् प्रतिपादितानि दृश्यन्ते। यथा-

१.	ॐ प्रज्ञानं ब्रह्म
२.	ॐ अहं ब्रह्मास्मि
३.	ॐ तत्त्वमसि
४.	ॐ अयमात्मा ब्रह्म

डा. सि.ए. षैला 'अपरोक्षानुभूतिः'– विमर्शनात्मकमध्ययनम् इति नामके स्वकीये ग्रन्थे वदति यत्– "मुमुक्षोर्मोक्षसाधनस्य ब्रह्मात्मैक्यावगतेः प्रतिपादकानि चत्वारि महावाक्यानि"[6]

शुकरहस्योपनिषदि श्लोकैः महावाक्यानाम् अर्थविवरणमपि क्रियते। तथा च श्लोकः –

"येनेक्षेत शृणोतीदं जिघ्रति व्याकरोति च।
स्वाद्वस्वादु विजानाति तत् प्रज्ञानमुदीरितम्।।"[7]

येन चक्षुरादिना ईक्षते, शृणोति, जिघ्रति स्वाद्वसादु विजानाति तत् विज्ञानमिति लोके उदीरितं वर्तते।

किञ्च ब्रह्मदेवे, देवेन्द्रे, अन्येषु देवेषु, मानवेषु, अश्वगोप्रभृतिषु मृगेषु तथा च अन्येषु च जीविषु चैतन्यस्वरूपात्मकम् एकं ब्रह्म हि वर्तते। तदपि प्रज्ञानम्। तत्प्रज्ञानरूपब्रह्म मय्यपि वर्तते इत्युक्तम् अस्याम् उपनिषदि। प्रमाणं यथा-

"चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु।
चैतन्यमेकं ब्रह्म तद् प्रज्ञानं ब्रह्म मय्यपि।।"[8]

शरीरी मनुष्यः ब्रह्मविद्यायाः प्राप्तये अधिकारी साक्षिरूपेण विद्यमानः परमात्मा एव बुद्धिस्फुरणवेलायाम् 'अहं' पदेन व्यवह्रियते। एवं परिपूर्णः आत्मा एव "ॐ अहम् ब्रह्मास्मि" इति वाक्यस्थेन ब्रह्मपदेन व्यवह्रियते। तदुक्तं शुकरहस्योपनिषदि-

"परिपूर्णपरात्मास्मिन् देहे विद्याधिकारिणि।
बुद्धेः साक्षी तया स्थित्वा स्फुरन्नहमितीर्यते।।
स्वतः पूर्णः परात्मात्र ब्रह्मशब्देन वर्णितः।
अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहम्।।"[9]

सृष्टेः प्राक् द्वैतभावनाशून्यं नामरहितम् एकं सत् आसीत्। तद् ब्रह्म। 'तत्' पदेन तदेव प्रतिपादितं वर्तते। 'त्वम्' इति पदेन कथितः उपदेशश्रोता इन्द्रियातीत इति प्रतीतः शिष्यः परम्। 'असि' इति पदेन जीवब्रह्मणोः एकत्वं द्योतितम्। एतदर्थकः उपनिषच्छ्लोको यथा-

"एक एवाद्वितीयं सन्नामरूपविवर्जितम्।
सृष्टेः पुराधुनाप्यस्य तादृक्त्वं तदितीर्यते।।
श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम्।
एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम्।।
दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते।
ब्रह्मशब्देन तद् ब्रह्म स्वप्रकाशात्मरूपकम्।।"[10]

अनात्मवस्तुनि आत्मबुद्धिर्जाता। तेन निमित्तेनाहम् अज्ञानान्धकारे पतितो वर्तते। अहं बुद्धिः, इदं मम इति मोहात्मकः स्थितिविशेषः मयि आवेशितः वर्तते। तत्तु अज्ञानात् सत्यन्तु 'अयमात्मा ब्रह्म।' गुरूपदेशात् मे तद् सिद्धम्। एवम् आत्मस्वरूपस्य सूर्यस्य आविर्भावेन निद्रारूपस्य अन्धकारस्य भङ्गः सञ्जातः इत्यर्थकः "अयमात्मा ब्रह्म" इति महावाक्यघटकस्य अर्थस्य प्रकाशकः श्लोको यथा-

"अनात्मदृष्टेरविवेकनिद्रामहं मम स्वप्नगतिं गतोऽहम् ।

स्वरूपसूर्येऽभ्युदिते स्फुटोक्तेः गुरोर्महावाक्यपदैः प्रबुद्धेः"[11]।।

वेदक्रममनुसृत्य महावाक्यानां पौर्वापर्यं शुकरहस्योपनिषदि वर्तते इति उक्तं खलु। किन्तु महावाक्यानां स्वरूपयोग्यतामनुसृत्य श्रीशङ्कर-मध्व-रामानुजैः कृतः महावाक्यानां क्रमः केन पूर्वं आचरित इत्यपि गवेषणविषयः भवितुमर्हति। उपनिषदां भाष्यं श्रीशङ्कराचार्येणैव सर्वप्रथमं कृतम् इति विषये सन्देहो नास्ति। श्रीशङ्करमतस्य खण्डनमण्डनरीत्या पश्चात्काले भाष्यं रचितवान् श्रीमध्वाचार्यः। अस्मिन् विषये श्रीरामानुजस्य भागः तेन रचिते वेदार्थसङ्ग्रहे वर्तते। तस्य शिष्याणाम् उपनिषद्व्याख्यानानि अपि रामानुजमतत्वेनेह स्वीकृतानि वर्तन्ते।

एकादशोपनिषन्नामके ग्रन्थे यत् श्रीशङ्करकृतं भाष्यं दृश्यते तत् महावाक्यानां घटनास्वरूपमादायैव।

अतः 'अयमात्मा ब्रह्म', 'प्रज्ञानं ब्रह्म', 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इति क्रमः प्रथमं श्रीशङ्कराचार्येण सूचित इति प्रतिभाति। इदानीम्

महावाक्यस्य अयमेव क्रमः सार्वजनीनः सञ्जातः, न तु शुकरहस्योपनिषत्स्थः क्रमः। महावाक्यानि भिन्नभिन्नोपनिषदः समुद्धृतानि। प्रत्यक्षतया तानि साकाङ्क्षम् अन्वयन्ति इत्येतदपि महद्वाक्याद्भुतं भवति। एवं ब्रह्मपदप्रदर्शकानि वाक्यानि न केवलं महावाक्यानि अपि तु अद्भुतवाक्यानि, आश्चर्यवाक्यानि वा।

२.५. पैङ्गलोपनिषदि महावाक्यानां स्वरूपम्

शुकरहस्योपनिषदः उपरि प्रसिद्धानां महावाक्यानाम् एका पट्टिका "पैङ्गलोपनिषदि दृश्यते"।[12] सामान्यतया चतसृषु उपनिषत्सु ऐतरेयोपनिषद्, माण्डूक्योपनिषद्, छान्दोग्योपनिषद्, बृहदारण्यकोपनिषद् प्रभृतिषु विद्यमानेषु वाक्येषु अन्तर्भूतानि इमानि महावाक्यानि। शुकरहस्योपनिषदि तु महावाक्यानि स्वतन्त्रतया विद्यमानानि सन्ति इत्येतद् कार्यं पूर्वम् उक्तं खलु।

पैङ्गलोपनिषदि अपि महावाक्यचतुष्टयं दृश्यते। एतानि वाक्यानि किञ्चिद्वैशिष्ट्यम् आवहन्ति। इह महावाक्यरूपत्वेन

“तत्त्वमसि”
“त्वं तदसि”
“त्वं ब्रह्मासि”
“अहं ब्रह्मास्मि”

इति वाक्यानि प्रदत्तानि

अत्र वाक्यत्रये “युष्मद्” शब्दः वर्तते इति वैशिष्ट्यम्।

“तत्त्वमसि” - तद् ब्रह्म त्वम् असि।

“त्वं तदसि” - यथाश्रुतरीत्या अस्य अर्थः साधकः त्वं ब्रह्मासि इति। तृतीयं वाक्यं तु “त्वं ब्रह्मासि” - साधकः त्वं ब्रह्मासि इत्येव अर्थः। चतुर्थं वाक्यं तु ‘अहं ब्रह्मास्मि’ - साधकः “अहं, ब्रह्म भवामि” इत्यर्थः।

अस्मिन् वाक्यचतुष्टये “तत्त्वमसि”, “अहं ब्रह्मास्मि” इति वाक्ये महावाक्यतया प्रसिद्धे वाक्यचतुष्टये अन्तर्भवतः। यदि सामान्येन समीक्षा क्रियते तर्हि “त्वं तदसि”, “त्वं ब्रह्मासि” इत्येते वाक्ये “तत्त्वमसीति” महावाक्यतुल्यतया प्रतीयेयाताम्। एवं चेत् याज्ञवल्क्योक्तानि महावाक्यानि महावाक्यद्वयम् परम् आवहति इति आपद्येत।

महावाक्योपदेशाय या प्रार्थना पैङ्गलेन याज्ञवल्क्यं प्रति कृता वर्तते सा निष्फलतां यातीति प्रतीतिः। अत्र याज्ञवल्क्यः महाचार्यः शिष्यस्तु पैङ्गलः पूर्णाधिकारी। अतः प्रार्थना कदापि न निष्फलतां यातुम् अर्हति। अतः महात्मना याज्ञवल्क्येन पुण्यश्लोकं पैङ्गलं प्रति अन्यूनतया महावाक्यस्य उपदेशः कृतः आसीत् इति विषये संशयस्य नावकाशः। एवं चेत् याज्ञवल्क्येन त्यक्ते "अयमात्मा ब्रह्म", "प्रज्ञानं ब्रह्म" इत्येते महावाक्ये कुत्र? अयं विषयमधिकृत्य विचारः करणीयः वर्तते।

महात्मना याज्ञवल्क्येनापि पैङ्गलस्य जिज्ञासानिवृत्तये वाक्यचतुष्टयम् उक्तम्। किन्तु प्रत्यक्षतः "तत्त्वमसि" इति वाक्यं तस्यैव विवरणत्वेन प्रतीयमानं वाक्यद्वयमपि अत्र दृश्यते। "तत्त्वमसि" इति एकं महावाक्यं विवरणद्वयेन साकं प्रसिद्धमहावाक्यद्वयं त्यक्त्वा याज्ञवल्क्येन उपदिष्टं स्यादिति विश्वसितुं न प्रभवन्ति पण्डिताः। अतः येन केनापि वा प्रकारेण त्यक्ततया प्रतीयमानस्य "अयमात्मा ब्रह्म", "प्रज्ञानं ब्रह्म" इति वाक्यद्वयस्यापि निगुम्फनं कृतं वा इत्यन्वेषणीयम्।

महावाक्यानाम् उपदेशः जिज्ञासून् प्रति आचार्येण कृतः भवति। एषु वाक्येषु वस्तुतया प्रथमवाक्यत्रयं शिष्यं प्रति एव, चतुर्थम् अन्तिमं वाक्यं परं स्वानुभवात्मकं वाक्यम्। अत एव "अहं ब्रह्मास्मीति" अस्मच्छब्देन साकं वाक्यस्यास्य प्रयोगः। पूर्वोक्तकारणेन प्रसिद्धतया विद्यमाने वाक्यचतुष्टये प्रथमवाक्यद्वयस्य अर्थात् "अयमात्मा ब्रह्म" "प्रज्ञानं ब्रह्म", अस्मच्छब्देन साकं याज्ञवल्क्यवाक्येन तुलनायां कृतायां न पूर्णतया युज्यते इति प्रतिभाति। अन्यथा भवतु नाम, युष्मच्छब्दघटितं प्रथमवाक्यं अत्यन्तं समीचीनम्। किन्तु, याज्ञवल्क्यस्य युष्मच्छब्दघटितद्वितीयतृतीयवाक्ये प्रकरणेन सर्वात्मना औचित्यपूर्वं सार्थक्यं प्रकटयतः। उक्तस्य विवरणस्य औचित्यस्य अङ्गीकरणाय द्वितीय-तृतीय-वाक्यघटकप्रसिद्धमहावाक्यानां बहिरानयनं कर्तव्यं तदर्थं परिश्रमः क्रियते।

महावाक्यचतुष्टये आद्यस्थं वाक्यत्रयं शिष्यं प्रति गुरोः वचनम्। अन्तिमं तु शिष्यस्य स्वात्मानुभूतिः। अतः आद्यवाक्यत्रयेण साकं युष्मच्छब्दप्रयोगः औचित्यतमः भवति। तादृशानि याज्ञवल्क्योपदिष्टानि महावाक्यानि यथा-

“तत्त्वमसि”

“त्वं तदसि”

“त्वं ब्रह्मासि”

“अहं ब्रह्मास्मि” इति।

एतानि वाक्यानि यथाक्रमं अधः दीयन्ते

पैङ्गलोपनिषदि याज्ञवल्क्यमहावाक्यानि	श्रीशङ्करादिभिः अङ्गीकृतानि अन्योपनिषन्महावाक्यानि
तत्त्वमसि - (तत् प्रज्ञानं त्वम् असि)	तत्त्वमसि
त्वं तदसि - (त्वं तद् ब्रह्म असि)	प्रज्ञानं ब्रह्म
त्वं ब्रह्म असि - (त्वं ब्रह्म भवसि	अयमात्मा ब्रह्म
अहं ब्रह्मास्मि - (न मे ब्रह्मणा पार्थक्यम्)	अहं ब्रह्मास्मि

उपरिप्रदत्तेन रेखाचित्रेण याज्ञवल्क्योऽपि महावाक्यचतुष्टयम् उक्तवानिति निश्चप्रचम्।

आहत्य अत्र वयं महावाक्यानि त्रिविधानि अलभामहि। प्रथममहावाक्यसमुदाये आद्ययोः महावाक्यद्वयोः स्वतः पूर्णवाक्यता नास्ति। द्वितीये विभागे तथा च शुकरहस्योपनिषदि विद्यमानानि महावाक्यानि पूर्णवाक्यान्येव। वेदसम्बन्धगतपौर्वापर्यमादाय अत्र क्रमः स्वीकृतः इत्यतः साकाङ्क्षरूपः संवेदनक्रमः पूर्वक्रमे आचरितवत् अत्र नास्ति इति दोषः। तृतीयविभागस्तु पैङ्गलोपनिषत्स्थानि महावाक्यानि। अत्र प्रत्यक्षतया महावाक्यचतुष्टयं द्रष्टुं न शक्यते इति न्यूनता। महावाक्यचतुष्टयस्य, उक्तेषु वाक्येषु अन्तर्हिततया भानं व्याख्यानेन साधनीयं वर्तते। किन्तु अस्य एका श्रेष्ठता अपि अस्ति। आद्यवाक्यत्रयं, शिष्यं प्रति गुरोः उपदेशः। अन्त्यवाक्यं शिष्यस्य स्वानुभवश्च। इयम् रीतिः, अयं क्रमश्च युक्ततमः प्रतिभाति। शुकरहस्योपनिषदि, पैङ्गलोपनिषदि च महावाक्यचतुष्टयम् अन्तर्भूतमित्युक्तम्।

२.६. बह्वृचोपनिषदि महावाक्यानां स्वरूपम्

तदुपरि 'बह्वृचोपनिषद्यपि' भिन्नक्रमेण महावाक्यचतुष्टयस्य उल्लेखो दृश्यते। यथा- "प्रज्ञानं ब्रह्मेति वा अहं ब्रह्मास्मीति वा भाष्यते। तत्त्वमसीत्येव सम्भाष्यते। अयमात्मा ब्रह्मेति वा अहं ब्रह्मास्मीति वा

ब्रह्मैवाहमस्मीति वा"। तदुपरि अस्यामेव उपनिषदि इमं विषयमधिकृत्य यथा - "योऽहमस्मीति वा सोऽहमस्मीति वा योऽसौ सोऽहमस्मीति वा या भाष्यते...."।[13] महावाक्यानाम् इह आवर्तनकथनं प्रकारान्तरेण च कथनं वर्तते।

२.७. उपनिषत्संख्यायां मतभेदः

उपनिषदाम् संख्यायां मतभेदो वर्तते। श्वेताश्वतरोपनिषदा साकम् एकादशोपनिषदां परं भाष्यं श्रीमता शङ्कराचार्येण कृतं वर्तते। तत्तु अन्यासाम् उपनिषदाम् आनर्थक्यं न सूचयति। स्थालीपुलाकन्यायेन उपनिषद्ग्रन्थसमूहेषु तावन्मात्राणाम् उपनिषदां स्वीकारः भाष्यरचनायै श्रीमता शङ्कराचार्येण कृत इति पण्डितानाम् अभिप्रायः।

२.८. मुक्तिकोपनिषदनुसारेण उपनिषत्संख्या

मुक्तिकोपनिषदनुसारेण उपनिषदां संख्या अष्टोत्तरशतं भवति। ताः उपनिषदः दशभिः श्लोकैः परिगणिताः। उक्तायाम् उपनिषदि रामाञ्जनेयसंवादे आहत्य अष्टोत्तरशतोपनिषदां सूचना कृता वर्तते। तत्र श्रीरामस्य मतानुसारेण मुमुक्षूणां विमुक्तये माण्डूक्यमेकमेवालम्।

इत्थं यथाक्रमं कृतानां प्रश्नानां समाधानरूपेण दश श्लोकाः श्रीरामेण कण्ठतः प्रोक्ताः। ते यथा–

“इयं कैवल्यमुक्तिस्तु केनोपायेन सिद्ध्यति।
माण्डूक्यमेकमेवालं मुमुक्षूणां विमुक्तये।।
तथाप्यसिद्धं चेज्ज्ञानं, दशोपनिषदः पठ।
ज्ञानं लब्ध्वा चिरादेव मामकं धाम यास्यसि।।
तथापि दृढता नो चेत् विज्ञानस्याञ्जनासुत-
द्वात्रिंशाख्योपनिषदं समभ्यस्य निवृत्तये।।
विदेहमुक्ताविच्छा चेदष्टोत्तरशतं पठ।
तासां क्रमं सशान्तिं च शृणु वक्ष्यामि तत्त्वतः।।
ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा।।
ब्रह्मकैवल्यजाबालश्वेताश्वो हंस आरुणः।
गर्भो नारायणो हंसो बिन्दुनादशिरः शिखा।।
मैत्रायणी कौषीतकी बृहज्जाबालतापनी।

कालाग्निरुद्रमैत्रेयी सुबालक्षुरिमन्त्रिका।।

सर्वसारं निरालम्बं रहस्यं वज्रसूचिकम्।

तेजोनादध्यानविद्यायोगतत्त्वात्मबोधकम्।।

परिव्राट्त्रिशिखी सीता चूडानिर्वाणमण्डलम्।

दक्षिणा शरभं स्कन्दं महानारायणाह्वयम्।।

रहस्यं रामतपनं वासुदेवं च मुद्गलम्।

शाण्डिल्यं पैङ्गलं भिक्षुमहच्छारीरकं शिवा।।

तुरीयातीतसन्यास परिव्राजाक्षमालिका।

अव्यक्तैकाक्षरं पूर्णा सूर्याक्षाध्यात्मकुण्डिका।।

सावित्र्यात्मा पाशुपतं परं ब्रह्मावधूतकम्।

त्रिपुरातपनं देवीत्रिपुराकठभावना।।

हृदयं कुण्डली भस्म रुद्राक्षगणदर्शनम्।।

तारसारमहावाक्यपञ्चब्रह्माग्निहोत्रकम्।

गोपालतपनं कृष्णं याज्ञवल्क्यं वराहकम्।।

शाट्यायनी हयग्रीवं दत्तात्रेयं च गारुडम्।

कलिजाबालिसौभाग्यरहस्यऋचमुक्तिका।।

एवमष्टोत्तरशतं भावनात्रयनाशनम्।

ज्ञानवैराग्यदं पुंसां वासनात्रयनाशनम्"।।[14]

अष्टोत्तरशतोपनिषदां नामानि प्रकाशितेषु ग्रन्थेषु समरूपतां न दधते। अतः अष्टोत्तरशतादुपरि उपनिषदः वर्तन्त इत्येतत् सत्यम्। तस्मात् कारणात् केचित् द्विशतोपरि उपनिषदः सन्तीति आमनन्ति।

शोधप्रबन्धविषयस्तावत् अद्वैतद्वैतविशिष्टाद्वैतमतानुसारेण महावाक्यानां समीक्षा खलु। विशिष्टाद्वैतस्य प्रथमः प्रवक्ता श्रीरामानुजाचार्यः विशिष्य उपनिषदां भाष्यं न कृतवान्। अतः महात्मनः अस्य कण्ठोदीरितान् शब्दान् प्रकृते उद्धर्तुं न शक्नोमि। तथापि महात्मनः अस्य ये अनुयायिनः भरद्वाजरामानुजाचार्यः, रङ्गरामानुजाचार्यः, रामानन्दः, गोपालानन्दः, कूरनारायणमुनिप्रभृतयः यत्किमपि उपनिषद्वाक्यं प्रति उक्तवन्तः तत् विशिष्टाद्वैतिनां विचाररीत्या स्वीकृत्य इह प्रतिपादितं वर्तते।

किञ्च यद्यपि प्रत्यक्षतः उपनिषदां व्याख्यानं प्रतिपदम् रामानुजाचार्येण न कृतं तथापि 'वेदार्थसङ्ग्रहे' नामके ग्रन्थे जीवात्मनः

स्वरूपं, परमात्मनः स्वरूपं, परमात्मनो वैभवं, तत्त्वमसीति अर्थोपपादनं, जगतः ब्रह्मात्मकत्वं च उक्तं वर्तते। परमात्मनः सर्वात्मत्वेन सर्वगतत्वाद् सर्वशब्दाभिधेयता, ब्रह्मणः शिवस्यापि नारायणात्मकता सर्वस्यापि ईश्वरशेषता, इत्यादि शीर्षकेषु महावाक्योक्तानाम् आशयानां विशिष्टाद्वैतसरणीम् अनुसृत्य यत् वर्तते तत्सर्वमपि गवेषणविषयत्वेन स्वीकृतं वर्तते।

अस्मिन् प्रबन्धे दीयमाना पट्टिका शोधकारस्य महावाक्यसदृशानि अन्यानि कानिचन वाक्यानि सन्तीति शोधप्रबन्धकारस्य अभिप्रायस्य विचिन्तनाय परं भवति।

परामर्शाः

1. माण्डूक्योपनिषद् - 2
2. ऐतरेयोपनिषद् - 3-1-3
3. छान्दोग्योपनिषद् - 6-8-7
4. बृहदारण्यकोपनिषद् - 1-4-10
5. शुकरहस्योपनिषद् - उपनिषत्सर्वस्वम् - पुटसंख्या - 276
6. अपरोक्षानुभूतिः (विमर्शनात्मकमध्यनम्) पुटसंख्या - 12
7. शुकरहस्योपनिषद् - उपनिषत्सर्वस्वम् - पुटसंख्या - 276
8. शुकरहस्योपनिषद् - उपनिषत्सर्वस्वम् - पुटसंख्या - 276
9. शुकरहस्योपनिषद् - उपनिषत्सर्वस्वम् - पुटसंख्या - 276, 277
10. शुकरहस्योपनिषद् - उपनिषत्सर्वस्वम् - पुटसंख्या - 277
11. शुकरहस्योपनिषद् - उपनिषत्सर्वस्वम् - पुटसंख्या - 277
12. पैङ्गलोपनिषद् - उपनिषत्सर्वस्वम् - 3-1
13. 112 UPANIṢADS - II - PART - Page - 492
14. मुक्तिकोपनिषद् (उपनिषत्सर्वस्वम्) - पुटसंख्या - 676, 677

तृतीयोऽध्यायः

"अयमात्मा ब्रह्म" इति महावाक्यस्य समीक्षा

प्रस्थानत्रयमनुसृत्य महावाक्यचतुष्टयस्य अर्थविचिन्तनं करणीयं वर्तते। वस्तुतः महाशयः श्रीशङ्कर एव विषयेऽस्मिन् गहनरूपेण विचिन्तितवान्। व्याख्यानं बृहदाकारं भवतु, अल्पशरीरकं वा भवतु तथापि व्याख्यानत्वात् समुचितरीत्या उल्लेखनम् आवश्यकं वर्तते। कदाचित् श्रीशङ्करभाष्यवत् अन्येषां भाष्ये बहुधा कथनं द्रष्टुं न शक्यते। तथापि भाष्यत्वेन समादरणीयत्वात् शोधग्रन्थेऽस्मिन् यथार्हं स्थानं दत्त्वा लिखितं वर्तते। शङ्करभाष्यापेक्षया मध्व-रामानुजयोः भाष्ये न अतिविस्तृते।

"अयमात्मा ब्रह्म" इति महावाक्यं माण्डूक्योपनिषदि अन्तर्भवति। माण्डूक्यन्तु अथर्ववेदोपनिषद् भवति। अयमात्मा हि ब्रह्म इत्यर्थः सामान्यतया महावाक्यस्यास्य। अहङ्कारादारभ्य देहपर्यन्तं विद्यमानेषु प्रतिभासेषु स्थित्वा ते सञ्चालकाः आत्मस्वरूपाः "अयमात्मा" इति महावाक्यभागेन विवृताः वर्तन्ते। इदं वाक्यं "सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात्[1] इति मन्त्रात् उद्धृतं भवति।

अयमात्मा स्वयं प्रकाशकः अन्यान् प्रकाशयति च। समस्तस्य दृश्यप्रपञ्चस्य अधिष्ठानस्वरूपं भवति ब्रह्म। ब्रह्मसत्ता हि स्वप्रकाशकेन आत्मरूपेण भासते इति तथ्यं जीवात्मपरमात्मैक्यं बोधयति। अयमेव सामान्यार्थः।

'अयम्', 'आत्मा', 'ब्रह्म' इति च पदत्रयसमन्वितं भवति इदं महावाक्यम्। आत्मा इत्यस्य जीव इति, ब्रह्म इत्यस्य ईश्वर इति च अर्थः। अयं वाच्यार्थः न युक्तिसहः। अतः वाच्यार्थत्यागेन अत्र लक्ष्यार्थः स्वीकरणीयो वर्तते। लक्ष्यार्थः अत्रत्यस्य 'आत्मा' शब्दस्य कूटस्थचैतन्यमिति, 'ब्रह्म' इत्यस्य सच्चिदानन्दस्वरूप च इत्यर्थः 'अयं' शब्दः अपरोक्षतां प्रदर्शयति। अयमात्मा नाविदितः यत्किञ्चित् वस्तुविशेषः अपि तु सुपरिचितः। तत्प्रदर्शनायैव 'अयं' शब्दः प्रयुक्तः। यदि प्रत्यक्षं चेत् इन्द्रियगोचरं भविष्यति। अत्रत्येन 'अयं' शब्देन निर्दिष्टः न इन्द्रियगोचरः। तथापि आत्मप्रत्यक्षतया अस्य स्थितिः वक्तव्या। इमां प्रकटीकर्तुं नाप्यन्येन शक्यते। तथापि अयं स्वयं प्रकटीकृत्य भासते। दृष्टान्तेन उक्तं कार्यं समर्थये। 'सूर्यः' अन्यप्रकाशस्य साहाय्येन न प्रकटीभवति। किन्तु स्वेन प्रकाशेन स्वयं

प्रकटीभवति। वस्तुतः अत्र सूर्यः एव सूर्यं दर्शयति। तद्वत् भवति आत्मा अपि। स आत्मा एव इह 'अयमात्मा' इत्युक्तम्।

३.१. शङ्करमतम्

शङ्करमतानुसारेण सर्वं ब्रह्मैव। "सर्वं ह्येतद् ब्रह्मेति"।[2] अर्थात् सर्वं यत् ओङ्कारमात्रमिति कथितं वर्तते तद् ब्रह्म-"सर्वं यदुक्तं ओङ्कारमात्रमिति तदेतद् ब्रह्म"।[3] इतः पर्यन्तं परोक्षरूपेण यत्कथितं तद् ब्रह्मविशेषरूपेण प्रत्यक्षतया "अयमात्मा ब्रह्मेति"[4] शाङ्करभाष्ये स्पष्टतया उक्तम्। ब्रह्मरूपात् अभिन्नः आत्मा चतुष्पात्त्वेन उत वा अवस्थया सहितः। विश्वः, तैजसः, प्राज्ञः, तुरीयः इति रीत्या चतुष्पात् भवति अयमात्मा। ओङ्कारशब्देन कथितः परापररूपेण व्यवस्थितः अयम् आत्मा कार्षापणतुल्यं पादचतुष्टयात्मकं भवति किन्तु न गोसमः।

३.२. मध्वमतम्

इदानीं माध्वमतमनुसृत्य उक्तस्य महावाक्यस्य व्याख्यानाय अवसरः। आत्मा पूर्णः। मध्वस्य तु हरिरेव एको पूर्णः। तदुक्तं श्रीमध्वाचार्येण हरिवंशमाश्रित्य-

“पूर्णस्तु हरिरेवैको नान्यत्पूर्णं कदाचन।

विना च प्रकृतिं नान्यत् कालातीतं परमात्मनः।।

कालश्चैव दिशो वेदाः प्रकृत्यात्मान ईरिताः।

अभिमानात्तु जीवानां न कालातीतता भवेत्।

मुक्तानामपि पूर्वत्र कालसम्बन्ध ईरितः।।

पूर्णत्वं च सदा विष्णोः प्रसिद्धं सर्ववेदतः।

सोऽयं विष्णुः रमाब्रह्मरुद्रानन्तादिगः सदा।।

आदानादनकर्तृत्वादात्मा तेषामगोचरः।

इति मण्डूकरूपी सन् ददर्श वरुणः श्रुतिम्”।।[5]

तदुपरि श्रीमध्वाचार्यः “परमं यो महद् ब्रह्म”[6] “तदेव ब्रह्म परमं कवीनाम्”[7] पूर्णमदः पूर्णमिदं”[8] इत्यादिषु प्रसिद्धं च ब्रह्मणः पूर्णत्वमित्याह “सर्वं ह्येतद् ब्रह्म” इति।

आनन्दतीर्थस्य भाष्यमधिकृत्य तस्य व्याख्यानरूपेण व्यासतीर्थेन रचितायां भाष्यटीकायां “सर्वं ह्येतद् ब्रह्म” इत्यस्य “एतदक्षराख्यं ब्रह्म सर्वं पूर्णं हीति योजना”[10] कृता दृश्यते। अयमात्मा समस्तप्रणवप्रतिपाद्य-

भगवदुपस्थितिमुक्त्वा प्रणवांशैः अकारोकारमकारनादैः प्रतिपाद्य विश्वादीनाम् उपस्थितिम् अकारोकारमकार इत्यत्र वक्तुं प्रस्तावयति। अयमात्मा ब्रह्मेति वाक्यं जीवस्य ब्रह्मात्मकतापरप्रतीतिं निवारयन् तन्निवर्त्यामाशङ्कां च प्रदर्शयति। 'सोऽयमात्मा चतुष्पात्' इत्यस्य समस्तप्रणवप्रतिपाद्यम् आत्मानं ब्रह्मादिनियामकं सूचयति। अयं मूलरूपी विष्णुः चतुष्पात् चत्वारः पादाः अंशाः स्वरूपभूता यस्य सः इत्यर्थः।

३.३. रामानुजमतम्

प्रकृतमनुसृत्य इदानीं श्रीरामानुजाचार्यस्य मतस्य सूचना। श्रीरामानुजाचार्येण शङ्कराचार्यमध्वाचार्यवत् उपनिषदां भाष्यं स्वयं न कृतं दृश्यते तथापि "वेदार्थसङ्ग्रह"नामके ग्रन्थे उपनिषदां तत्त्वानि प्रति संक्षिप्तरूपेण विचारो कृतो दृश्यते। तस्मात् कारणात् रामानुजस्य कण्ठोदीरितं वाक्यं प्रकृते योजयितुं न शक्यते। अस्मादेव कारणात् तस्य मतानुयायिनां भरद्वाजप्रभृतीनां मतस्य स्वीकारः रामानुजमतत्वेन स्वीक्रियते। "अयम्' ओङ्कारवाच्यः आत्मा ब्रह्म। अर्थात् सर्वात्मभूतं

ब्रह्म। सोऽयम् आत्मा ओङ्कारे अध्यस्यमानः परमात्मा"।[11] आनन्दभाष्ये इदं महावाक्यम् अवलम्ब्य अयम् अस्मदादिभिरहमिति प्रतीतिगोचरतयानुभूतः आत्मा - जीवात्मा पूर्वमन्ते यच्च त्रिकालातीतमित्यनेनोक्तः कालत्रयापरिच्छिन्नः सोऽपि ब्रह्मैव-ब्रह्मात्मक एवेत्यर्थः। अयं विषयः प्रतिपदार्थदीपिकायां भरद्वाजरामानुजाचार्येण सूचितं वर्तते। ओङ्कारस्वरूपोऽयमात्मा 'चतुष्पात्' इत्युक्तम्। चतुष्पात् इत्यस्य अकारोकारमकारनादात्मकतया व्याख्यातं वर्तते प्रतिपदार्थदीपिकायाम्।

रङ्गरामानुजस्य प्रकाशिकाव्याख्याने कालत्रयपरिच्छिन्नात्मकं सर्वमपि वस्तु ब्रह्मैवेत्यर्थः इत्युक्तम्। तद् किम् इत्यत्र आह अयमात्मा ब्रह्मेति। अयम् ओङ्कारः सर्वात्मभूतं ब्रह्मैव इत्यत्र उक्तं दृश्यते। एवं ओङ्कारे सर्वात्मभूतब्रह्मदृष्टिः कर्तव्या इत्यर्थः। ओङ्कारे अध्यस्यमानोऽयमात्मा पादचतुष्टययुक्तमप्युक्तम्। चतुष्टयत्वन्तु अकारोकारमकारनादात्मकत्वमिति उक्तं खलु।

कूरनारायणमुनिप्रणीते कूरनारायणभाष्ये सर्वम् ओङ्कार इत्यत्र ओं पदवाच्यस्य ब्रह्मणः पूर्णत्वमुक्तम्। तत्कुतः इत्याशङ्कां "सर्वं ह्येतद् ब्रह्मेति" उपनिषद्वाक्यमवतार्य समाधत्ते। ओङ्कारपदवाच्यम् अक्षराख्यं ब्रह्म सर्वं पूर्णं हि।

उक्तस्य अभिप्रायस्य स्थापनाय सः "तदेतद् ब्रह्म परमं कवीनाम्" पूर्णमदः पूर्णमिदं"[12] इत्यादयः श्रुतयः प्रमाणत्वेन स्वीकरोति।

सुबोधिनीव्याख्याने गोपालानन्दः इत्थं वदति "एतद् दृश्यमानमखिलमेव संघातलक्षणं भूतभविष्यद्वर्तमानविभेदविभिन्नं ब्रह्मैव। तदोङ्कार एव सर्वमिति युक्तमुक्तम्। अयमात्मा-प्रत्यगात्मा चतुष्पात् चत्वारः पादा यस्य तथोक्तः"।[13]

परमात्मनः स्वरूपमधिकृत्य वेदार्थसङ्ग्रहे रामानुजाचार्येण इत्थं लिखितं वर्तते। "स्येतरसमस्तवस्तुविलक्षणस्वरूपः अनवधिका-तिशयासंख्येयकल्याणगुणः सर्वात्मा परं ब्रह्म ज्योतिः परमात्मसदादिशब्दभेदैः निखिलवेदान्तवेद्यः भगवान् नारायणः पुरुषोत्तमः इति अन्तर्यामिस्वरूपम्"।[14]

अन्योपनिषदन्तर्गतानि "अयमात्मा ब्रह्म" इति महावाक्यसदृशानि कानिचन वाक्यानि।

सदृशवाक्यानि	उपनिषद्	पुटसंख्या
१) सर्वाणि भूतानि आत्मन्येवानुपश्यति। (सर्वभूतविद्यमानत्वं ब्रह्मणि)	ईशावास्यम् मन्त्रः ६	2 112 UPANIṢADS I Part
२) यस्मिन्सर्वाणि भूतानि आत्मैव। (सर्वभूतविद्यमानत्वं परमात्मनः-परमात्मा ब्रह्म)	ईशावास्यम् मन्त्रः ७	3 112 UPANIṢADS I Part
३) एष सर्वभूतान्तरात्मा। (तद् ब्रह्म सर्वभूतानाम् अन्तरात्मा भवति)	मुण्डकोपनिषद् मन्त्रः २-१-४	3 112 UPANIṢADS I Part
४) सर्वस्य प्रभवाप्ययौ हि भूतानाम्। (सर्वभूतानाम् उत्पत्तिस्थानम् अयमात्मा)	माण्डूक्योपनिषद् मन्त्रः ६	3 112 UPANIṢADS I Part
५) सर्वाजीवे सर्वसंस्थे बृहन्ते। (मयि सर्वभूतानि जीवन्ति)	श्वेताश्वतरोपनिषद् मन्त्रः १-६	322 112 UPANIṢADS I Part
६) एवमात्मा आत्मनि गृह्यते (आत्मा आत्मनि-स्वस्मिन् गृह्यते।	श्वेताश्वतरोपनिषद् मन्त्रः१-१५	324 112 UPANIṢADS I Part

७) सर्वव्यापिनमात्मानम्	श्वेताश्वतरोपनिषद् मन्त्रः १-१६	324 112 UPANIṢADS I Part
८) यो विश्वं भुवनमाविवेश (यद् ब्रह्म सर्वम् आविवेश	श्वेताश्वतरोपनिषद् मन्त्रः २-१७	327 112 UPANIṢADS I Part
९) विश्वस्यैकं परिवेष्टितारम् समस्तलोकानाम् आवरणं ब्रह्म)	श्वेताश्वतरोपनिषद् मन्त्रः ३-७	328 112 UPANIṢADS I Part
१०) स एव..... सर्वभूतेषु गूढः (अयम् आत्मा सर्वजीवजालेषु गूढः वर्तते)	श्वेताश्वतरोपनिषद् मन्त्रः ४-१५	332 112 UPANIṢADS I Part
११) एको देवः सर्वभूतान्तरात्मा (अयमात्मा सर्वभूतान्तर्वर्ती ब्रह्म)	श्वेताश्वतरोपनिषद् मन्त्रः ६-११	338 112 UPANIṢADS I Part
१२) आत्मैवेदमग्र आसीत् (पुरुषाकारेण वर्तमानः अयम् आत्मा अग्र आसीत्)	बृहदारण्यकोपनिषद् मन्त्रः १-४-१	218 112 UPANIṢADS I Part
१३) ब्रह्म वा इदमग्र आसीत् (आदौ अयमात्मा ब्रह्म परम् आसीत्)	बृहदारण्यकोपनिषद् मन्त्रः १-४-१०	221 112 UPANIṢADS I Part
१४) अयमात्मा इदममृतम् इदं ब्रह्म (अयमात्मा एव अमृतम्, ब्रह्म, सर्वम्)	बृहदारण्यकोपनिषद् मन्त्रः २-५-२	241 112 UPANIṢADS I Part
१५) अयमेव स योऽयमात्मा (अध्यात्मवाङ्मयः तेजोमयः अमृतमयश्च पुरुषोऽपि अयमात्मा ब्रह्म)	बृहदारण्यकोपनिषद् मन्त्रः २-५-३	241 112 UPANIṢADS I Part

१६) अयमात्मा.......... ब्रह्म (अमृतरूपः पुरुषः अपि अयमात्मा। इदममृतम् इदं ब्रह्म (अयमात्मा ब्रह्म)	बृहदारण्यकोपनिषद् मन्त्रः २-५-४	241 112 UPANIṢADS I Part
१७) उपरिवत्	बृहदारण्यकोपनिषद् मन्त्रः २-५-५	241 112 UPANIṢADS I Part
१८) उपरिवत्	बृहदारण्यकोपनिषद् मन्त्रः २-५-६	241 112 UPANIṢADS I Part
१९) उपरिवत्	बृहदारण्यकोपनिषद् मन्त्रः २-५-७	242 112 UPANIṢADS I Part
२०) उपरिवत्	बृहदारण्यकोपनिषद् मन्त्रः २-५-८	242 112 UPANIṢADS I Part
२१) उपरिवत्	बृहदारण्यकोपनिषद् मन्त्रः २-५-९	242 112 UPANIṢADS I Part
२२) उपरिवत्	बृहदारण्यकोपनिषद् मन्त्रः २-५-१०	242 112 UPANIṢADS I Part
२३) उपरिवत्	बृहदारण्यकोपनिषद् मन्त्रः २-५-११	242 112 UPANIṢADS I Part
२४) उपरिवत्	बृहदारण्यकोपनिषद् मन्त्रः २-५-१२	242 112 UPANIṢADS I Part

२५) उपरिवत्	बृहदारण्यकोपनिषद् मन्त्रः २-५-१३	243 112 UPANIṢADS I Part
२६) उपरिवत्	बृहदारण्यकोपनिषद् मन्त्रः २-५-१४	243 112 UPANIṢADS I Part
२७) स वा अयमात्मा (सर्वेषां भूतानाम् अधिपतिः- ब्रह्म)	बृहदारण्यकोपनिषद् मन्त्रः २-५-१५	243 112 UPANIṢADS I Part
२८) आत्मानं....... संपश्यन् ब्रह्म (आत्मानं ब्रह्मरूपेण पश्यन्)	कैवल्योपनिषद् मन्त्रः १०	345 112 UPANIṢADS I Part
२९) परं ब्रह्म सर्वात्मा	कैवल्योपनिषद् मन्त्रः १६	345 112 UPANIṢADS I Part
३०) स्वतः पूर्णः परात्मा ब्रह्म	शुकरहस्योपनिषद् मन्त्रः ३४	476 112 UPANIṢADS I Part
३१) आत्मानं......... ब्रह्म भावयेत्	वज्रसूचिकोपनिषद् मन्त्रः ९	481 112 UPANIṢADS I Part
३२) तमात्मानं परं ब्रह्म	नारदपरिव्राजकोपनिषद् मन्त्रः ८-८	77 112 UPANIṢADS II Part

परामर्शाः

1. माण्डूक्योपनिषद् - 2

2. शङ्करग्रन्थावलिः प्रथमोभागः उपनिषद्भाष्यम् - पुटसंख्या - 144

3. शङ्करग्रन्थावलिः प्रथमोभागः उपनिषद्भाष्यम् - पुटसंख्या - 144

4. शङ्करग्रन्थावलिः प्रथमोभागः उपनिषद्भाष्यम् - पुटसंख्या - 144

5. माण्डूकोपनिषद्भाष्यम् (व्याख्यासप्तकोपेतम्) - पुटसंख्या - 19

6. माण्डूकोपनिषद्भाष्यम् (व्याख्यासप्तकोपेतम्) - पुटसंख्या - 19

7. माण्डूकोपनिषद्भाष्यम् (व्याख्यासप्तकोपेतम्) - पुटसंख्या - 19

8. माण्डूकोपनिषद्भाष्यम् (व्याख्यासप्तकोपेतम्) - पुटसंख्या - 19

9. माण्डूकोपनिषद्भाष्यम् (व्याख्यासप्तकोपेतम्) - पुटसंख्या - 19

10. माण्डूकोपनिषद्भाष्यम् (व्याख्यासप्तकोपेतम्) - पुटसंख्या - 19

11. माण्डूक्योपनिषद् (भाष्यपञ्चकोपेता) - पुटसंख्या - 7

12. माण्डूक्योपनिषद् (भाष्यपञ्चकोपेता) - पुटसंख्या - 7

13. माण्डूक्योपनिषद् (भाष्यपञ्चकोपेता) - पुटसंख्या - 8

14. वेदार्थसंग्रहः (विमर्शात्मकं सम्पादनम्) - पुटसंख्या - 5

चतुर्थोऽध्यायः

“प्रज्ञानं ब्रह्म” इति महावाक्यस्य गौरवात्मकं पठनम्

“प्रज्ञानं ब्रह्म” इति महावाक्यं ऋग्वेदोपनिषद्भूतस्य ऐतरेयस्य विषयः। दर्शनं, श्रवणं, घ्राणनं, स्पर्शनं, रसास्वादनम् इत्यादीनि जीवितचर्यायाम् अन्तर्भूतानि। उपर्युक्तानि दर्शनस्पर्शनप्रभृतीनि क्रियापराणि। एताः क्रियाः इन्द्रियविशेषाणां स्वभावविशेषाः। एकस्य इन्द्रियस्य या शक्तिः सा अन्यस्मिन् इन्द्रिये न वर्तते तथापि सर्वाः क्रियाः एकस्मिन् चैतन्ये अधिष्ठितं वर्तते इति सामान्यतया प्रतीतिः। अतः इन्द्रियेभ्यः भिन्ना काचन बोधसत्ता इन्द्रियरूपान् उपकरणविशेषानाश्रित्य यथा प्रवर्तते तथा विविधानि क्रियारूपाणि स्वरूपतां धत्ते।

इत्थं स्वतन्त्रतया स्थित्वा यत् इन्द्रियाणां चालकं भवति तत् प्रज्ञानम्।

“प्रज्ञानं ब्रह्म” इतीदं महावाक्यं ऐतरेयोपनिषदि तृतीयाध्याये प्रथमखण्डे विद्यमानस्य “एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि

च क्षुद्रमिश्राणीव बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिजानि चाश्वगावः पुरुषा हस्तिनो यत्किञ्चेदं प्राणिजङ्गमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रम्। प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म"[1] इति मन्त्रस्य भागः। महावाक्यानि उपनिषन्मन्त्रान्तर्भूतानीत्युक्तं खलु। तदेतत् ज्ञापनायैव "प्रज्ञानं ब्रह्म" इति महावाक्यघटकस्य मन्त्रस्य पूर्णतया इह उद्धारः कृतः।

या सत्ता व्यक्तौ बोधविशेषान् सन्निवेशयति चालयति च सा सत्तैव प्रपञ्चशरीरेऽपि स्थित्वा चालयति। एवं व्यक्तिगतबोधसत्ता तथा प्रपञ्चगता बोधसत्ता च एकैव। एतयोः उक्तैक्यस्य स्थापनायैव प्रज्ञानं ब्रह्मेत्युक्तं वर्तते।

मुमुक्षवः साधकाः वैराग्यं प्राप्य अनन्तरं "कोऽयं आत्मेति वयमुपास्महे कतरस्स आत्मा"[2] इति स्वयम् अन्विष्यन्ति। इयमवस्था तेषु कञ्चन अनुभवविशेषं समुत्पादयति। तथा च ते प्रज्ञापरं सर्वेषां पर्यवसानम्, तस्मात् 'प्रज्ञानं परं ब्रह्म' इति निगमनं प्राप्नुवन्ति। 'प्रज्ञानं

ब्रह्म' इत्येतद् सिद्धान्तवाक्यं भवति। ब्रह्मणः स्वरूपम् अनेन सिद्धान्तयितुं ते यतन्ते। अत्र प्रज्ञानं इति, ब्रह्म इति च द्वे पदे अन्तर्भूते। अनयोः पदयोः वाच्यार्थस्य लक्ष्यार्थस्य च विशकलनानन्तरमेव वाक्यस्य अस्य सत्ता केति अवगन्तुं शक्यते।

'अयं जीवात्मा' – अहं ब्रह्मेति वाच्यार्थः। अत्र नेदं समञ्जसं प्रतिभाति। कुत इति चेत् जीवः परिमितः ब्रह्म तु अपरिमितः। 'प्रज्ञानं ब्रह्म' इति महावाक्यस्थस्य प्रज्ञानशब्दस्य जीव इत्यर्थः। जीवस्तु अन्तःकरणे प्रतिबिम्बरूपेण वर्तमानम् आत्मचैतन्यम्। अन्तःकरणस्य इयं परिणतिः वृत्तिपदेन गृह्यते। वृत्तयः मनो बुद्ध्यहङ्कार-चित्तस्वरूपाः। श्रोत्रादि पञ्चेन्द्रियाणि अपेक्ष्य बुद्ध्यहङ्कारादयः अन्तर्भागे वर्तन्ते इत्यतः अन्तःकरणसंज्ञया व्यवहारः। अन्तःकरणस्य बिम्बस्तु कूटस्थचैतन्यं भवति। तदेव आत्मचैतन्यनाम्ना व्यवह्रियते। सर्वाणि प्रापञ्चिकानि कार्याणि तस्मिन् अध्यसितानि वर्तन्ते। अन्तःकरणे प्रतिबिम्बितस्य कूटस्थचैतन्यस्य चिदाभाससंज्ञयापि व्यवहारः। अनेन जडरूपोऽप्यहङ्कारः चेतनात्मकतया प्रतिभाति। बुद्धिचित्तादीनामपि चैतन्यवत्त्वमपि प्रतीतिः परम्। जीवस्य कूटस्थचैतन्यस्य तस्य

उपाधिभूतस्य अन्तःकरणस्य च धर्मवैशिष्ट्यम् अस्ति। अतः जीवस्य कर्तृत्वाभिमानः भोक्तृत्वाभिमानश्च अस्ति। अयम् अभिमानः भ्रान्तिजन्यः न तु वास्तविकः। अधिष्ठानभूते कूटस्थचैतन्ये जीवभावः अध्यसितः वर्तते। इयं रीतिः रज्जुसर्पवत्। एवं रीत्या विचारे कृते प्रज्ञानपदस्य अर्थः न जीवः इति अपि तु कूटस्थ इति अवगन्तुं शक्यते। वाच्यार्थस्य स्थाने लक्ष्यार्थस्वीकाराय इदम् अलम्। ब्रह्मशब्दस्य वाच्यार्थलक्ष्यार्थौ उभौ स्तः। ब्रह्मादिस्तम्भपर्यन्तानां चराचरात्मकानां चैतन्यम् अनेन क्रियते इत्यभिमानमादायैव ब्रह्मचैतन्यस्य वाच्यार्थः वक्तव्यः। अभिमानहीनस्य मायातीतया वर्तमानस्य परमात्मचैतन्यस्य ग्रहणं ब्रह्मशब्दस्य लक्ष्यार्थमादाय। तदनुसारेण "प्रज्ञानं ब्रह्म" इत्यस्य सर्वान्तर्यामितया स्थितं कूटस्थचैतन्यम् एव उपाधिरहितत्वेन स्थितं परब्रह्म।

अयं प्रज्ञानरूपः आत्मा परं ब्रह्म भवति। स एव इन्द्रः। स एव प्रजापतिः। सर्वे देवाः तथा च पृथिवीवायुराकाशजलादयः तेजश्च पञ्चभूतानि स एव। अयमेव क्षुद्रजीविनां कारणं तथा अन्येषाम् अण्डजजरायुजस्वेदजोद्भिजाश्वगोमनुष्यगजानां च कारणम्। उक्तानि

विहाय ये पादचारिणः पतत्रिणः वृक्षपर्वतादयः स्थावराः ते सर्वेऽपि उक्ते चैतन्ये वर्तन्ते। लोकाः प्रज्ञानेत्रवन्तः। प्रज्ञा परं सर्वेषां लक्ष्यस्थानम्। अतः 'प्रज्ञानं' एव परं ब्रह्म इति महावाक्यघटकस्य उपनिषन्मन्त्रस्य सामान्याशयः।

४.१. शङ्करमतम्

अधुना अद्वैतमतानुसारेण श्रीशङ्कराचार्यस्य भाष्यमधिकृत्य वच्मि। भाष्ये "स एष प्रज्ञानरूप आत्मा ब्रह्मापरं सर्वशरीरस्थः प्राणः प्रज्ञात्मा"।[3] अयमेव प्रज्ञानरूपः आत्मा "अपरब्रह्मपदेन" व्यवह्रियते। तदेव "ब्रह्मापरं" इति श्रीशङ्कराचार्येणोक्तम्। वस्तुतः सम्पूर्णे शरीरे प्राणो वर्तते सः प्रज्ञात्मा भवति। अथ भाष्यम् - "अन्तःकरणोपाधिष्वनुप्रविष्टो जलभेदगतसूर्यप्रतिबिम्बवद्धिरण्यगर्भः प्राणः प्रज्ञात्मा।[4] प्रज्ञात्मानं प्रत्येव श्रीशङ्करः विशदीकरोत्यत्र। विभिन्नजलपात्रेषु दृश्यमानानि भिन्नानि प्रतिबिम्बकानि यथा, तथा अयं प्रज्ञात्मा अन्तःकरणोपाधिषु अनुप्रविष्टो वर्तते। स हिरण्यगर्भः प्राणविशेषः प्रज्ञात्मा भवति। "एषः एव इन्द्रः गुणविशेषकारणात् देवराजो भवति।

प्रथमोत्पन्नः देहधारी प्रजापतिर्वा। तदुक्तं भाष्ये "एष एव इन्द्रो गुणाद्देवराजो वा। एष प्रजापतिर्यः प्रथमजः शरीरी"[5]

अस्मात् प्रजापतेः सकाशात् मुखात् निर्भेदद्वारा अग्निप्रभृतयः लोकपालाः जाताः। स एव प्रजापतिरिति शङ्करभाष्ये। उक्ताः एते अग्न्यादयः अपि प्रजापतिरेव। इतोपरि निर्दिष्टानि सर्वाण्यपि प्रजापतिरेवेति वक्तुं यतते श्रीशङ्करः, यथा - "इमानि च सर्वशरीरोपादानभूतानि पञ्च पृथिव्यादीनि महाभूतान्यन्नान्नादत्वलक्षणान्येतानि किञ्च इमानि च क्षुद्रमिश्राणि क्षुद्रैरल्पकैर्मिश्राणि, इवशब्दोऽनर्थकः, सर्पादीनि बीजानि कारणानीतराणि चेतराणि च द्वैराश्येन निर्दिश्यमानानि"।[6] पृथिव्यादि पञ्चभूतानां, क्षुद्रजीविनां, सर्पादीनां, बीजजानां, भिन्नभिन्नप्राणिनां च स्वरूपं स एव।

इदानीं श्रीशङ्करः अण्डजानि, पक्ष्यादीनि इत्यादिरीत्या यानि उक्तानि तानि पृथक्-पृथक् वक्तुं यत्नं कुरुते। तेषु अण्डजानि पतत्रिणः, जारुजानि मनुष्यादीनि। स्वेदजाः तु यूकमत्कुणादयः, भूमिं भित्वा यानि बीजानि भूमेरुपरि प्रत्यक्षाणि भवन्ति तान्यपि प्रजापतिविशेष एव। एवं अन्ये अश्वादयोऽपि प्राणिविशेषाः यथा स्थावरजङ्गमात्मकाः

इत्यपि उक्तं श्रीशङ्करेण। तदनन्तरं तेन महावाक्यविवरणाय प्रज्ञानेत्रमप्यधिकृत्य उच्यते - "सर्वं तदशेषतः प्रज्ञानेत्रम्"।[7] सर्वं सः इत्यस्य सः सर्वेषां प्रज्ञानेत्र इत्यर्थः। इत्थं "प्रज्ञप्तिः प्रज्ञा तच्च ब्रह्मैव"।[8] एवं यस्य नेत्रं प्रज्ञा भवति स एव प्रज्ञानेत्रः। महाप्रलयकालेऽपि सर्वे प्रज्ञाश्रितो भवन्ति। तदुक्तं भाष्ये- "प्रज्ञाने ब्रह्मण्युत्पत्तिस्थितिलयकालेषु प्रतिष्ठितं प्रज्ञाश्रयमित्यर्थः"।[9]

एवं सर्वेऽपि लोकाः प्रज्ञारूपनेत्रवन्तः भवन्ति। जगतः सम्पूर्णस्य अस्य आश्रयोऽपि प्रज्ञा एव। तदुक्तं श्रीशङ्करेण महावाक्यमनुसृत्य तद् ब्रह्म "तस्मात्प्रज्ञानं ब्रह्म"।[10] तस्य स्वरूपमाह "तदेतत्प्रत्यस्तमित-सर्वोपाधिविशेषं सन्निरञ्जनं निर्मलं निष्क्रियं शान्तमेकमद्वयं "नेति नेति"[11] इति श्रीशङ्करः। यः सम्पूर्णः औपाधिकविशेषरहितः नित्यः, निरञ्जनः, निर्मलः, निष्क्रियः, एकः, अद्वितीयो भवति तद् ब्रह्म समस्तविषयाणां बाधापूर्वकं ज्ञानं तथा समस्तशब्दजालैः अगोचरं च। तदुक्तं श्रीशङ्करेण "सर्वविशेषापोहसंवेद्यं सर्वशब्दप्रत्ययागोचरम्"।[12] सोऽयं ईश्वरस्वरूपः अन्तर्यामीनामकः, हिरण्यगर्भनामकः, विराट्प्रजापतिनामकः, देवतानामकः च। उक्तेषु सर्वेषूपरि अणुसंज्ञादारभ्य

गजसंज्ञापर्यन्तं स एव। तदुक्तं भाष्ये- “तदत्यन्तविशुद्धप्रज्ञोपाधिसम्बन्धेन सर्वज्ञमीश्वरं सर्वसाधारणाव्याकृतजगद्बीजप्रवर्तकं नियन्तृत्वादन्तर्यामिसंज्ञं भवति। तदेव व्याकृतजगद्बीजभूतबुद्ध्यात्माभिमानलक्षणहिरण्यगर्भसंज्ञं भवति। तदेवान्तरण्डोद्भूतप्रथमशरीरोपाधिमद्विराट्प्रजापतिसंज्ञं भवति। तदुद्भूताग्न्याद्युपाधिमद्देवतासंज्ञं भवति। तथा विशेषशरीरोपाधिष्वपि ब्रह्मादिस्तम्बपर्यन्तेषु तत्तन्नामरूपलाभो ब्रह्मणः”[13]

श्रीशङ्करः महावाक्यस्यास्य विवरणं मनुस्मृत्या पर्यवसानं करोति। “प्रज्ञानं ब्रह्म” इति महावाक्योक्तस्य ब्रह्मणः प्रजापतिः, हिरण्यगर्भः, अन्तर्यामी इत्यादीनि नामानि प्रदत्तानि दृश्यन्ते। तद्वत् मनुनापि ब्रह्मणः अस्य अग्निः, प्रजापतिमनुः इन्द्रः, प्राणः, शाश्वतब्रह्म इत्यादीनि नामानि प्रदत्तानि दृश्यन्ते। यथा–

“एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम्।
इन्द्रमेकेऽपरे प्राणमपरे ब्रह्म शाश्वतम्”।।[14]

४.२. मध्वमतम्

अधुना माध्वमतानुसारेण “प्रज्ञानं ब्रह्म” इति महावाक्यस्य समीक्षा क्रियते। श्रीशङ्कराचार्येण “प्रज्ञानं ब्रह्म” इति महावाक्यस्य भाष्यं

विस्तृततया कृतं दृश्यते। मध्वाचार्येण तु 'नवपद्यपादैः "प्रज्ञानं ब्रह्म" इति ऐतरेयोपनिषद्घटकस्य महावाक्यस्य भाष्येण व्याख्या कृता दृश्यते। श्लोकानाम् एषां लघुटिप्पणिरपि वर्तते।

विषयेऽस्मिन् श्रीमध्वाचार्यस्य श्लोकभाष्यं यथा-

"ब्रह्मा शिवश्च शक्रश्च देवाश्चान्ये समस्तशः।
तथैव पञ्चभूतानि पुण्यपापविमिश्रिताः।।
क्षुद्रात्मानस्तु ये मर्त्या इतरे असुरा अपि।
सर्वं जगदिदं विष्णोर्वशे तिष्ठति सर्वदा।।
तेनैव नीयते नित्यं तस्मिन्नेव प्रतिष्ठितम्।
मुक्ता येऽलोकनामानो नीयन्ते तेऽपि विष्णुना।।
स्वयं चानन्यनिष्ठत्वात् प्रतिष्ठेत्यभिधीयते।
देशतः कालतश्चैव गुणतश्चातिपूर्तितः।।
विष्णोर्ब्रह्मेति नामैतन्मुख्यतोऽन्यत्र न क्वचित्।"[15]

अत्र पद्यात्मके भाष्ये ब्रह्मा, शिवः, शक्रः, अन्ये समस्तदेवाः, तथा पृथिव्यप्तेजोवाय्वाकाशात्मकानि पञ्चभूतानि पुण्यपापविमिश्रिताः

सन्तीति। इमानि सर्वाणि क्षुद्रमिश्राणि। ये मर्त्याः क्षुद्रात्मानः। इतरे असुराः अपि, सर्वं तत् प्रज्ञानेत्रम् प्रज्ञाने प्रतिष्ठितम्। मतेऽस्मिन् विष्णोः अतीव वैशिष्ट्यं वर्तते। सर्वमिदं जगत् सर्वदा विष्णोर्वशे तिष्ठतीति तस्य अभिप्रायः। जगदिदं सर्वं विष्णुनैव नीयते। तस्मिन् विष्णौ एव इदं जगत् नित्यं प्रतिष्ठितं वर्तते। ये मुक्ताः तेऽपि विष्णुना नीयन्ते। विष्णुः स्वयं न कदापि अन्यस्मिन् तिष्ठति। अत एवोक्तं मध्वेन "स्वयं च अनन्यनिष्ठत्वात् प्रतिष्ठेत्यभिधीयते"। अत्र विष्णुरेव ब्रह्म। स एव प्रज्ञानम्। प्रज्ञानं ब्रह्म।

४.३. रामानुजमतम्

इदानीं रामानुजमतानुसारेण "प्रज्ञानं ब्रह्म" इति महावाक्यस्य समीक्षा करणीया वर्तते। पूर्वोक्तवत् इदं महावाक्यमपि "एष ब्रह्मैष" इत्यारभ्य ऐतरेयोपनिषत्स्थस्य अन्त्यांशभूतं वाक्यम्। श्रीशङ्कराचार्य-मतावतरणवेलायाम् उपनिषद्वाक्यं यथातथं तत्र निबद्धमासीत् इत्यतः तदेव पुनरपि इह नावर्तते। उपनिषदां व्याख्यानम् श्रीरामानुजाचार्येण भाष्यरूपेण न पृथक् कृतमित्यतः महाशयस्यास्य आशयः तत्प्रस्थानानुसारिणां विद्वद्वराणां मतं स्वीकृत्य प्रतिपादयितुं यत्नं कुर्वे।

अस्य महाशयस्य अनुयायिषु भरद्वाजरामानुजाचार्यस्य प्रतिपदार्थदीपिका नाम व्याख्यानुसारेण अयमवसरः महावाक्यस्य अस्य समीक्षायाः।

अत्रत्यस्य "ब्रह्मैष" शब्दस्य आत्मशब्दप्रतिपाद्यः श्रीमन्नारायण इत्यर्थः। सः बृहत्वादि गुणयुक्तो वा। इदं व्याख्यानमनुसृत्य नारायण एव सर्वान्तर्यामित्वेन सर्वशरीरत्वेन सर्वशब्दवाच्यत्वेन व्यवह्रियते। उक्तस्य कार्यस्य समर्थनाय व्याख्याता तैत्तिरीयनारायणोपनिषदं प्रमाणत्वेन स्वीकरोति यथा-

"यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः"।।[16]

"एष इन्द्रः प्रजापतिः" इत्यनेन नारायणः इन्द्रराज उच्यते। अत्रत्यः "प्रजापतिः" सृष्टेः प्रथमोत्पन्नः ब्रह्माण्डशरीरी विराट्। "इमानि पञ्चमहाभूतानि" इत्यस्य अण्डावरणादुद्भूतमहाभूतानि पृथिवीवाय्वाकाशापोज्योतींष्येतानि। क्षुद्रमित्राणीत्यस्य सर्पादीनि। बीजानि इत्यस्य कारणभूतानि। इतराणि पक्ष्यादीनि जरायुजानि मनुष्यादीनि इत्यर्थः। अन्यभाष्यवत् शिरोरुहेषु उत्पन्नानि यूकादीनि एवं वृक्षादीनि

समस्तमपि प्राणिजातं यत् पद्भ्यां चलति, पक्षैः उड्डीयते पतत्रिणः सर्वमपि "प्रज्ञानेत्रं" प्रज्ञानमित्यर्थः। "यः सर्वज्ञः सर्ववित्"[17] इति श्रुत्या सर्वज्ञः परमात्मा इत्यर्थः। तैत्तिरीयोपनिषद् आनन्दवल्ल्यां "प्रज्ञाप्रज्ञया सर्वं वस्तुजातं तत्सृष्ट्वा तदेव अनुप्राविशत्"।[18] प्रज्ञाने प्रतिष्ठितमित्यस्य प्रज्ञानशब्दवाच्ये परब्रह्मणि सर्वं जगत् प्रतिष्ठितमित्यर्थः। प्रज्ञा परमात्मा प्रतिष्ठा सर्वप्रपञ्चाश्रय इत्यर्थः। अत्रत्यप्रज्ञानशब्दवाच्यमेव ब्रह्म बृहत्वादिगुणयुक्तश्रीमन्नारायण इत्यर्थः।

रङ्गरामानुजस्य "प्रकाशिका" व्याख्यानुसारेण प्रज्ञैव नेत्रमस्येति प्रज्ञानेत्रं, नीयते अनेनेति नेत्रम् अन्तर्यामीत्यर्थः। 'प्रज्ञानं ब्रह्म' इत्यस्य प्रज्ञानमेव ब्रह्म इत्यर्थः। तस्य सर्वान्तर्यामित्वेन स्वरूपतो गुणतश्च निरतिशयबृहत्वस्य प्रज्ञान एव सत्त्वात् इत्युक्तं तत्र।

रामानन्दविरचितम् आनन्दभाष्यमनुसृत्य एष ब्रह्मा इत्यस्य पूर्ववर्णितो हिरण्यगर्भः। इन्द्रशब्देन देवराजत्वेन प्रसिद्धः शतक्रतुः। प्रजापतिरित्यस्य प्रजानामुत्पादको देवः। एते सर्वे प्रसिद्धाः देवाः वह्निवायुप्रभृतयः ते सर्वेऽपि प्रज्ञानस्य नामधेयानि। अर्थात् प्रज्ञानस्वरूपस्य उपास्यस्य आत्मनः शरीराणि। यानि पञ्चभूतानि

तान्यपि प्रज्ञानस्य नामधेयानि। अण्डजानि इत्यस्य बककाकादीनीत्यर्थः। जारुजानि मनुष्यशरीराणि। स्वेदजानि-घर्मोदकं शरीरद्रवभूतं तस्माज्जातानि यूकमत्कुणादि शरीराणि। पृथिव्याः ऊर्ध्वभागं विदार्य जातानि लतावृक्षादीनि उद्भिजानि। एवं सर्वे प्राणिसमूहाः, जङ्गमाः ये तिष्ठन्तः आसते, न चलन्ति तत्सर्वं समग्रमेव प्रज्ञानेत्रम्। प्रज्ञानस्वरूपं ब्रह्मैव सर्वस्य जगतः आश्रयः। तस्मात् "प्रज्ञानं ब्रह्म"। एवं क आत्मेति प्रश्नोत्तरं तु "प्रज्ञानं ब्रह्मेति"।

गोपालानन्दस्य सुबोधिनीव्याख्यानानुसारेण ब्रह्माण्डोदरवर्तिनः ब्रह्मादयः सर्वात्मा। स्वेदजानि, उद्भिजानि च अयोनिजराशिः। स्थावरमित्यस्य तरुगुल्मादि। शेषं प्रायेण पूर्ववत्। तत्सर्वं प्रज्ञानेत्रम्। प्रज्ञानं परमात्मा। जन्मस्थितिलयसमये अस्य प्रतिष्ठा प्रज्ञाने परमात्मन्येवेति तदिदं प्रज्ञाने प्रतिष्ठितम्। लोकोऽयं प्रज्ञाननयनः। सर्वस्यास्य प्रतिष्ठा- स्थितिः स्थानं प्रज्ञैव। प्रज्ञैव प्राज्ञः। परमात्मा इति यावत्। एवं सर्वप्रतिष्ठाभूतं प्रज्ञानमेव परं ब्रह्म। तैत्तिरीयानन्द-वल्ल्यामपि एतदुक्तं वर्तते "सत्यं ज्ञानमनन्तं ब्रह्म"।[19] अत्र ज्ञानशब्देन ब्रह्म उक्तं वर्तते।

अन्योपनिषदन्तर्गतानि "प्रज्ञानं ब्रह्म" इति महावाक्यसदृशानि कानिचन वाक्यानि

सदृशवाक्यानि	उपनिषद्	पुटसंख्या
१) कविर्मनीषी परिभूः स्वयम्भूः। (मनीषी-ज्ञानवान् ब्रह्म)	ईशावास्योपनिषद् मन्त्रः ८	3 112 UPANIṢADS I Part
२) श्रोत्रस्य श्रोत्रं, मनसः मनः, वाचः वाचम् इत्यादयः ज्ञात्वा लोकात् प्रेत्य अमृताः भवन्ति (ज्ञानभेदार्जनेन ब्रह्मत्वम्)	केनोपनिषद् मन्त्रः १-२	5 112 UPANIṢADS I Part
३) यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्मत्वम्। (यद्वाचा न प्रकाशितं, येन वाक् प्रकाशिता तदेव ब्रह्म)	केनोपनिषद् मन्त्रः १-४	6 112 UPANIṢADS I Part
४) यन्मनसा न मनुते येनाहुर्मनो मतम्। तदेव ब्रह्म।	केनोपनिषद् मन्त्रः १-५	6 112 UPANIṢADS I Part
५) यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति (प्रज्ञानं) तदेव ब्रह्म	केनोपनिषद् मन्त्रः १-६	6 112 UPANIṢADS I Part

६) विद्यया विन्दतेऽमृतम्	केनोपनिषद् मन्त्रः २-४	7 112 UPANIṢADS I Part
७) अक्षरं ज्ञात्वा (प्रज्ञानेन) यदिच्छसि तस्य तत् (ब्रह्मप्राप्तिः)	कठोपनिषद् मन्त्रः २-१६	20 112 UPANIṢADS I Part
८) यः नरः विज्ञानसारथिः (प्रज्ञावान्)। सः अध्वनः पारम् आप्नोति (ब्रह्म प्राप्नोति)	कठोपनिषद् मन्त्रः ३-९	22 112 UPANIṢADS I Part
९) विज्ञानं ब्रह्मज्येष्ठम् उपासते। (विज्ञानरूपं ब्रह्म ज्येष्ठज्ञानम्)	तैत्तिरीयोपनिषद् मन्त्रः ५	88 उपनिषत्सर्वस्वम्
१०) ज्ञानमनन्तं ब्रह्म (सत्यं ज्ञानञ्च ब्रह्म)	तैत्तिरीयोपनिषद् मन्त्रः-ब्रह्मानन्दवल्ली १-१	71 112 UPANIṢADS I Part
११) विज्ञानं ब्रह्मेत्युपास्ते	छान्दोग्योपनिषद् मन्त्रः ७-७-२	186 112 UPANIṢADS I Part
१२) यो विज्ञानमन्तरो यमयति एष त आत्मा अन्तर्यामी अमृतः। (प्रज्ञानं ब्रह्म)	बृहदारण्यकोपनिषद् मन्त्रः ३-७-२२	257 112 UPANIṢADS I Part
१३) अयं विज्ञानमयः	बृहदारण्यकोपनिषद् मन्त्रः ४-३-७	274 112 UPANIṢADS I Part

१४) शाश्वतविज्ञान- समरसात्माहम् (शाश्वतविज्ञानं प्रज्ञानं ब्रह्म)	आत्मबोधोपनिषद् मन्त्रः २-१०	37 112 UPANIṢADS II Part
१५) सत्यं ज्ञानमनन्तं ब्रह्म	सर्वसारोपनिषद् मन्त्रः १२	463 112 UPANIṢADS I Part
१६) ज्ञानमयोऽमलः आत्माहम्	सर्वसारोपनिषद् मन्त्रः १९	464 112 UPANIṢADS I Part
१७) विज्ञान आत्मा तु	कठरुद्रोपनिषद् मन्त्रः २३	366 112 UPANIṢADS II Part
१८) ब्रह्म...... सत्यज्ञानाद्वयात्मकम्	कठरुद्रोपनिषद् मन्त्रः २७	367 112 UPANIṢADS II Part
१९) विज्ञानं सुखात्मानं स्वयंप्रभम् (प्रज्ञानं ब्रह्म)	नारदपरिव्राज- कोपनिषद् मन्त्रः ६-१३	71 112 UPANIṢADS II Part
२०) विज्ञानमानन्दं ब्रह्म	महोपनिषद् मन्त्रः २-९	220 112 UPANIṢADS II Part
२१) प्रज्ञानमेव तद्ब्रह्म	महोपनिषद् मन्त्रः ४-८१	239 112 UPANIṢADS II Part
२२) विज्ञानमनन्तं ब्रह्म	शाण्डिल्योपनिषद् मन्त्रः २-२	197 112 UPANIṢADS II Part

परामर्शाः

1. ऐतरेयोपनिषद् - 3-1-3
2. ऐतरेयोपनिषद् - 3-1-1
3. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 219
4. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 219
5. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 219
6. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 219
7. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 220
8. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 220
9. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 220
10. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 220
11. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 220
12. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 220
13. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 220
14. मनुस्मृतिः - 12-123
15. श्रीमहैतरेयोपनिषद्भाष्यम् - पुटसंख्या - 361
16. तैत्तिरीयनारायणोपनिषद् - 94
17. मुण्डकोपनिषद् - 1-1-7
18. तैत्तिरीयोपनिषद् आनन्दवल्ली - 30
19. तैत्तिरीयोपनिषद् आनन्दवल्ली - 2-1

पञ्चमोऽध्यायः

"तत्त्वमसि" इति महावाक्यस्य अन्वेषणात्मकं पठनम्

"तत्त्वमसि" इदीदं महावाक्यं सामवेदान्तर्गतं छान्दोग्योपनिषत्स्थं भवति। सृष्टेः प्राक् एकमेवाद्वितीयं ब्रह्म परम् आसीत्। प्रापञ्चिकानि नामरूपाणि न कान्यप्यासन्। इदानीमपि अर्थात् सृष्टेः पश्चादपि सा परमात्मसत्ता निर्विकाररूपेण नामरहितेन अद्वितीयभावेन भासते।

"तत्त्वमसि" इत्ययं मन्त्रभागः छान्दोग्योपनिषदि मन्त्रेषु अन्यूनतया अनतिरिक्ततया च दृश्यते। यथा–

१) अध्यायः - ६, खण्डः - ८, मन्त्रः - ७
२) अध्यायः - ६, खण्डः - ९, मन्त्रः - ४
३) अध्यायः - ६, खण्डः - १०, मन्त्रः - ३
४) अध्यायः - ६, खण्डः - ११, मन्त्रः - ३
५) अध्यायः - ६, खण्डः - १२, मन्त्रः - ३
६) अध्यायः - ६, खण्डः - १३, मन्त्रः - ३
७) अध्यायः - ६, खण्डः - १४, मन्त्रः - ३
८) अध्यायः - ६, खण्डः - १५, मन्त्रः - ३
९) अध्यायः - ६, खण्डः - १६, मन्त्रः - ३

‘तत्त्वमसि’ इति महावाक्यस्यस्थं ‘तत्’ इति पदं निर्विकारस्वरूपां परमात्मसत्तां सूचयति। जिज्ञासुं प्रत्येव खलु गुरुः महावाक्यम् उपदिशति। शिष्यरूपेण देहेन्द्रियात्मना स्थितं शिष्यादुपरि सदा प्रकाशमानां बोधसत्ताम् एव इह ‘त्वम्’ इति पदेन विवक्ष्यते। प्रपञ्चसृष्टेः पूर्वं या सत्ता आसीत् सा सत्ता तथा च शिष्यशरीरे प्रकाशमाना बोधसत्ता च एका अस्ति इत्येतदेव अनेन ‘असि’ इति पदेन उद्दिश्यते। एवं ‘असि’ इति पदं जीवात्मपरमात्मनोः ऐक्यं प्रतिपादयति। एतत् ऐक्यं साक्षात्कुरु इत्येतदेव तत्त्वमसि इति वाक्येनानेन गुरुः शिष्यम् उपदिशति। एवं तत् ब्रह्म, शिष्यः त्वम् असि-भवसि इति अस्य महावाक्यस्य आशयः।

इदं महावाक्यं छान्दोग्योपनिषदि वर्तमानायां “स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच”[1] श्रुतौ अन्तर्भवति।

किञ्च महावाक्यस्य अस्य अन्यमहावाक्यापेक्षया किञ्चिद्वैशिष्ट्यं वर्तते। गुरुशिष्यसंवादान्तर्गतं भवति इदं वाक्यं इत्येव अस्य वैशिष्ट्यम्। शिष्यस्य अज्ञानस्य अपनोदनं कृत्वा तं प्रबुद्धं कर्तुं महावाक्येनानेन परिश्रमः। तस्मादेव अस्य प्राधान्यम्। आचार्येण श्रीशङ्करेण सप्ताशीत्यात्मकः श्लोकः ‘तत्त्वोपदेश’ नाम्ना प्रथितः

ग्रन्थः लिखितो वर्तते। तस्माद् 'तत्त्वमसि' इति महावाक्यसम्बद्धाः केचन श्लोकाः दीयन्ते। तदपि महावाक्यस्यास्य महत्त्वे निदानम्।

"त्रिविधा लक्षणा ज्ञेया जहत्यजहती तथा।
अन्योभयात्मिका ज्ञेया तत्राद्या नैव संभवेत्।।
"तथैव प्रकृते तत्त्वमसीत्यत्र श्रुतौ श्रृणु।
प्रत्यक्त्वादीन्परित्यज्य जीवधर्मांस्त्वमः पदात्"।।

"तत्त्वमोः पदयोरैक्यमेव तत्त्वमसीत्यलम्।
इत्थमैक्यावबोधेन सम्यग्ज्ञानं दृढं नयैः।।"[2]

आरुणिः उद्दालकमहर्षिः आत्मनः पुत्रं श्वेतकेतुम् उपदिशति। हे पुत्र त्वं ब्राह्मणः असि। किन्तु ब्राह्मणोचितसंस्कारान् न पालयति। अतः तेनोक्तं नैतद् रोचते। नेदं अस्माकं कुलौचित्याय भवति। अतः योग्यं गुरुं प्राप्य उपनयनादिकं कृत्वा उपदिष्टो भव। पितुः उपदेशं स्वीकृत्य श्वेतकेतुः द्वादशवर्षपर्यन्तं गुरुकुलवासं कृतवान्। प्रत्यागतं पुत्रं विनयरहितं दृष्ट्वा उद्दालकमहर्षिः उवाच। भवतः औद्धत्ये किं कारणम्? गुरोः सकाशात्कां विद्यां स्वीकृतवान् विनयराहित्याय। यत् ज्ञाते अश्रुतं श्रुतवत्, अचिन्तितं चिन्तितवत्, अज्ञातं ज्ञातवत् प्रतिभाति तां विद्यां प्रति त्वं गुरुं पृष्टवानसि किम्?। श्रुत्वैतत् पुत्रः श्वेतकेतुः अद्भुतस्तब्धो बभूव। न सः तादृशीं विद्यां श्रुतवान्। अस्याध्ययनं न

पूर्णमिति मत्वा पिता तं पुनरपि गुरुकुलं प्रेषयिष्यति वा? इति विचिन्त्य स बिभेति। अतः श्वेतकेतुः कौशलेन प्रत्युत्तरं दत्तवान्। गुरुः तादृशीं विद्यां न जानाति। अतः भवन्तः एव कृपया तां विद्यां माम् उपदिशन्तु। तच्छ्रुत्वा करुणार्द्रः आरुणिः उद्दालकः 'तत्त्वमसि' इति महावाक्येन तं प्रबुद्धं करोति।

'तत्त्वमसि' इति महावाक्ये 'तत्' 'त्वम्' 'असि' इति पदत्रयं वर्तते इत्युक्तं पूर्वम्। अत्र 'तत्' पदस्य वाच्यार्थः ईश्वर इति। 'त्वं' पदस्य वाच्यार्थः जीव इति। 'असि' इति क्रियापदं 'तत्' 'त्वम्' इत्यनयोः संयोजकम्। एवं स्थिते "तत्त्वमसि" इति वाक्यं जीवेश्वरैक्यप्रतिपादकं भवति। जीवेश्वरयोः ऐक्यं समीचीनमिति न प्रतिभाति। जीवः लौकिकानां दुःखानां वशंवदः। ईश्वरः न कदापि दुःखस्य वशंवदः। जीवः किञ्चिज्ज्ञः। ईश्वरः सर्वज्ञः। जीवः परिमितः। ईश्वरः अपरिमितः। एवं रीत्या न कदापि अनयोः एकत्वसङ्कल्पः युज्यते। खद्योतभान्वोः ऐक्यप्रतिपादनं यावन्मात्रम् असङ्गतं भवति तावन्मात्रं जीवेश्वरयोः ऐक्यम् असङ्गतं भवति। अतः लक्ष्यार्थमादायैव अत्र अर्थकथनं युज्यते। 'त्वं' पदस्य लक्ष्यार्थः कूटस्थचैतन्यम्। देहेन्द्रियबुद्धिरहङ्कारादौ अहमित्यभिमानः यदा सञ्जायते तदा 'त्वं' पदस्यार्थः जीव इति प्रतिभाति।

"सा इयम् अणिमा" यत् भवति तत् भवति सर्वम्। एताः सर्वाः ऐतदात्म्यं भवति। तत् सत्यं भवति। हे श्वेतकेतो तत् आत्मा भवति। तत् त्वं भवसि इति। वारं वारं हे भगवन् मां प्रबोधय इति। हे सोम्य तथा भवतु इति सः गुरुः उवाच इति मन्त्रसारः।

५.१. शङ्करमतम्

अत्र श्रीशङ्कराचार्यः– सत्तारूपेण कथिता इयम् अणिमा, अणुभावः जगतः मूलं भवति। एषां सर्वेषाम् इदं सत् आत्मा भवति तद् एतदात्मा तस्य भाव एव ऐतदात्म्यम्। तदुक्तं भाष्ये- "स यः सदाख्य एष उक्तोऽणिमाणुभावो जगतो मूलमैतदात्म्यमेतत्सदात्मा यस्य सर्वस्य तदेतदात्मा तस्य भाव ऐतदात्म्यम्"।[3]

सर्वस्य जगतः आत्मत्वं सदाख्येन अनेन आत्मना भवति। अस्मादन्यः संसारीभूतः आत्मत्वेन अस्य नास्ति। तदुक्तं भगवत्पादेन- "एतेन सदाख्येनात्मनात्मवत्सर्वमिदं जगत्। नान्योऽस्त्यस्यात्मा संसारी"[4] उक्तार्थस्य सोत्प्रेक्षितत्वनिरसनाय बृहदारण्यकोपनिषदः श्रुतिं च सः अत्र उद्धरति। यथा-

"नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ"।[5] अर्थात् तस्मादन्यः द्रष्टा नास्ति। तस्मादन्यः श्रोता नास्ति। येन आत्मना एतानि जगत्स्वरूपाणि आत्मवन्ति भवन्ति तत्परं सदाख्यं सत्याख्यं च

परमार्थसत्। तदुक्तं आचार्येण "येन चात्मनात्मवत्सर्वमिदं जगत्तदेव सदाख्यं कारणं सत्यं परमार्थसत्"।[6] तस्मात् कारणात् तदेव परं जगतः आत्मा प्रत्यक्स्वरूपश्च। सत्यस्य तत्त्वस्वरूपं, याथात्म्यञ्च तदेव। आचार्यः आशयस्यास्याविष्कारम् इत्थं करोति- "अतः स एवात्मा जगतः प्रत्यक्स्वरूपं सत्तत्त्वं याथात्म्यम्"[7]। यथा गोप्रभृतयः शब्दाः इव प्रत्यगात्मनि केवलः आत्मशब्दः रूढः वर्तते। अतः हे श्वेतकेतो तद् सत् त्वं भवसि। अस्य आशयस्य भाष्यं -"आत्मशब्दस्य निरुपपदस्य प्रत्यगात्मनि गवादिशब्दवन्निरूढत्वात्। अतस्तत्सत्त्वमसीति हे श्वेतकेतो"[8] इति। प्रकृतस्य महावाक्यस्य एतावता कथनेन समीक्षां कृत्वा अन्ते विषयान्तरं प्रतिपादयति अत्रत्येन उपनिषद्भागेन। तत्तु पुत्रस्य सोम्यस्य सुषुप्तिकाले यद्यपि सत्तास्वरूपेण सर्वाः प्रजाः युज्यन्ते तथापि तत् कुतो न जानन्ति इति प्रश्नावतरणमेव।

इदानीं "तत्त्वमसि" इति महावाक्यतया प्रथितस्य अस्य व्याख्यानम् अद्वैतमतानुसारेण कृतम्। महावाक्यस्यास्य द्वैतानुसारेण विवरणवेलायां किञ्चित् वक्तव्यम् अवशिष्यते। स तु "स आत्मा तत्त्वमसि" इति रीत्या महावाक्यस्वरूपस्याङ्गीकारः साधु उत वा "स आत्माऽतत्त्वमसि इति वाक्यस्वरूपम् आदाय वा इत्येतद् आश्रित्य वर्तते। महावाक्यस्वरूपं प्रश्लेषहीनतया अद्वैतवेदान्तिनां साधु। प्रश्लेषेण साकं महावाक्यस्य स्वरूपस्वीकारः द्वैतिनां साधु।

अनयोर्मध्ये कस्य समीचीनत्वम् इति निर्णेतुं केन शक्यते। पक्षान्तरेण उभावपि साधु इति वक्तव्यम्। श्रीशङ्करकालादारभ्यैव उपनिषदः प्रचुरप्रचारं प्राप्तवत्यः। अतः प्रश्लेषहीनतया महावाक्यस्वरूपः अनेकेषां मनसि वर्तते। प्रथमप्रचारः अद्वैतस्येवेत्यतः तद्रीत्या गृहीतं स्यात्। पश्चात्काले द्वैतस्यापि प्रचारे सम्पन्ने प्रश्लेषेण साकमपि महावाक्यस्यास्य प्रचारः समजनि इति भाति। वेदस्तु अद्वैतिनां द्वैतिनां च प्रमाणतया वर्तते। अतः पक्षद्वयमपि साधुताम् उपयाति।

रुचिवैचित्र्यमनुसृत्य सर्ववादानाम् अवस्थितिः लोकेऽस्ति। तस्मादेव अद्वैतवेदान्तप्रवर्तकश्रीशङ्करवत् द्वैतवेदान्तप्रवर्तकस्य श्रीमध्वाचार्यस्यापि वादमुखः आद्रियते।

सामान्यजनानां मध्ये अद्वैतवेदान्तः प्रायेण बौद्धिकः, द्वैतवेदान्तस्तु प्रायेण लौकिकः। लोकाः इच्छानुसारेण कस्यापि अनुयायिनः सन्तु। भिन्नाशयाविष्कारो न दोषाय। अपितु आत्मनः चिन्तासरणेः पोषणाय परम्।

५.२. मध्वमतम्

'स आत्माऽतत्त्वमसि' (स आत्मा तत्त्वमसि) इति महावाक्यघटकस्य उपनिषद्भागस्य श्लोकेन अष्टकेन व्याख्यानं श्रीमध्वाचार्येण कृतं दृश्यते। तत्र श्लोकभाष्यस्य प्रथमो भागः इत्थम्-

"योऽसौ नियमनाद् विष्णुः सारत्वात् स इति स्मृतः।
अणिमा सूक्ष्मतो गम्य ऐतदात्म्यं च तद्वशम्।।
परानन्दत्वतः सत्य आत्मा पूर्णगुणत्वतः।
सत्यतो नासि तत् त्वं हि माभूत् ते स्तब्धता ततः"[9]

सदा यः सदाख्यः उक्ताणुभावो जगतो मूलम्। एतेन सदाख्येनात्मना आत्मवत् सर्वमिदं जगत् नान्योऽस्त्यस्यात्मा संसारी इति यावत्। तत् सत् 'त्वमसि' इति असत् इत्येव श्रीमध्वाचार्यः। 'स यः' इत्यादिकं भगवन्नामैवेति भावेन तन्निर्वचनमिदम्।

ऐतदात्म्यमिति वाक्यं न जीवेश्वराभेदपरम्। "तत्त्वमसि" इत्यैक्यमुच्यत इत्यसत्। ऐतदात्म्यमित्यादिना गतार्थत्वप्रसङ्गात्"[10] इत्युक्तं भाष्ये। "सत्यतो नास्ति तत् त्वम्" इत्यनेन श्वेतकेतुः त्वम् 'अतत्' तदन्यत् वस्त्वसि इति व्याख्यातम्। तस्मात् कारणात् "ते स्तब्धता माभूदिति"। इतोपरि पञ्चाधिकश्लोका अपि प्रस्तुतस्य उपनिषद्वाक्यस्य व्याख्यानरूपेण लिखिताः दृश्यन्ते श्रीमध्वाचार्येण।

"असुराः स्तब्धतां याता ब्रह्माहमिति मानिनः।
असत्यं जगदित्याहुः सिद्धोहं बलवानिति।।
अनीश्वरं जगच्चाहुरप्रतिष्ठं तथैव च।
चेतनैकत्वविषयान् वेदानाहुश्च सर्वशः।।

कुतर्कपरमा नित्यं न सहन्ते गुणान् हरेः।
शास्त्रतत्त्वमविज्ञाय ब्रूयुर्देवेषु चैकताम्।।
यान्ति चैव तमो घोरं परमात्मविनिन्दकाः"[11]

श्रीमध्वाचार्यमतानुसारेण ब्रह्माहमिति मानिनः असुराः स्तब्धतां याताः। ते असत्यं जगदित्यप्याहुः अनीश्वरं जगच्चाहुः। ते कुतर्कपरमाः हरेः गुणान् न सहन्ते। शास्त्रतत्त्वम् अविज्ञायैव देवेषु चैकतां ब्रूयुः। ते घोरं तमः यान्ति इत्येव आचार्यस्य अस्य अभिप्रायः। कारिकायां "सिद्धोऽहं" इति वचनेन प्रत्यक्षादिप्रमाणेन जगतः सत्यत्वावगमे सूचना।

इदानीं विशिष्टाद्वैतरीत्या 'तत्त्वमसि' इति महावाक्यस्य अध्ययनं करणीयं वर्तते।

५.३. रामानुजमतम्

उपनिषदां भाष्यं श्रीरामानुजाचार्येण श्रीशङ्कराचार्यमध्वाचार्यवत् न विशिष्य कृतमिति उक्तं खलु। आद्ययोः 'अयमात्मा ब्रह्म' 'प्रज्ञानं ब्रह्म' इत्यनयोः महावाक्ययोः विवरणं श्रीरामानुजाचार्यस्य शिष्याणां मतमादाय कृतमस्ति। 'तत्त्वमसि' इति तृतीयमहावाक्यविषये रामानुजाचार्यस्यास्य वेदार्थसंग्रहं नामकं ग्रन्थमाश्रित्य निर्वोढुम् इह परिश्रमः क्रियते। वेदार्थसङ्ग्रहे तत्त्वमसि इति श्रुत्यर्थनिगमननामके

उपशीर्षके तत् कथितं वर्तते। यथा "सर्वस्य चिदचिद्वस्तुनः ब्रह्मशरीरत्वात् सर्वशरीरं सर्वप्रकारं सर्वैः शब्दैः ब्रह्मैवाभिधीयते इति 'तत् त्वम्' इति सामानाधिकरण्येन जीवशरीरतया जीवप्रकारं ब्रह्मैव अभिहितम्। एवमभिहिते सति, अयमर्थो ज्ञायते - 'त्वम्' इति यः पूर्वदेहस्याधिष्ठातृतया प्रतीतः सः परमात्मशरीरतया परमात्मप्रकारभूतः परमात्मपर्यन्तः। अतः 'त्वम्' इति शब्दः तत्प्रकारविशिष्ट तदन्तर्यामिणमेव आचष्टे इति"।[12]

अस्मिन्नेव ग्रन्थे उपरिभागे "तत्त्वमसि श्वेतकेतो",[13] "तस्य तावदेव चिरम्"[14] इति च श्रूत्या "ऐक्यज्ञानमेव परमपुरुषार्थलक्षणमोक्षसाधनं गम्यत"[15] इत्युक्तम्। ऐक्यज्ञानस्य विरोधात् "एतत् अपरमार्थसगुणब्रह्मप्राप्ति-विषयम् इत्यभ्युपगन्तव्यम्"[16] इत्युक्तम्।

"पृथक्त्वज्ञानस्यैव साक्षादमृतत्त्वप्राप्तिसाधनत्वश्रवणात् विपरीतं कस्मान्न भवति"?[17] अस्मिन् विषये एतदपि उक्तं भवति "द्वयोस्तुल्ययोर्विरोधे सति, अविरोधेन तयोर्विषयः विवेचनीयः इति"।[18] अस्मिन् विषये अविरोधः रामानुजवाचा इत्थम् "अन्तर्यामिरूपेण अवस्थितस्य परस्य शरीरतया प्रकारत्वात् जीवात्मनः तत्प्रकारं ब्रह्मैव 'त्वम्' इति शब्देन अभिधीयते। तथैव ज्ञातव्यमिति, तस्य वाक्यस्यार्थः। एवम्भूताज्जीवात्, तदात्मतया अवस्थितस्य परमात्मनः निखिलदोषरहिततया सत्यसङ्कल्पत्वादि अनवधिकातिशयासंख्येयकल्याणगुणाकरत्वेन च

यः पृथग्भावः सः अनुसन्धेय इति अस्य वाक्यस्य विषयः इत्ययमर्थः पूर्वमेव असकृदुक्तः"[19] इति।

किञ्च "तत्त्वमसि" इति महावाक्यं जीवेश्वरयोः एकतामेव कथयतीति अद्वैतिनः। वस्तुतस्तु तद् एकतां न कथयति। अत्र जीवे ब्रह्मबुद्धिं विधाय केवलं सङ्केतयति, अर्थात् अत्र जीवे ब्रह्मबुद्धेः विधानं क्रियते। यथा पाषाणादिनिर्मितायां प्रतिमायाम् ईश्वरबुद्धिं सङ्कल्प्य उपासना क्रियते, तद्वदिह जीवे ईश्वरबुद्धिं निधास्यते 'तत्' 'त्वम्' इत्यनेन। यथा प्रतिमा ईश्वरः नास्ति, तद्वदिह तद् ब्रह्म त्वं जीवो नास्ति। केवला ब्रह्मबुद्धिरिह आरोप्यते। अर्थात् जीवे ब्रह्मबुद्धिम् आरोप्य साधकाः उपासनां कुर्युः इत्येतन्मात्रं वाक्येनानेन निर्दिष्टम्।

अतः जीवेश्वरयोः भेद एव 'तत्त्वमसि' इति महावाक्यस्य साक्षादर्थः। एवं महात्मा रामानुजः ब्रह्मजीवैक्यसिद्धान्तं निरस्तवान्। जीवः पूर्वजन्मकृतसंस्कारानुसारेण जन्म गृह्णाति। तदनुसारेण विहिताः सुखदुःखादयः अनुभूयन्ते च। अतः न कदापि जीवब्रह्मणोरैक्यम्। वस्तुतस्तु जीवः भोक्ता, ब्रह्म प्रेरकः। मृत्युकाले जीवात्मा शरीरम्, अन्यानि भौतिकानि वस्तूनि च त्यक्त्वा ईश्वरसमीपं गच्छति इति छान्दोग्योपनिषदि कथितं वर्तते। यथा - "एवमेवैषा संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरूप संपद्य स्वेन रूपेणाभिनिष्पद्यते"।[20]

कठोपनिषदपि जीवब्रह्मणोः अनेकतां समर्थयति। तौ छायातपरूपौ इत्युक्त्वा तत्र भेदं प्रदर्शयति। यथा–

“ऋतं पिबन्तौ सुकृतस्य लोके
गुहां प्रविष्टौ परमे परार्धे।
छायातपौ ब्रह्मविदो वदन्ति
पञ्चाग्नयो ये च त्रिणाचिकेताः।।”[21]

स्तुतयः स्मृतयश्च जीवस्य तिर्यङ्मनुष्यादिभेदान् प्रतिपादयन्ति। यदि जीवब्रह्मणोः ऐक्यं सत्यं स्यात्तर्हि विभजनमिदम् असङ्गतं स्यात्। एवं ‘तत्त्वमसि’ इति वाक्यम् उपासनायाः सङ्केतमेव सूचयतीति विशिष्टाद्वैतवादी।

अन्योपनिषदन्तर्गतानि "तत्त्वमसि" इति महावाक्यसदृशानि कानिचन वाक्यानि

सदृशवाक्यानि	उपनिषद्	पुटसंख्या
१) तत्त्वमेव त्वमेव तत्	कैवल्योपनिषद् मन्त्रः १६	345 112 UPANIṢADS I Part
२) त्वं ब्रह्म	बृहदारण्यकोपनिषद् मन्त्रः १-५-१७	228 112 UPANIṢADS I Part
३) त्वमात्मासि यस्त्वमसि	कौषीतकि ब्राह्म- णोपनिषद् मन्त्रः ६	389 112 UPANIṢADS I Part
४) सर्वमिदं ब्रह्म शुद्धस्त्वमिति	महोपनिषद् मन्त्रः १०४	622 उपनिषत्सर्वस्वम्
५) ब्रह्म तत्त्वमसि	शाण्डिल्योपनिषद् मन्त्रः २-४	197 112 UPANIṢADS II Part
६) तत्त्वमसि	गणपत्युपनिषद् मन्त्रः १	401 112 UPANIṢADS II Part

परामर्शाः

1. छान्दोग्योपनिषद् - 6-8-7
2. तत्त्वोपदेशः श्लोकाः - 32, 40, 42
3. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 515
4. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 515
5. बृहदारण्यकोपनिषद् - 3-8-11
6. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 515
7. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 515
8. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 515
9. छान्दोग्योपनिषद्भाष्यम् - पुटसंख्या - 537
10. छान्दोग्योपनिषद्भाष्यम् (पदार्थकौमुदी) - पुटसंख्या - 539
11. छान्दोग्योपनिषद्भाष्यम् - पुटसंख्या - 540
12. वेदार्थसंग्रहः - पुटसंख्या - 19
13. छान्दोग्योपनिषद् - 6-8-7
14. छान्दोग्योपनिषद् - 6-14-2
15. वेदार्थसंग्रहः - पुटसंख्या - 91
16. वेदार्थसंग्रहः - पुटसंख्या - 91
17. वेदार्थसंग्रहः - पुटसंख्या - 91
18. वेदार्थसंग्रहः - पुटसंख्या - 91
19. वेदार्थसंग्रहः - पुटसंख्या - 92
20. छान्दोग्योपनिषद् - 8-12-2
21. कठोपनिषद् - 1-3-1

षष्ठोऽध्यायः

“अहं ब्रह्मास्मि” इति महावाक्यस्य गहनतमं पठनम्

“अहं ब्रह्मास्मि” इति महावाक्यं महावाक्यचतुष्टये चतुर्थं महावाक्यं भवति। अत्र ‘अहम्’ शब्देन जीवः सूच्यते। अतः शब्दस्यास्य अर्थः जीवात्मा इति। वाक्यस्थं द्वितीयं पदं ‘ब्रह्म’ इति। तृतीयं तु ‘अस्मि’ इति। एवं ‘अहं’, ‘ब्रह्म’, ‘अस्मि’ इति पदत्रयस्य समाहारः इदं महावाक्यम्। अत्रापि किञ्चिद्वक्तव्यं वर्तते। जीवब्रह्मणोः भिन्नस्वभावत्वात् उभयोः ऐक्यम् असमीचीनं प्रतिभाति। ‘जीवः’ यथा नानात्वद्योतकं भवति तथा ‘ब्रह्म’ तु एकत्वबोधकम्। जीवः – जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, नश्यति, इत्यादीनाम् अधीनः भवति। ब्रह्मणः तादृशी अवस्था नास्ति। यथा जीवस्य परिच्छिन्नत्वं तथा ब्रह्मणः अपरिच्छिन्नत्वमेव।

जीवस्य कर्तृत्वाभिमानः अस्ति ब्रह्मणः न। एवं रीत्या विचारे कृते अनयोः भिन्नतापरं सत्यं प्रतिभाति, न एतयोः ऐक्यम्। ‘अहं ब्रह्मास्मि’ इत्युक्ते ‘अहमिति’ परिमितः, ‘ब्रह्म’ इति अपरिमितश्च भेदं विना वर्तते इति प्रतीतिं जनयति। अतः अत्रत्यस्य अहं शब्दस्यापि कथनं न युज्यते। कूटस्थचैतन्यं परं लक्ष्यते। अतः अहं शब्दस्य

वाच्यार्थत्वे यद्यपि जीवार्थः साधु, लक्ष्यार्थत्वे सोऽर्थः न साधु किन्तु कूटस्थार्थः परं साधु। कूटस्थार्थस्तु आत्मचैतन्यमेव तद् एकम् अद्वितीयं च। देशकालाभ्याम् अपरिच्छेद्यश्च।

अहं शब्दस्य व्युत्पत्तिः एवमस्ति यथा न हन्यते इत्यहम्। तथा अहं शब्दार्थः न कदापि हन्तुं योग्यः इति सिद्ध्यति। अवस्थात्रयेऽपि स शब्दः प्रकाशमानः वर्तते। न ईषदपि ऊनमत्र। उक्तार्थं लौकिकेन दृष्टान्तेन समर्थये। लोके पुरुषः अन्येषां विषयमधिकृत्य अभावसङ्कल्पं करोति। किन्तु "अहं नास्मि" इति रीत्या विचिन्तयितुं न कोऽपि प्रभवति। अतः अत्र अहं शब्दस्य ब्रह्मसाधर्म्यम्। अतः एव कदापि न कोऽपि ब्रह्म नास्तीति वदति। एवं प्रकृतमहावाक्यस्थस्य 'अहं' शब्दस्य कूटस्थचैतन्यरूपः अहमित्यर्थः। तस्मादेव कारणात् "अहं ब्रह्मास्मि" इति वाक्यं युक्ततमम्।

अत्र दोषकथनं प्रदर्श्यते। लोके सर्वे "अहमिति" वदन्ति। अत्र अहं शब्दस्य नानात्वं प्रतीयते। प्रतिव्यक्तिभिन्नत्वात् 'अहं' शब्दस्य कूटस्थभावे नानात्वम् आपद्यते खलु। नास्य संशयस्य अवकाशः। 'अहं' शब्दः प्रायेण न युक्तार्थं प्रकटयति। सन्दर्भम् अनुसृत्य शरीरेन्द्रियमनोबुद्ध्यहङ्कारादीनां प्रयोगः 'अहं' शब्देन क्रियते। शरीरादयः उपाधयः न त्वहम्। यथा 'घटः' घटाकाशस्य उपाधिः भवति तथा शरीरादयः आत्मचैतन्यस्य उपाधयः। बहुघटनिष्ठाः घटाकाशाः

आकाशस्य एकत्वं न घ्नन्ति। अत्र उपाधिगतस्य आकाशस्य परिच्छिन्नत्वं कल्पितं परम्। अतः 'अहं' शब्दः यद्यपि अनेकेषु व्यवहाराय वर्तते तथापि घटाकाशानां नानात्वेऽपि आकाशस्य नानात्वं नास्ति। तद्रीत्या यद्यपि अनेकैः अहं शब्दः व्यवहाराय प्रयुज्यते तथापि नानात्वं नास्ति। इदानीं प्रकृतमहावाक्यान्तभूर्तस्य उपनिषद्भागस्य उद्धरणं युक्तं प्रतिभाति। तथा च – "ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत्। अहं ब्रह्मास्मीति। तस्मात्तत्सर्वमभवत्तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणां तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति। तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति तस्य ह न देवाश्च नाभूत्या ईशते। आत्मा ह्येषां स भवति। अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेव स देवानाम्। यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युरेवमेकैकः पुरुषो देवान्भुनक्त्येकस्मिन्नेव पशावादीयमानेऽप्रियं भवति किमु बहुषु तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः"[1]

उपनिषन्मन्त्रस्यास्य सामान्योऽर्थः यथा इदं ब्रह्म पूर्वमेव ब्रह्म आसीत्। सः ब्रह्मस्वरूपः स्वयम् आत्मानम् अवेत् - 'अहं ब्रह्मास्मि' इति। तस्मात् तत् सर्वं सञ्जातम्। तद् देवानां मध्ये यत् साक्षात्क्रियते तद् एव तदभवत्। तदेव तद् ब्रह्मस्वरूपम् अभवत्। एवं ऋषीणां

मध्ये मनुष्याणां मध्ये च तद् साक्षात्चकार। वामदेवः ऋषिः सर्वात्मभावं प्राप्तवान् खलु। यथा- अहं मनुः-मनुष्यः अभवम्। सूर्यः च अभवम्। तदिदं ब्रह्म अधुनापि यः पुरुषः 'अहं ब्रह्मास्मि' इति रीत्या जानाति सः इदं सर्वं भवति। तस्य पुरुषस्य देवाः अपि ऐश्वर्यहननाय न प्रभवन्त्येव। सः एषामपि आत्मा सञ्जातः भवति खलु। किञ्च यः पुरुषः स्वात्मस्वरूपात् अन्यां देवताम् उपास्ते सः अन्यः। अहम् अन्यः अस्मि इति सः न जानाति। सः देवानां कृते गोवत् भवति। तत्तु यथा बह्व्यः गावः, मनुष्यं पालयन्ति तद्वत् अविद्वान् एकैकः पुरुषः देवान् पालयति। एकस्यां गवि परं चूषणे कृते अप्रियं भवति। एवं सति बहुषु स्वीकृतेषु अप्रियाधिक्यं प्रति किं वक्तव्यं वा। अतः मनुष्याः यत् ब्रह्मतत्त्वं विद्युः, तद् एषां देवानाम् अप्रियं भवति।

'अहं ब्रह्मास्मि' इति महावाक्यस्य शाङ्करभाष्यं विवरणसौकर्याय **क्रमानुगतसंख्यानुसारेण** खण्डशः लिख्यते।

६.१. शङ्करमतम्

१) इदानीं श्रीशङ्कराचार्येण ब्रह्मशब्देन किम् अभिप्रेतमिति विचार्यते। तेनोक्तं ब्रह्मापरम् सर्वभावस्य साध्यत्वोपपत्तेः। अयमाशयः अस्य - अत्र ब्रह्मशब्देन अपरब्रह्म एव अवगन्तव्यम्। कुत इति चेत् न हि तस्य परस्य ब्रह्मणः सर्वरूपो भवतीत्यतः विज्ञानसाध्यं भवितुं

शक्यते। अत्र शङ्करः- "न हि परस्य ब्रह्मणः सर्वभावापत्तिर्विज्ञानसाध्या। विज्ञानसाध्यां च सर्वभावापत्तिमाह - 'तस्मात्तत्सर्वमभवत् इति। तस्माद् ब्रह्म वा इदमग्र आसीदित्यपरं ब्रह्मेह भवितुमर्हति"।[2]

उक्ते भाष्ये परस्य ब्रह्मणः सर्वभावकप्राप्तिः विज्ञानसाध्याय न प्रभवति इत्युक्तम्। 'तस्मात् सर्वमभवत्' इति वाक्येन श्रुतिः सर्वभावप्राप्तिं विज्ञानसाध्यरीत्या कारयति। अतः 'ब्रह्म वा इदमग्र आसीत्' इत्यस्मिन् वाक्ये ब्रह्मपदं अपरब्रह्मवाचकमिति मन्तव्यम्।

२) अथ प्रकृतमहावाक्यघटकस्य उपरिभाष्यम्- "सर्व भविष्यन्तो मनुष्याः मन्यन्ते' इति हि मनुष्याः प्रकृताः, तेषां चाभ्युदयनिःश्रेयससाधने विशेषतोऽधिकारः इत्युक्तं न परस्य ब्रह्मणो नाप्यपरस्य प्रजापतेः"।[3] एतस्य आशयः – अत्र मनुष्याधिकारात् ब्रह्मशब्देन ब्रह्मरूपता-प्राप्तियोग्यस्य ब्राह्मणस्य अवबोधः ब्रह्मशब्देन सञ्जायेत 'सर्व भविष्यन्तो मनुष्याः मन्यन्ते' इति वाक्येन। अत्र मनुष्यग्रहणे प्रसक्तिः कुतः इति चेत् मनुष्याणाम् अभ्युदयः एव निःश्रेयसतया उक्तः। एवं मनुष्याणां परम् अत्र अधिकारः। उपरि इत्थं कथितं वर्तते – परब्रह्म अथवा अपरब्रह्म प्रजापतेः न। पुनरपि अत्र भाष्यविचारः यथा -
३) "अतो द्वैतैकत्वापरब्रह्मविद्यया कर्मसहितया अपरब्रह्मभावमुपसम्पन्नो भोज्यादपावृतः सर्वप्राप्त्योच्छिन्नकामकर्मबन्धनः परब्रह्मभावी ब्रह्मविद्या-हेतोर्ब्रह्मेत्यभिधीयते"।[4] उपर्युक्तभाष्यं प्रकारान्तरेण किं ब्रह्मेत्यभिधीयते।

कर्मसहितस्य द्वैतकत्वरूपस्य अपरब्रह्मविद्याद्वारा अपरब्रह्मभावः प्राप्तः। हिरण्यगर्भसम्बन्धिभोगैः विरक्तम् एवं नानाप्रकारयुक्तकर्मफलस्य प्राप्तेः सम्भवात् अस्य कर्मरूपबन्धनं च विनष्टं सञ्जातं भवति। सः अचिरात् परब्रह्मरूपप्राप्तये योग्यः पुरुषः ब्रह्मविद्यायाः कारणं ब्रह्मशब्देन (४) कथितः। पुनरपि अत्र श्रीशङ्करवचनम् - "दृष्टश्च लोके भाविनीं वृत्तिमाश्रित्य शब्दप्रयोगः- यथा 'ओदनं पचति इति, शास्त्रे च - 'परिव्राजकः सर्वभूताभयदक्षिणाम्' इत्यादि, तथेहेति केचित् - ब्रह्म ब्रह्मभावी पुरुषो ब्राह्मणः- इति व्याचक्षते। तन्न, सर्वभावापत्तेरनित्यत्वदोषात्"।[5] उक्तार्थं श्रीशङ्करः लोकव्यवहारेण इह भाष्यद्वारा समर्थयति। लोकेऽपि भाविनिवृत्तिमाश्रित्य शब्दानां प्रयोगो वर्तते। 'ओदनं पचतीति' दृष्टान्तः। यद्योदनस्य पाको नावश्यकः। पुनः कथं ओदनं पचतीति प्रयोगः? क्रियया अनया भाविनि काले तण्डुलः ओदनो भविष्यति इति बुद्धया इदानीम् ओदनं पचतीति प्रयोगः। एवं शास्त्रेऽपि– 'संन्यासी समस्तभूतानां कृते अभयरूपदक्षिणां दत्त्वा संन्यासम् आचरेत्' इत्यादि वाक्येषु एवं रीत्या प्रयोगः, यदि संन्यासी न तस्य सकाशे यत्किञ्चित् दक्षिणा। सर्वसङ्गत्यागिनां संन्यासिनां हस्ते न किञ्चिदपि शिष्येत। तथापि अत्र संन्यासिनां दक्षिणां प्रति सूचना। इयं रीतिरपि भाविकार्यविज्ञानमादाय। इत्थमेव अत्रापि यः ब्रह्मभावं प्राप्स्यति स ब्राह्मण एव ब्रह्म।

५) 'अहं ब्रह्मास्मि' इति महावाक्यघटकस्य उपनिषद्भागस्य शिष्टेषु वाक्येषु वाक्यद्वयं यथा– "न हि सोऽस्ति लोके परमार्थतो यो निमित्तवशाद्भावान्तरमापद्यते नित्यश्चेति। तथा ब्रह्मविज्ञाननिमित्तकृता चेत्सर्वभावापत्तिः, नित्या चेति विरुद्धम्। अनित्यत्वे च कर्मफलतुल्यतेत्युक्तो दोषः"।[6] किन्तु वस्तुतः तथा न उक्तेन प्रकारेण सर्वभावप्राप्तेः अनित्यत्वदोषः आपद्यते। लोके इत्थं रीत्या किमपि वस्तु न वर्तते यत् वस्तुतः येन केनापि वा निमित्तेन भावान्तरं प्राप्नोति तथा नित्यत्वेनापि भाति। उक्तरीत्या सर्वभावस्य प्राप्तिरपि ब्रह्मविज्ञानरूपेण प्राप्नोति तथापि नित्यो भवति, तद्रीत्या कथनं विरुद्धमापद्यते। यदि तत् अनित्यतया स्वीक्रियते तर्हि तदपि कर्मफलेन तुल्यं प्रतिभाति इति दोषोऽपि अत्र कथितो वर्तते।

६) पुनरपि प्रस्तुतमहावाक्यघटकं भाष्यम्– "अविद्याकृतासर्वत्वनिवृत्तिं चेत्सर्वभावापत्तिं ब्रह्मविद्याफलं मन्यसे, ब्रह्मभाविपुरुषकल्पना व्यर्था स्यात्, प्राग्ब्रह्मविज्ञानादपि सर्वो जन्तुब्रह्मत्वान्नित्यमेव सर्वभावापन्नः परमार्थतः, अविद्यया त्वब्रह्मत्वमसर्वत्वं चाप्यारोपितं यथा शुक्तिकायां रजतम्, व्योम्नि वा तलमलवत्वादि, तथेह ब्रह्मण्यध्यारोपितमविद्यया अब्रह्मत्वमसर्वत्वं च ब्रह्मविद्यया निवर्त्यत इति मन्यसे यदि, तदा युक्तम् यत्परमार्थत आसीत्परं ब्रह्म, ब्रह्मशब्दस्य मुख्यार्थभूतं 'ब्रह्म वा इदमग्र आसीत्' इत्यस्मिन्वाक्ये उच्यते इति वक्तुम् यथाभूतार्थवादित्वाद्वेदस्य।

न त्वियं कल्पना युक्ता, ब्रह्मशब्दार्थ विपरीता ब्रह्मभावा पुरुषो ब्रह्मेत्युच्यत इति श्रुतहान्यश्रुतकल्पनायाः अन्याय्यत्वात्वान्महत्तरे प्रयोजनान्तरेऽसति[7]

इदानीम् उपर्युक्तभाष्यस्य समीक्षा क्रियते। यदि त्वम् अविद्याकृतस्य असर्वत्वस्य निवृतिं हि ब्रह्मविद्यायाः सर्वभावप्राप्तिरूपस्य फलस्य रूपेण अनुमन्यसे तर्हि ब्रह्मशब्दस्य अर्थे अचिरात् ब्रह्मस्वरूपं प्राप्तुं योग्यस्य पुरुषस्य कल्पनया स्वीकारः व्यर्थः भविष्यति। कुत इति चेत् ब्रह्मज्ञानप्राप्तेः पूर्वमपि समस्तप्राणिनाम् अन्तर्यामितया ब्रह्मरूपत्वमस्तीति सदा एव परमार्थतः सर्वभावस्य प्राप्तिः अस्ति।

अब्रह्मत्वम् असर्वत्वञ्च अविद्यया आरोपितं भवति। यथा 'शुक्तौ रजतप्रतीतिः' तथा स्वरूपतया अखण्डे आकाशे तलादिप्रविभागश्च आरोपित एव। तद्वत् अत्र ब्रह्मणि अविद्यारोपितस्य अब्रह्मत्वस्य तथा असर्वत्वस्य च ब्रह्मविद्यायाः निवृत्तिः इति रीत्या यदि त्वम् अवगच्छसि तर्हि इदं वचनं उचितं प्रतिभाति- यत् परमार्थतः ब्रह्मशब्दश्च मुख्यार्थभूतस्य परब्रह्मणः अस्ति तदेव "ब्रह्म वा इदमग्र आसीत्" इति वाक्ये कथितं वर्तते। कुत इति चेत् वेदः यथार्थप्रवचनं करोति। अतः ब्रह्मशब्देन ब्रह्मशब्दार्थात् विपरीतम् अचिरात् ब्रह्मभावप्राप्तये योग्यः पुरुषः सूचितः इति यत् कथितं वर्तते तन्न उचितम्।

यथाश्रुतार्थस्य त्यागः तथा अश्रुतस्य कल्पनया स्वीकारः अन्याय्यं भवति यावत्पर्यन्तं तादृशकर्मणः महाप्रयोजनं नास्ति।

७) पुनरपि अस्य महावाक्यघटकस्य उपनिषद्भाष्यस्य अंशः यथा- "अविद्याकृतव्यतिरेकेण अब्रह्मत्वमसर्वत्वं च विद्यत एवेति चेन्न, तस्य ब्रह्मविद्ययापोहानुपपत्तेः। न हि क्वचित्साक्षाद्वस्तुधर्मस्यापोढ्री दृष्टा कर्त्री वा ब्रह्मविद्या। अविद्यायास्तु सर्वत्रैव निवर्तिका दृश्यते। तथेहाप्यब्रह्मत्वमसर्वत्वं चाविद्याकृतमेव निवर्त्यतां ब्रह्मविद्यया। न तु पारमार्थिकं वस्तु कर्तुं निवर्तयितुं वार्हति ब्रह्मविद्यया। तस्माद्व्यर्थैव श्रुतहान्यश्रुतकल्पना"।[8] अब्रह्मत्वं तथा असर्वत्वम् च अस्तीति वचनम् न उचितम्। तस्य ब्रह्मविद्या द्वारा निवृत्तिरपि न सम्भवति। ब्रह्मविद्या साक्षाद्रूपेण वस्तुनः धर्मलोपे अथवा प्रादुर्भावे वा निमित्ततया न दृश्यते। तद्वत् अत्रापि यत् अविद्याकृताब्रह्मत्वं तथा असर्वत्वं चास्ति, तयोरपि ब्रह्मविद्यया निवृत्तिः स्यात्। ब्रह्मविद्या तावत् पारमार्थिकवस्तुनः उत्पत्तिं न करोति तथा निवृत्तिमपि न करोति। अतः यथाश्रुतार्थं त्यक्त्वा अश्रुतस्य कल्पना व्यर्था एव।

८) "ब्रह्मण्यविद्यानुपपत्तिरिति चेत्? न, ब्रह्मणि विद्याविधानात्। न हि शुक्तिकायां रजताध्यारोपणेऽसति शुक्तिकात्वं ज्ञाप्यते चक्षुर्गोचरापन्नायाम् - इयं शुक्तिका न रजतम् इति। तथा "सदेवेदं सर्वम्" "ब्रह्मैवेदं सर्वम्" "आत्मैवेदं सर्वम्" "नेदं द्वैतमस्त्यब्रह्म" इति ब्रह्मण्येकत्वविज्ञानं न

विधातव्यं ब्रह्मण्यविद्याध्यारोपणायामसत्याम्"।[9] ब्रह्मविषये अविद्याया प्रसक्तिः असङ्गता खलु इति पूर्वपक्षः। अत्र सिद्धान्ती ब्रह्मणि विद्यायाः विधानं कृतमित्यतः अत्र अविद्यायाः प्रसङ्गो नाशङ्कनीयः शुक्तौ रजताध्यारोपः नास्ति चेत् नेत्रेन्द्रियविषये सञ्जाते इयं शुक्तिः रजतं न इति रीत्या शुक्तिज्ञानस्य अपाकरणं भवति। इत्थं रीत्या यदि ब्रह्मणि अविद्यायाः आरोपो न तर्हि 'सदेवेदं सर्वं'– सर्वमपि सत् परं भवति। 'ब्रह्मैवेदं सर्वम्'– इदं सर्वं ब्रह्मणि वर्तते, 'आत्मैवेदं सर्वम्'– सर्वमपि आत्मा परम्, 'नेदं द्वैतमस्ति अब्रह्म' – अब्रह्मरूपः द्वैतो नास्ति इति रीत्या ब्रह्मणि एकत्वज्ञानविधानम् कर्तुं न शक्यते। पुनरपि उपनिषद्भागस्य श्रीशाङ्करव्याख्यानम्– "न ब्रूमः शुक्तिकायामिव ब्रह्मण्यतद्धर्माध्यारोपेण नास्तीति, किं तर्हि? न ब्रह्म स्वात्मन्यतद्धर्माध्यारोपनिमित्तम् अविद्याकर्तृभ्रान्तं च ब्रह्म। किन्तु नैवब्रह्माविद्याकर्ता चेतनो भ्रान्तोऽन्य इष्यते। "नान्योऽतोऽस्ति विज्ञाता" (बृ.उ. ३-७-२३) "नान्यदतोऽस्ति विज्ञातृ (३-८-११)"।[10]

पुनः पूर्वपक्षः– शुक्तौ रजतप्रतीतिवत् ब्रह्मणि अब्रह्मणः धर्मारोपो नास्ति। अस्माकं कथनन्तावत् इत्थं भवति। ब्रह्म स्वात्मनि अब्रह्मणः धर्मस्य आरोपनिमित्ता अविद्योत्पादिका वा न भवति।

अत्र सिद्धान्ती – अयं न्यायः स्यात् यत् ब्रह्म अविद्यायाः कर्ता न, किन्तु अविद्यायाः कर्ता अन्यः अब्रह्मरूपः भ्रान्तचेतनः।

अस्मादि्भन्नः कोऽपि विज्ञाता नास्ति। अस्मादि्भन्नः यः कोऽपि ज्ञाता नास्ति इत्यपि न।

१०) उक्तविषये उपरिभाष्यं यथा – "तत्त्वमसि" (छा-उ. ६-८-१६) "आत्मानमेवावेत्। अहं ब्रह्मास्मि" (बृ.उ. १-४-१०) "अन्योऽसावन्योऽहमस्मीति न स वेद" (१-४-१०) इत्यादि श्रुतिभ्यः। स्मृतिभ्यश्च– "समं सर्वेषु भूतेषु (गीता-१३-२७) "अहमात्मा गुडाकेश" (गीता १०-२०) "शुनि चैव श्वपाके च" (गीता ५-१८) "यस्तु सर्वाणि भूतानि" इत्यादिभ्यः। "यस्मिन्सर्वाणि भूतानि" (ईशा-उ. ७) इति च मन्त्रवर्णात्"।[11] अधुना अस्य समीक्षा– तद् ब्रह्म त्वम् असि। स्वयम् अवगन्तव्यं यत् 'अहं ब्रह्मास्मीति'। अयमन्यः तस्माद् अहं तस्मादन्योऽस्मि– इत्थं रीत्या यः जानाति वस्तुतः सः किमपि न जानाति इत्याद्यर्थक श्रुतिमनुसृत्य "यः समस्तभूते मां समभावेन वर्तमानतया पश्यति" "हे गुडाकेश अहं ब्रह्मास्मि", "विद्या विनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः" इत्युक्तरीत्या 'यस्मिन् सर्वाणि भूतानि' इत्यादि ईशावास्योपनिषद् वाक्यरीत्या समस्तभूतानाम् आत्मत्वं सिद्ध्यति। अस्मिन् विषये पुनरप्याचार्यः-

११) - "नन्वेवं शास्त्रोपदेशानर्थक्यमिति। बाढमेवम् अवगतेऽस्त्वेवानर्थक्यम्। अवगमानर्थक्यमपीति चेत्? न, अनवगमनिवृत्तेर्दृष्टत्वात्। तन्निवृत्तेरप्यनुपपत्तिरेकत्व इति चेत्? न, दृष्टविरोधात्। दृश्यते

ह्येकत्वविज्ञानादेवानवगमनिवृत्तिः। दृश्यमानमप्यनुपपन्नमिति ब्रुवतो दृष्टविरोधः स्यात्, न च दृष्टविरोधः केनचिदप्यभ्युपगम्यते। न च दृष्टेऽनुपपन्नं नाम, दृष्टत्वादेव। दर्शनानुपपत्तिरिति चेत्तत्राप्येषैव युक्तिः"।[12] इदानीं समीक्षा - उपर्युक्तरीत्या कार्यं भवति चेत् शास्त्रोपदेशस्य आनर्थक्यं प्राप्नोति। अत्र सिद्धान्ती भवतु नाम, इत्थं हि एव, तत्त्वज्ञाने सञ्जाते शास्त्रस्य आनर्थक्यं सिद्धं भवति। अत्र सिद्धान्ती– नैतद् युक्तम्। शास्त्रेण अज्ञानस्य निवृत्तिर्भवतीति सर्वे पश्यन्ति। पुनरपि पूर्वपक्षी – ब्रह्मणः एकत्वावगमे सिद्धे अज्ञाननिवृत्तेः को वा अन्यस्य अवकाशः इत्युच्यते तर्हि अत्र सिद्धान्ती – इत्थं भूतं कथनं मास्तु। उक्तेन आशयेन दृष्टविरोधः सञ्जायते। एकत्वज्ञानेन हि अज्ञाननिवृत्तिः लोके दृश्यते। संवेदने कृते हि तदनुपपन्नं सञ्जायते अर्थात् तादृशेन कथनेन दृष्टविरोधः सञ्जायते, तथा न कोऽपि दृष्टविरोधम् अङ्गीकरोति। यस्य कस्य वा विषयस्य अवबोधनानन्तरं तत्र अनुभूतिर्भवतीति कारणात् अनुपपन्नतया न वक्तुं शक्यते। अनुभवस्यापि यदि अनुपपत्तिः तर्हि अनुपपत्तिरपि अनुभवस्याधारेण सिद्धा सञ्जायेत।

१२) पुनरपि भाष्यम्– "पुण्यं वै पुण्येन कर्मणा भवति" (बृ-उ-३-२-१३) "तं विद्याकर्मणी समन्वारभेते" (४-४-२) "मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः" (प्र-उ-४-९) इत्येवमादिश्रुतिस्मृतिन्यायेभ्यः

परस्मादिलक्षणोऽन्यः संसार्यवगम्यते। तद्विलक्षणश्च परः "स एष नेति नेति" (बृ.उ. ३-९-२६) "अशनायाद्यत्येति" य आत्मापहतपाप्मा विजरो विमृत्युः" (छा.उ. ८-७-१) "एतस्य वा अक्षरस्य प्रशासने" (बृ-उ-३-८-९) इत्यादिश्रुतिभ्यः। कणादाक्षपादादितर्कशास्त्रेषु च संसारविलक्षण ईश्वर उपपत्तितः साध्यते। संसार दुःखापनयार्थित्वप्रवृत्तिदर्शनात्स्फुटमन्यत्वमीश्वरात्संसारिणोऽवगम्यते। "अवाक्यनादरः" (छा.उ-३-१४-२) "न मे पार्थास्ति (गीता-३-२२) इति श्रुतिस्मृतिभ्यः"।[13] अधुना पूर्वपक्षी पुण्यकर्मणा पुरुषः पुण्यात्मा सञ्जायते, पुरुषस्य उपासनाकर्म च तस्य परलोके गतेऽपि अनुसरणं करोति इति वदति। मननक्रियावान्, ज्ञाता, कर्ता, तथा विज्ञानात्मा पुरुषो भवति इत्याद्यर्थकानि उपनिषद्वाक्यानि चत्वारि श्रीशङ्करेण उद्धृतानि। आभिः श्रुतिभिः स्मृतिभिः न्यायैश्च जीवः परमात्मनः भिन्न इति ज्ञानमायाति। तथा च जीवात् विलक्षणः परमात्मा – सः जीवात्मा न कार्यं भवति न वा कारणम्। क्षुधादीनाम् उल्लङ्घनं कृतं वर्तते। यः आत्मा सः निष्पापः, जराशून्यः मृत्युहीनश्च। "निश्चयो हि अस्य अक्षरस्य प्रकृष्टप्रकाशने" इत्यादि श्रुतिभिः सिद्धो भवति। कणादगौतमादीनां तर्कशास्त्रद्वारा अपि युक्त्या संसारिणः जीवात् पृथक्स्थितः ईश्वरः सिद्धीकृतः वर्तते। संसाररूपदुःखस्य निवृत्तिरूपप्रयोजनेन जीवस्य

प्रवृत्तिः द्रष्टुं शक्यत इत्यतः ईश्वरात् जीवस्य अन्यत्वं स्पष्टतया ज्ञातं भवति। "आत्मा तावत् वाक्रहितः, सम्भ्रमशून्यः इति श्रुत्या तथा च हे पार्थ 'न मे किञ्चित् कर्तव्यं वर्तते' इति स्मृत्या च सिद्धं भवति।

१३) पुनरपि श्रीशङ्करभाष्यम्– "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" (छा-उ-८-७-१) "तं विदित्वा न लिप्यते" (बृ.उ-४-४-२३) "ब्रह्मविदाप्नोति परं (तै-उ-२-१-१) "एकधैवानुद्रष्टव्यमेतत्" (बृ-उ-४-४-२०) "यो वा एतदक्षरं गार्ग्यविदित्वा" (३-८-१०) "तमेव धीरो विज्ञाय" (४-४-२१) "प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते" (मु-उ-२-२-४) इत्यादि कर्मकर्तृनिर्देशाच्च"।[14] अस्य समीक्षा यथा-किञ्च स अन्वेषणयोग्यः विशेषरूपतया तं प्रति जिज्ञासां कर्तुं योग्यः। तं ज्ञात्वा न कश्चन तस्मिन् लिप्यते। ब्रह्मवेत्ता परमात्मानं प्राप्नोति, सः एकरूपेण द्रष्टव्यः। हे गार्गि यः कोऽपि एतद् अक्षरम् अविदित्वा, बुद्धिमान् पुरुषः तमेव विदित्वा, प्रणवः धनुः भवति। मनस्तु बाणः। ब्रह्म तु तस्य लक्ष्यम् इत्यादि वाक्यमाध्यमेन जीवेश्वरयोः कर्तृत्वकर्मत्वे निर्देशेन तत्र तस्मिन् भेदसिद्धिम् आप्नोति।

१४) पुनरपि भाष्यम्– "मुमुक्षोश्च गतिमार्गविशेषदेशोपदेशात्। असति भेदे कस्य कुतो गतिः स्यात्? तदभावे च दक्षिणोत्तरमार्गविशेषानुपपत्तिः, गन्तव्यदेशानुपपत्तिश्चेति भिन्नस्य तु परमादात्मनः सर्वमेतदुपपन्नम्"।[15]

मुमुक्षवे देवयानादि गत्युपदेशः अचिराद्धि मार्गविशेषोपदेशश्च भेदे कारणम्। यदि भेदी न स्यात् तर्हि तस्य गमनं कथं भविष्यति? कुतः गमनं भविष्यति। यदि गत्यभावः मन्यते तर्हि दक्षिणायनोत्तरायण मार्गविशेषाणाम् उपदेशः कथम्। तथा गन्तव्यदेशानाम् उपपत्तिरपि नोपपद्येत। एतानि सर्वाणि परमात्मभिन्नम् आत्मानं प्रति उपपन्नं भवति।

१५) पुनरपि भाष्यम्– "कर्मज्ञानसाधनोपदेशाच्च – भिन्नश्चेत् ब्रह्मणः संसारी स्यात् युक्तस्तं प्रत्यभ्युदयनिःश्रेयससाधनयोः कर्मज्ञानयोरुपदेशे नेश्वरस्य आप्तकामत्वात्। तस्माद्युक्तं ब्रह्मेति - ब्रह्मभावी पुरुषः उच्यत इति चेत्?[16] अत्र समीक्षा क्रियते - कर्मसाधनानां ज्ञानसाधनानां च उपदेशेन तयोः भेदः यदि संसारी जीवः ब्रह्मणः भिन्नो भवति तर्ह्येव तमर्थं भोगमोक्षसाधनभूतयोः कर्मज्ञानयोः उपदेशः कर्तुं शक्यते। ईश्वरं प्रति एतयोः उपदेशः कर्तुं न शक्यते। अतः एतत् युक्तं भवति यत् ब्रह्मशब्देन भाविनि काले ब्रह्मभावं प्राप्स्यमानं पुरुषम् उद्दिश्यैव।

१६) अत्र पुनरपि भाष्यविचारः– (एवं चेत्) "नः ब्रह्मोपदेशानर्थक्यप्रसङ्गात्। संसारी चेत् ब्रह्मभाव्यब्रह्म सन् विदित्वात्मानमेवाहं ब्रह्मास्मीति सर्वमभवत्तस्य संसार्यात्मविज्ञानादेव सर्वात्मभावस्य फलस्य सिद्धत्वात्परब्रह्मोपदेशस्य ध्रुवमानर्थक्यं प्राप्तम्"।[17] अत्र सिद्धान्तिपक्षमाह - उक्तरीत्या न कार्याणि युक्ततया प्रतिभान्ति। किमिति चेत् तथा ब्रह्मोपदेश एव व्यर्थताम् आपद्येत। यदि भाविनि

काले ब्रह्मभावं प्राप्स्यमानः संसारी पुरुषः एव अब्रह्मापि स्वयं 'अहं ब्रह्मास्मि' इति मत्वा सर्वभावं प्राप्तवान् इव वर्तते, तस्मै संसारिणे जीवात्मने विज्ञानेन सर्वात्मभावरूपफलप्राप्तिहेतोः परब्रह्मोपदेशस्य निश्चयः वैय्यर्थ्यमापद्येत।

१७) पुनरप्यत्र श्रीशङ्करः– "तद्विज्ञानस्य क्वचित्पुरुषार्थसाधनेऽविनियोगात्संसारिण एवाहं ब्रह्मास्मीति ब्रह्मत्वसम्पादनार्थ उपदेश इति चेत्। अनिर्ज्ञाते हि ब्रह्मस्वरूपे किं सम्पादयेदहं ब्रह्मास्मीति। निर्ज्ञातलक्षणे हि ब्रह्मणि शक्या सम्पत्कर्तुम्"।[18] अस्य समीक्षा इत्थम्- ब्रह्मज्ञानस्य विनियोगः न कुत्रापि पुरुषार्थसाधने कारणम्। अतः संसारिणाम् 'अहं ब्रह्मास्मि' इति ब्रह्मभावसम्पादनाय उपदेशः युक्तः इति वा? ब्रह्मणः स्वरूपं योग्यभावेन अज्ञात्वा 'अहं ब्रह्मास्मि' इत्युपदेशेन संसारी जीवः ब्रह्मस्वरूपस्य सम्यक् रीत्या ज्ञानानन्तरमेव तत्प्राप्तये कृतः यत्नः सफलः भविष्यति।

१८) अत्र भाष्यवचनम्– नः "अयमात्मा ब्रह्म" (बृ-उ-२-५-१९) "यत्साक्षादपरोक्षाद्ब्रह्म" (३-४-१) "य आत्मा" (छा-उ-८-७-१) "तत्सत्यं स आत्मा" छा.उ. ६-८-७) "ब्रह्मविदाप्नोति परम् (तै.उ.२-१-१) इति प्रकृत्य "तस्माद्वा एतस्मादात्मनः" (२-१-१) इति सहस्रशो ब्रह्मात्मशब्दयोः सामानाधिकरण्यादेकार्थत्वमेवेत्यवगम्यते। अन्यस्य ह्यन्यत्वे सम्पत्क्रियते नैकत्वे। "इदं सर्वं यदयमात्मा" (बृ-उ-२-४-६).

इति च प्रकृतस्यैव द्रष्टव्यस्यात्मनः एकत्वं दर्शयति। तस्मान्नात्मनो ब्रह्मत्वसम्पदुपपत्तिः"।[19] सिद्धान्ती - नायं विचारः युक्तः। अयमात्मा ब्रह्म भवति, यः साक्षात् अपरोक्षब्रह्म भवति, यः आत्मा अपहतपाप्मा, यः आत्मा सः सत्यः भवति, सः आत्मा भवति, ब्रह्मवेत्ता परमात्मानं प्राप्नोति। एवं रीत्या प्रसङ्गानुसारेण "तस्मादात्मनः आकाशः समजनि" इत्यादि सहस्रशः श्रुतीः आश्रित्य 'ब्रह्म' तथा 'आत्मा' शब्दयोः सामानाधिकरण्यदर्शनात् अनयोः एकार्थत्वम् अवगन्तुं शक्यते। एकस्मात् पदार्थात् अन्यस्य पदार्थस्य भिन्नत्वादेव तस्य तद्रूपतासम्पादनं भविष्यति। यद्येकमात्रं तथा कदापि न भविष्यति। किन्तु अयं यत्किञ्चित् अस्ति सः आत्मा भवति इत्यर्थकेन श्रुत्या आत्मनः एकत्वं प्रदर्शयति। अतः 'आत्मनः कृते' ब्रह्मत्वसम्पादनाय न उपपद्येत।

१९) अत्र पुनः श्रीशङ्करस्य भाष्यवचनम् "न चाप्यन्यत्प्रयोजनं ब्रह्मोपदेशस्य गम्यते, "ब्रह्म वेद ब्रह्मैव भवति" (मु.उ. ३-२-९) "अभयं वै जनक प्राप्तोऽसि" (बृ-उ-४-२-४) "अभयं हि वै ब्रह्म भवति" (४-४-२५) इति च तदापत्तिश्रवणात्। सम्पत्तिश्चेत्तदापत्तिर्न स्यात्। न ह्यन्यस्यान्यभाव उपपद्यते"।[20]

"ब्रह्म वेद ब्रह्मैव भवति" इति उपनिषद्वचनेन ब्रह्मोपदेश एव आत्यन्तिकमुक्तये हेतुः नत्वन्यत्। यः ब्रह्म जानाति सः अभयं प्राप्नोति।

तदुक्तं बृहदारण्यके– "अभयं हि वै ब्रह्म भवति"। यद्यात्मनः ब्रह्मसम्पत्तिः विवक्ष्यते तर्हि तस्य ब्रह्मप्राप्तिः न भवति। कुतः इति चेत् एकस्य वस्तुनः अन्यभावभवनम् असम्भवम्। पुनरपि प्रकृतमहावाक्यसम्बन्धं भाष्यं यथा "वचनात् सम्पत्तेरपि तद्भावापत्तिः स्यादिति चेत्?

न, सम्पत्तेः प्रत्ययमात्रत्वात्। विज्ञानस्य च मिथ्याज्ञाननिवर्तकत्वव्यतिरेकेणाकारकत्वमित्यवोचाम। न च वचनं वस्तुनः सामर्थ्यजनकम्। ज्ञापकं हि शास्त्रं न कारकमिति स्थितिः। "स एष इह प्रविष्टः" (बृ.उ-१-४-७) इत्यादिवाक्येषु च परस्यैव प्रवेश इति स्थितम्। तस्माद् ब्रह्मेति न ब्रह्मभाविपुरुषकल्पना साध्वी"।[21]

तं यथा यथा उपासते तदेव भवति इति वचनेन ब्रह्मसम्पत्तिना ब्रह्मभावस्य प्राप्तिः सुकरी भवति इति चेत् नेति सिद्धान्ती। सम्पत्तिस्तु केवला प्रतीतिः। विज्ञानन्तु मिथ्याज्ञाननिवर्तकं भवति, तदुपरि किञ्चिदपि न करोति। शास्त्रवचनं तु वस्तुषु न किमपि सामर्थ्यं जनयति। शास्त्रं तु केवलं ज्ञापकं खलु, न किमपि कारकम्। "स एष इह प्रविष्टः" तदिदं ब्रह्म अस्मिन् प्रविष्टं भवति इत्यर्थके तस्मिन् वाक्ये परमात्मनः शरीरे प्रवेशः निश्चितः। अतः 'ब्रह्म' शब्देन ब्रह्मभावी पुरुषार्थवाचकः न युक्तः।

२१) पुनरपि महावाक्यभाष्यम् यथा- "इष्टार्थबाधनाच्च। सैन्धवघनवदनन्तरमबाह्यमेकरसं ब्रह्मेति विज्ञानं सर्वस्यामुपनिषदि प्रतिपिपादयिषितोऽर्थः। काण्डद्वयेऽप्यन्तेऽवधारणादवगम्यते "इत्यनुशासनम्" "एतावदरे खल्वमृतत्वम्" इति"।[22]

किञ्च इतोपरि इष्टार्थबाधनाच्च। सैन्धवघनवत् ब्रह्म अविच्छिन्नं, अबाह्यम् एकरसं च भवति। सर्वस्याम् उपनिषदि विषयोऽयम् अभीष्टः भवति।

२२) श्रीशङ्करभाष्यमनुवर्तते- "तथा सर्वशाखोपनिषत्सु च ब्रह्मैकत्वविज्ञानं निश्चितोऽर्थः। तत्र यदि संसारी ब्रह्मणोऽन्य आत्मानमेवावेदिति कल्प्येत, इष्टस्यार्थस्य बाधनं स्यात्। तथा च शास्त्रमुपक्रमोपसंहारयोर्विरोधादसमञ्जसं कल्पितं स्यात्"।[23] अस्य अर्थो यथा सर्वशाखोपनिषदि ब्रह्मैकत्वविज्ञानं निर्णीतं वर्तते। तत्र यदि ब्रह्मभिन्नः संसारी जीवः आत्मानं जानाति तर्हि तत्र इष्टार्थबाधा।

२३) अथ श्रीशङ्कराचार्यस्य भाष्यवचनं यथा- "व्यपदेशानुपपत्तेश्च। यदि च 'आत्मानमेवावेत्' इति संसारी कल्प्येत, ब्रह्मविद्या इति व्यपदेशो न स्यात्। आत्मानमेवावेदिति संसारिण एव वेद्यत्वोपपत्तेः। आत्मेति वेदितुरन्यदुच्यत इति चेन्न, अहं ब्रह्मास्मीति विशेषणात्। अन्यश्चेद्वेद्यः स्यादयमसाविति वा विशेष्येत न त्वहमस्मीति। अहमस्मीति

विशेषणादात्मानमेवावेदिति चावधारणान्निश्चितमात्मैव। तथा च सत्युपपन्नो ब्रह्मविद्याव्यपदेशो नान्यथा। संसारिविद्या ह्यन्यथा स्यात्। न च ब्रह्मत्वाब्रह्मत्वे ह्येकस्योपपन्ने परमार्थतः, तमःप्रकाशाविव भानोर्विरुद्धत्वात्"।[24]

व्यपदेशानुपपत्या अपि संसारी जीवः ब्रह्मशब्दस्य वाच्यः भवितुं नार्हति। 'आत्मानमेवावेत् इति वाक्ये अवबोधक्रियायाः कर्ता संसारी जीवः इत्यवगम्येत तर्हि विद्यायाः अस्याः ब्रह्मविद्येति नाम न युज्येत। कुतः इति चेत् 'आत्मानमेवावेत्' इति वाक्यानुसारेण संसारिणः जीवस्य स्वयं संसारी जीव एव बोधविषयः सम्भवः। आत्मा इति शब्देन कथितः वेद्यविषयः यदि वेत्तुः भिन्नतया कथितः वर्तते तर्हि तन्न युक्तम्। कारणन्तु सः अहमस्मि ब्रह्म इति रीत्या अहं रूपेण विशेषितः वर्तते। यदि वेद्यः वेत्तुः भिन्नः तर्हि तं अयं अथवा सः इत्युक्त्वा विशेषितरूपेण 'अहमस्मीत्युक्तं' न स्यात्। 'अहमस्मि' इति रीत्या विशेषितत्वात् तथा 'आत्मानमेवावेत्' इति रीत्या निश्चितत्वात्, निश्चितरूपात् अस्मात् ज्ञानं सञ्जायते यत् स्वयं आत्मा हि ब्रह्म भवति। इत्थं भूतत्वादेव विद्यायाः अस्याः ब्रह्मविद्या इति नाम उपपन्नं भवति, न अन्यया रीत्या। यद्यन्यथा गृह्यते तर्हि तस्य नाम संसारिविद्या भविष्यति। यथा विरुद्धधर्मत्वात् अन्धकारप्रकाशयोः उभयोः सूर्यस्य धर्मत्वेन वक्तुं न शक्यते तद्वत् एकस्य आत्मनः 'ब्रह्मत्वाब्रह्मत्वं' परमार्थतः न स्यात्।

२४) पुनरपि श्रीशङ्करः उपनिषद्वाक्यार्थविचारे– “न चोभयनिमित्तत्वे ब्रह्मविद्येति निश्चितो व्यपदेशो युक्तः। तदा ब्रह्मविद्या संसारिविद्या च स्यात्। न च वस्तुनोऽर्धजरतीयत्वं कल्पयितुं युक्तं तत्त्वज्ञानविवक्षायाम्, श्रोतुः संशयो हि तथा स्यात्। निश्चितं च ज्ञानं पुरुषार्थसाधनमिष्यते “यस्य स्यादद्धा न विचिकित्सास्ति (छा.उ. ३-१४-४) “संशयात्मा विनश्यति' (गीता ४-४०) इति श्रुतिस्मृतिभ्याम्। अतो न संशयिते वाक्यार्थो वाच्यः परहितार्थिना”।[25]

किञ्च प्रस्तुतविज्ञानाय उभयोः निमित्तत्वम् अस्ति चेत् ब्रह्मविद्या इति निश्चितव्यपदेशः इति तत्र सम्पद्येत। एकस्यामेव वेलायाम् एकस्यैव ब्रह्मविद्या, संसारिविद्या इति आपद्येत। तत्त्वज्ञाननिरूपणमत्र अभीष्टमित्यतः एकस्य द्विप्रकाररीत्यावबोधनम् अर्धजरतीयं भवति। अर्धजरतीयकल्पना शास्त्रे न उचिता। कुत इति चेत् यः इमं शृणोति तस्य विविच्य ज्ञानं न सम्भवति। पुरुषार्थलाभस्तु निश्चितज्ञानेन भवति। यस्य एवंविधः निश्चयः अस्ति, विषयेऽस्मिन् न कोऽपि सन्देहः अस्ति, तद्रीत्या भवितव्यः ब्रह्मसाक्षात्कारः, न तु क्वचिदंशे स्वीकारः क्वचिदंशे परित्यागः ब्रह्मविषये युज्यते। अत्र संशयस्य अवकाशो नास्ति। ‘संशयात्मा विनश्यति’ इति गीता च। अतः अन्येषां हितार्थी संशययुक्तवाक्यानां प्रयोगं वारयेत्।

२५) पुनः श्रीशङ्करः भाष्ये– "ब्रह्मणि साधकत्वकल्पना अस्मदादिष्विह अपेशला 'तदात्मानमेवावेत्तस्मात्तत्सर्वमभवत्' इति– चेत्"?[26]

किन्तु सः आत्मानम् अजानात्– 'किमहं ब्रह्म भवामि। अतः सः सर्वं संजातवान्' अस्य वाक्यस्य अनुसारेण अस्मदादीनाम् इव-ब्रह्मणि साधकत्वकल्पना अयुक्ता प्रतिभाति।

२६) पुनरपि श्रीशङ्कराचार्यः स्वकीये भाष्ये- "न शास्त्रोपालम्भात्। न ह्यस्मत्कल्पनेयम्, शास्त्रकृता तु तस्माच्छास्त्रस्यायमुपालम्भः। न च ब्रह्मण इष्टं चिकीर्षुणा शास्त्रार्थविपरीतकल्पनया स्वार्थपरित्यागः कार्यः। न चैतावत्येवाक्षमा युक्ता भवतः। सर्वं हि नानात्वं ब्रह्मणि कल्पितमेव "एकधैवानुद्रष्टव्यम्" (बृ.उ. ४-४-२०) नेह नानास्ति किञ्चन" (४-४-१९) "यत्र हि द्वैतमिव भवति" (२-४-१४) "एकमेवाद्वितीयम्" (छा.उ. ६-२-१) इत्यादिवाक्यशतेभ्यः। सर्वो हि लोकव्यवहारो ब्रह्मण्येव कल्पितो न परमार्थः सन् इत्यल्पमिदमुच्यते 'इयमेव कल्पना अपेशला इति"।[27]

पूर्वोक्तं वाक्यं न वक्तव्यमिति सिद्धान्ती। शास्त्रार्थः अस्य उपालम्भः, नेयम् अस्माकं कल्पनामात्रम्। किन्तु शास्त्रनिबद्धं भवति। अत एव शास्त्रार्थः स्वीकार्यः एवोक्तम्। ये इच्छन्ति ते पुरुषाः कदापि शास्त्रार्थं विपरीतमादाय अर्थपरित्यागं न कर्तुम् अर्हन्ति। नानार्थस्य

कल्पना ब्रह्मणि कृता दृश्यते। 'ब्रह्म एकरूपेण हि दर्शनीयं' भवति। अत्र अल्पमपि नानात्वं नास्ति। यत्र द्वैतमिव प्रतीयते। एकं हि ब्रह्म अद्वितीयं भवति, इत्यादि रीत्या शतशः वाक्यद्वारा इदं सत्यं कथितम् वर्तते। ब्रह्मणि समस्तोऽपि लोकव्यवहारः कल्पितो वर्तते। परमार्थतस्तु, इदं न सत्। अतः इयं कल्पना न युक्ता। कल्पनया अनया अधमभावं प्राप्नोषि।

२७) श्रीशङ्कराचार्यः पुनः तस्य भाष्ये– "तस्माद् यत्प्रविष्टं स्रष्टृ ब्रह्म तद्ब्रह्म। "वै" शब्दोऽवधारणार्थः। इदं शरीरस्थं यद् गृह्यते, अग्रे प्राक्प्रतिबोधादपि ब्रह्मैवासीत्, सर्वं चेदम्। किन्त्वप्रतिबोधात् अब्रह्मास्म्यसर्वं च' इत्यात्मन्यध्यारोपात् 'कर्ताहं क्रियावान्फलानां च भोक्ता सुखी दुःखी, संसारी' इति चाध्यारोपयति। परमार्थतस्तु ब्रह्मैव तद्विलक्षणं सर्वं च। तत्कथञ्चिदाचार्येण दयालुना प्रतिबोधितम् 'नासि संसारी' इत्यात्मानमेवावेत्स्वाभाविकम्। अविद्याध्यारोपितविशेषवर्जितमिति एव शब्दस्यार्थः"।[28]

उक्तकारणात् यः सृष्टिकर्ता ब्रह्म प्रविष्टम् आसीत् तदेव इदं ब्रह्म। 'ब्रह्म वै' इति वाक्ये 'वै' शब्दः निश्चयार्थकः। 'इदम्' अर्थात् यत् शरीरे वर्तमानतया प्रतीतिं प्रददाति, 'अग्रे बोधात्पूर्वमपि ब्रह्म आसीत्। तद्रीत्या एतत्सर्वमपि आसीत्, किन्तु अज्ञानवशात् आत्मनि 'अहम्

अब्रह्म, असर्वः अस्मि, इत्यादि रीत्या आरोपात् अहं कर्ता भवामि, क्रियावान् भवामि, संसारी भवामि, इत्याद्यारोपान् कुर्वन्ति। वस्तुतः तद् तस्मात् विलक्षणं ब्रह्म तथा सर्वरूपं च। सः दयालुना आचार्येण येन केन प्रकारेण 'न त्वं संसारी असि' इति बोधजननात्परं स्वाभाविकात्मानम् अपश्यत्। 'आत्मानमेव' इत्यत्र 'एव' शब्दस्य अयमभिप्रायः– सः अविद्याद्वारा आरोपितस्य विशेषस्य राहित्येन निर्विशेषम् आत्मानम् अपश्यत्।

२८) पुनरपि श्रीशङ्करः– "ब्रूहि कोऽसावात्मा स्वाभाविकः, यमात्मानं विदितवद्ब्रह्म"[29]

सः स्वाभाविकः आत्मा कः? यं ब्रह्म ज्ञातवान्।

२९) श्रीशङ्करभाष्ये– "ननु न स्मरस्यात्मानम् दर्शितो ह्यसौ, य इह प्रविश्य प्राणित्यपानिति व्यानित्युदानिति समानितीति"।[30]

किं भवतः आत्मनः स्मरणं न वर्तते। यः आत्मा शरीरे प्रविश्य प्राणापानव्यानोदानसमानादिनिष्ठां क्रियां करोति स एव आत्मा।

३०) श्रीशङ्करभाष्ये– "ननु 'असौ गौः असावश्वः' इत्येवमसौ व्यपदिश्यते भवता नात्मानं प्रत्यक्षं दर्शयसि"।[31]

किन्तु 'अयं गौः', 'अयम् अश्वः' इत्यादि रीत्या त्वं तस्य नाम निर्दिशसि खलु, परन्तु आत्मानं न दर्शयसि।

३१) पुनः श्रीशङ्करवचनम्– "एवं तर्हि द्रष्टा श्रोता मन्ता विज्ञाता, स आत्मेति"।[32]

एवं तर्हि यः द्रष्टा श्रोता मन्ता तथा विज्ञाता च भवति स आत्मा इति।

३२) पुनरपि श्रीशङ्कराचार्यः भाष्ये– "नन्वत्रापि दर्शनादि क्रियाकर्तुः स्वरूपं न प्रत्यक्षं दर्शयसि। न हि गतिरेव गन्तुः स्वरूपं छिदिर्वा छेत्तुः"।[33]

उपरि उक्तस्य भाष्यस्य विवरणं यथा– अत्रापि त्वं यः दर्शनादि क्रियां करोति तस्य स्वरूपं प्रत्यक्षं न दर्शयसि। न गमनमेव गन्तुः स्वरूपं, न छेदनमेव छेदकस्य स्वरूपम्।

३३) पुनः आचार्यः– "एवं तर्हि दृष्टेर्द्रष्टा श्रुतेः श्रोता मतेर्मन्ता, स आत्मेति"।[34]

अत्र समीक्षा यथा– एवं तर्हि पुनरपि यः दृष्ट्याः द्रष्टा श्रुतेः श्रोता मतेः मन्ता विज्ञातेः विज्ञाता भवति स एव आत्मा इति रीत्या त्वम् अवबोध।

३४) पुनरत्र श्रीशङ्करभाष्यम्– "नन्वत्र को विशेषो द्रष्टरि? यदि दृष्टेर्द्रष्टा, यदि वा घटस्य द्रष्टा, सर्वथापि द्रष्टैव। द्रष्टव्य एव तु

भवान्विशेषमाह दृष्टेर्द्रष्टेति द्रष्टा तु यदि दृष्टेः, यदि वा घटस्य, द्रष्टा द्रष्टैव"[35]

अनेन द्रष्टरि को विशेषः सञ्जातः? दृष्टेः द्रष्टा भवतु नाम। भवतु नाम घटस्य द्रष्टा। द्रष्टा तावत् सर्वथापि द्रष्टैव वर्तते। दृष्टिं द्रष्टेत्युक्त्वा भवन्तः द्रष्टव्ये विशेषमाह। द्रष्टा भवतु नाम दृष्टेः। भवतु नाम घटस्य द्रष्टा सः द्रष्टा हि भवति।

३५) अथ श्रीशङ्करवचनम्– "न, विशेषोपपत्तेः। अस्त्यत्र विशेषः-दृष्टेर्द्रष्टा स दृष्टिश्चेद् भवति नित्यमेव पश्यति दृष्टिम्, न कदाचिदपि दृष्टिर्न दृश्यते द्रष्टा, तत्र द्रष्टुर्दृष्ट्या नित्यया भवितव्यम्, अनित्या चेद् द्रष्टुर्दृष्टिः, तत्र दृश्या या दृष्टिः सा कदाचिन्न दृश्येतापि, यथानित्यया दृष्ट्या घटादि वस्तु। न च तद्वद् दृष्टेर्द्रष्टा कदाचिदपि न पश्यति दृष्टिम्"।[36]

अस्य विवरणमित्थम्– इत्थं मा वद। घटद्रष्टादृष्टिद्रष्टारौ भेदवत् भवितुमर्हति। अत्र एकः भेदः अस्ति यः दृष्टेः द्रष्टा भवति सः, यदि दृष्टिर्भवति तर्हि तं नित्यं हि पश्यति। किन्तु तथा न भवति। न कदाचित् द्रष्टुः दृष्टिरपि दर्शनाय भवति। अस्यां वेलायां द्रष्टुः दृष्टिः नित्या भवितुमर्हति। यदि द्रष्टुः दृष्टिः अनित्या भवति तर्हि तस्य दृश्यभूता या दृष्टिः अस्ति सा कदापि दर्शनाय न भवति। यथा

अनित्यदृष्ट्या घटादिवस्तु। किन्तु, तेन तुल्यः दृष्ट्याः द्रष्टा कदापि दृष्टिं न पश्यति, इत्येतद् न।

३६) अथ श्रीशङ्करः– "किं द्वे दृष्टी द्रष्टुः नित्या अदृश्या, अन्या अनित्या दृश्येति"?[37] अस्य अर्थः– एवं चेत् किं द्रष्टुः दृष्टिद्वयम्-- एका नित्या अदृश्या, अन्या अनित्या दृश्या इति।

३७) अथ श्रीशङ्करः पुनः- "बाढम्, प्रसिद्धा तावदनित्या दृष्टिः अन्धानन्धत्वदर्शनात्। नित्यैव चेत्सर्वोऽनन्ध एव स्यात्। द्रष्टुस्तु नित्या दृष्टिः "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते"– इति श्रुतेः। अनुमानाच्च–अन्धस्यापि घटाद्याभासविषया स्वप्ने दृष्टिरुपलभ्यते, सा तर्हीतरदृष्टिनाशे न नश्यति, सा द्रष्टुर्दृष्टिः। तया विपरिलुप्तया नित्यया दृष्ट्या स्वरूपभूतया स्वयञ्ज्योतिः समाख्ययेतरामनित्यां दृष्टिं स्वप्नबुद्धान्तयोर्वासनाप्रत्ययरूपां नित्यपश्यन्दृष्टेर्द्रष्टा भवति। एवञ्च सति दृष्टिरेव स्वरूपमस्याग्न्यौष्ण्यवत्, न काणादानामिव दृष्टिव्यतिरिक्तोऽन्यश्चेतनो द्रष्टा"।'[38]

बाढम्, वस्तुत एव। लोके अन्धत्वस्य अनन्धत्वस्य च उभयोः दर्शनात् अनित्यदृष्टिः लोके प्रसिद्धा एव। यदि इयं दृष्टिः नित्या हि स्यात् तर्हि सर्वे नेत्रवन्तः भवितुम् अर्हन्ति। किन्तु द्रष्टुः दृष्टेः कदापि लोपो भवति इत्यर्थकश्रुत्यनुसारेण द्रष्टुः दृष्टिः नित्या भवति।

कार्यमिदम् अनुमानेनापि सिद्ध्यति। अन्धस्य पुरुषस्यापि स्वप्नावस्थायां घटाभासादि विषयिणी दृष्टिः वर्तते। सा दृष्टिः सुदृष्ट्याः नाशे सत्यपि विनष्टा न भवति। सा दृष्टिः द्रष्टुः दृष्टिः। सा कदापि अलुप्ता दृष्टिः स्वयंज्योतिसंज्ञिका स्वरूपभूता नित्यदृष्ट्याः स्वप्नजाग्रदवस्थायां वर्तमानां वासनाप्रत्ययरूपां दृष्टिं नित्यतया पश्यन् वर्तत इत्यतः सा दृष्ट्याः द्रष्टा भवति। कार्यं इत्थं भवतीत्यतः अग्नेः उष्णतायाः तुल्या दृष्टिः आत्मनः स्वरूपं भवति। कणादमतानुयायिनां इव दृष्ट्याः भिन्नः न कोपि अन्यचेतनद्रष्टा अस्ति।

३८) आचार्यस्य भाष्यवचनम्– "तद् ब्रह्म आत्मानमेव नित्यदृग्रूपमध्यारोपितानित्यदृष्ट्यादिवर्जितमेवावेद्विदितवत्।[39]

अत्रैतस्य विवरणं यथा– तद् ब्रह्म यत् अन्येषाम् आरोपितानाम् अनित्यदृष्टिप्रभृतीनाम् रहितं भवति, तद् नित्यदृग्रूपमात्मानमेव अवेत्-अवगच्छेत्।

३९) आचार्यः पुनरपि– "ननु विप्रतिषिद्धं "न विज्ञातेर्विज्ञातारं विजानीयाः" (बृ-उ.३-४-२) इति श्रुतेः विज्ञातुर्विज्ञानम्"।[40]

एतस्य समीक्षा क्रियते यथा– विज्ञानशक्तेः विज्ञातारम् अवगन्तुं न शक्नोति। इत्थंभूतायाः श्रुतेः विद्यमानत्वात् यदि विज्ञातारं जानाति तर्हि विरुद्धकथनम् अवबोधितं आपद्यते।

४०) श्रीशङ्कराचार्यः पुनरपि भाष्ये– “न, एवं विज्ञानान्न विप्रतिषेधः। एवं दृष्टेर्द्रष्टेति विज्ञायत एव। अन्यज्ञानानपेक्षत्वाच्च– न च द्रष्टुर्नित्यैव दृष्टिरित्येवं विज्ञाते द्रष्टृविषयां दृष्टिमन्यामाकाङ्क्षते। निवर्तते हि द्रष्टृविषयदृष्ट्याकाङ्क्षा तदसम्भवादेव। न ह्यविद्यमाने विषय आकाङ्क्षा कस्यचिदुपजायते। न च दृश्या दृष्टिर्द्रष्टारं विषयीकर्तुमुत्सहते, यतस्तामाकाङ्क्षेत। न च स्वरूपविषययाकाङ्क्षास्वस्यैव। तस्मादज्ञानाध्यारोपणनिवृत्तिरेव ‘आत्मानमेवावेत्’ इत्युक्तमनात्मनो विषयीकरणम्”[41]

भाष्यतात्पर्यं यथा– इत्थं न भवति। एवंविधात् विज्ञानात् श्रुतेः अस्य विरोधो न भवति। तद् दृष्टेः द्रष्टा भवति इति रीत्या अवगम्यते एव। एतद्विना ज्ञानस्य अन्यस्य अपेक्षा न भवति इति हेतोः उक्तकथने विरोधो नास्ति। द्रष्टुः दृष्टिः नित्या इति निश्चप्रचम्– एवं रीत्या विज्ञाने सञ्जाते तस्याः दृष्टेः विषयीकरणरूपा अन्यदृष्टेः अपेक्षा नास्ति। अपि तु अनेन द्रष्टारं विषयीकृतायाः दृष्टेः आकाङ्क्षायाः निवृत्तिः भवति। कुत इति चेत् तस्याः भानम् असम्भवमेव। यः वस्तुविशेषः विद्यमानः न भवति तदर्थं न केनापि आकाङ्क्ष्यते। कापि दृश्यभूता दृष्टिः द्रष्टारं विषयीकर्तुं न समर्था भवति, यतस्तामाकाङ्क्षेत। स्वरूपविषयाकाङ्क्षा न स्वस्यैव। अतः ‘आत्मानमावेत्’ इत्यस्माद्वाक्यात् अज्ञानारोपस्य निवृत्तेः निरूपणं कृतं भवति।

४१) आचार्यः पुनरपि– “तत्कथमवेत्? इत्याह-अहं दृष्टेर्द्रष्टा आत्मा ब्रह्मास्मि भवामीति ब्रह्मेति– यत्साक्षादपरोक्षात्सर्वान्तर आत्मा अशनायाद्यतीतो नेति नेत्यस्थूलमनण्वित्येवमादिलक्षणम्, तदेवाहमस्मि, नान्यः संसारी, यथा भवानाहेति। तस्मादेवं विज्ञानात्तद्ब्रह्म सर्वमभवत्-- अब्रह्माध्यारोपणापगमात्, तत्कार्यस्यासर्वत्वस्य निवृत्त्या सर्वमभवत्। तस्माद्युक्तमेव मनुष्या मन्यन्ते यद्ब्रह्मविद्यया सर्वं भविष्याम इति”।[42]

उपर्युक्तस्य भाष्यस्य समीक्षा क्रियते यथा– ब्रह्मणः बोधः कथमित्याह–विषयेऽस्मिन् श्रुतयः प्रमाणतया वर्तन्ते। अहं दृष्टेः द्रष्टा आत्मा ब्रह्म अस्मि। एवं रीत्या अवगन्तव्यम्। ब्रह्म अर्थात् यत् साक्षादपरोक्षं सर्वान्तरात्मा क्षुधादिविकारहीनं नेति नेति वाक्यप्रतिपादितम्, अस्थूलम्, असूक्ष्मम् इत्यादिविकाराणां लक्षणयुक्तं भवति। सोऽयम् ‘अहमेव अस्मि’- इति रीत्या यथा भवन्तः वदन्ति नान्यः संसारी। एवं प्रकारेण ज्ञानेन ‘सोऽयं ब्रह्म’ सर्वरूपं सञ्जातम्। अर्थात् अब्रह्मरूपविद्यारूपेण या बाधा अस्ति तस्याः कार्यभूता सर्वत्वस्य निवृत्त्या सर्वरूपं सम्पन्नम्। अत एव मनुष्याः ब्रह्मविद्याद्वारा वयं सर्वरूपतापन्नतां वर्तामहे। अयम् अभिप्रायः उचितः एव।

४२) पुनः श्रीशङ्कराचार्यः भाष्ये– “यत्पृष्टं ‘किमु तद्ब्रह्मावेत् यस्मात्तत्सर्वमभवत्’ इति, तन्निर्णीतम् – ‘ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्’ इति। तत्तत्र यो

यो देवानां मध्ये प्रत्यबुध्यत प्रतिबुद्धवानात्मानं यथोक्तेन विधिना, स एव प्रतिबुद्ध आत्मा तद्ब्रह्माभवत्। तथर्षीणां तथा मनुष्याणां च मध्ये। देवानामित्यादि लोकदृष्ट्यपेक्षया न ब्रह्मत्वबुद्ध्योच्यते। 'पुरः पुरुष आविशत्' इति सर्वत्र ब्रह्मैवानुप्रविष्टमित्यवोचाम। अतः शरीराद्युपाधिजनितलोकदृष्ट्यपेक्षया देवानामित्याद्युच्यते। परमार्थतस्तु तत्र तत्र ब्रह्मैवाग्र आसीत्प्राक्प्रतिबोधाद् देवादि शरीरेष्वन्यथैव विभाव्यमानम्। तदात्मानमेवावेत्तथैव च सर्वमभवत्"।[43]

उपरितनभाष्यस्य तात्पर्यं यत्– इत्थं, किं, तद् ब्रह्म अवेत्, यस्मात् तत्सर्वम् अभवत्। ततः पूर्वं इदं ब्रह्म आसीत्। तद् आत्मानं ज्ञातवान् 'अहं ब्रह्म अस्मि'। तस्मात् कारणात् तद् सर्वं सञ्जातम् इति। अतः 'देवानां' मध्ये यः यः आत्मानम् उपर्युक्तेन प्रकारेण ज्ञातवान्, सः बोधवान् परमात्मा, अर्थात् तद् ब्रह्मज्ञः ब्रह्म अभवत्। तथा ऋषीणां विषये मनुष्याणाञ्च विषये। अत्र 'देवानाम्' इत्यारभ्य यत् कथनं वर्तते तद् लोकदृष्टिमादायैव। ब्रह्मत्वबुद्ध्या तु तद्रीत्या वक्तुम् अशक्यम्। कुत इति चेत् 'पुरुषः शरीररूपपुरे प्रविष्टवान्' इत्यस्मिन् वाक्यद्वारा सर्वत्र ब्रह्म एव प्रविष्टं वर्तते इति अस्माभिः उक्तम्। अतः शरीरादि उपाधिजनितायाः लोकदृष्टेः अपेक्षाम् आश्रित्य 'देवानाम्' इत्यादि उक्तं वर्तते। परमार्थतः देवतादिशरीरेषु बोधजननात्पूर्वमेव (ब्रह्मणः प्रवेशात्पूर्वम्) अन्यथा व्यवह्रियमाणं ब्रह्म आसीत्। 'तद्

आत्मानमावेत्' तद्रीत्या सर्वरूपतापन्नं सञ्जातम्।

४३) पुनरपि श्रीशङ्करः भाष्ये– "अस्या ब्रह्मविद्यायाः सर्वभावापत्तिः फलमित्येतस्यार्थस्य द्रढिम्ने मन्त्रानुदाहरति श्रुतिः। कथम्? तद् ब्रह्म एतदात्मानमेव 'अहमस्मि' इति पश्यन्नेतस्मादेव ब्रह्मणो दर्शनादृषिर्वामदेवाख्यः प्रतिपेदे ह प्रतिपन्नवान्किल। स एतस्मिन्ब्रह्मात्मदर्शनेऽवस्थित एतान्मन्त्रान्ददर्श– अहं मनुरभवं सूर्यश्च' इत्यादीन्"।[44]

अस्य भाष्यस्य अर्थविचारो यथा– अस्याः ब्रह्मविद्यायाः उद्दिष्टं फलं सर्वभावप्राप्तिः भवति। कार्यस्यास्य दृढतां कर्तुं श्रुतिमन्त्राणाम् उद्धरणं करोति। तादृशं ब्रह्म उक्तरीत्या पश्यन् अर्थात् स्वयं हि 'अहं ब्रह्मास्मि' इति अवधारितवान् भवति। इत्थं अवधारितवन्तं वामदेवनामकं ऋषिम् इदं विज्ञानं प्राप। आश्चर्यं, सः प्रतिपन्नवान्-ज्ञानवान् किल। अस्मिन् ब्रह्मात्मदर्शने स्थित्वा सः 'अहं मनुरभवं सूर्यश्च'– अहं स्वयं मनुः सम्पन्नोऽस्मि, सूर्यः सम्पन्नोऽस्मि इत्यादीनां मन्त्राणां साक्षात्कारं कृतवान्।

४४) श्रीशङ्कराचार्यः पुनरपि भाष्ये– 'तदेतद् ब्रह्म पश्यन्' इति ब्रह्मविद्या परामृश्यते। 'अहं मनुरभवं सूर्यश्च' इत्यादिना सर्वभावापत्तिं ब्रह्मविद्याफलं परामृशति। पश्यन्सर्वात्मभावं फलं प्रतिपेद इत्यस्मात्प्रयोगाद् ब्रह्मविद्यासहायसाधनसाध्यं मोक्षं दर्शयति भुञ्जानस्तृप्यतीति यद्वत्"।[45]

उपरितनभाष्यस्य समीक्षा यथा– 'तदेतत् ब्रह्म पश्यन्' अनेन श्रुतिवाक्येन ब्रह्मविद्या परामृष्टा वर्तते। यथा भोजनक्रिया तृप्तेः साधिका भवति तथा ब्रह्मविद्या मुक्तेः साधिका भवति। एवम् 'अहं मनुरभवं सूर्यश्च' इत्यादि वाक्यैः ब्रह्मविद्यायाः सर्वभावफलस्य प्राप्तिं परामृशति। ब्रह्म दृष्टवान् वामदेवर्षिः सर्वात्मभावरूपफलं प्राप्तवान्। अनेन कथनेन वामदेवः ब्रह्मविद्यासहायभूतेन साधनेन मोक्षप्राप्तिं दर्शयति। यथा- भुञ्जानः पुरुषः तेन तृप्तो सञ्जायते।

४५) श्रीशङ्कराचार्यः भाष्ये– "सेयं ब्रह्मविद्या सर्वभावापत्तिरासीन्महतां देवादीनां वीर्यातिशयात्। नेदानीमैदंयुगीनानां विशेषतो मनुष्याणाम्, अल्पवीर्यत्वादिति स्यात्कस्यचिद्बुद्धिः, तदुत्थापनायाह"।[46]

भाष्यस्य विवरणं अत्र क्रियते यथा– ब्रह्मविद्याद्वारा देवादिमहापुरुषाणां सेयं सर्वभावप्राप्तिः वीर्यातिशयात् आसीत्। इदानीं वर्तमानकालीनप्राणिनां तदा तेष्वपि अल्पवीर्यत्वाद् हेतोः मनुष्याणां तस्य प्राप्तिः न भवति- इत्थंप्रकारः विचारः यदि यस्य कस्यापि अस्ति चेत् तस्य निवृत्यर्थं श्रुतिः।

४६) श्रीशङ्करभाष्यम् अनुवर्तते यथा– "तदिदं प्रकृतं ब्रह्म यत्सर्वभूतानुप्रविष्टं दृष्टिक्रियादिलिङ्गम्, एतर्ह्येतस्मिन्नपि वर्तमानकाले यः कश्चिद्व्यावृत्तबाह्यौत्सुक्य आत्मानमेवैवं वेद 'अहं ब्रह्मास्मि' इति

अपोह्योपाधिजनितभ्रान्तिविज्ञानाध्यारोपितान्विशेषान् संसारधर्मानागन्धितमनन्तरमबाह्यं ब्रह्मैवाहमस्मि केवलमिति। सोऽविद्याकृतासर्वत्वनिवृत्ते ब्रह्मविज्ञानादिदम् सर्वं भवति। न हि महावीर्येषु वामदेवादिषु, हीनवीर्येषु वा वार्तमानिकेषु मनुष्येषु ब्रह्मणो विशेषस्तद्विज्ञानस्य वास्ति"।[47]

श्रीशङ्करभाष्यस्य पुनः समीक्षा अत्र-तदिदं इह कथितं ब्रह्म यत् समस्तभूतेषु तथा दृष्टिक्रियादिलिङ्गम्, अस्मिन् समये अर्थात्- वर्तमानकाले अपि किञ्चित् बाह्यविषयाणाम् अभिलाषया मुक्तो भूत्वा आत्मानं हि 'अहं ब्रह्मास्मि' इति रीत्या अवगम्यते अर्थात् उपाधिजनितमिथ्याज्ञानेन आरोपितविशेषाणां बाधां कृत्वा यः कोऽपि एतद्रीत्या अनुभवति, यस्मिन् संसारधर्मेण गन्धलेशोऽपि न वर्तते। तादृशः बाह्यान्तरशून्यः शुद्ध ब्रह्मास्म्यहम्। अविद्याकृतस्य असर्वत्वस्य निवृत्तौ ब्रह्मज्ञानद्वारा अयं सर्वभावं प्राप्नोति। महान्तः प्रभावशालिनः वामदेवादि अथवा हीनवीर्येषु आधुनिकपुरुषेषु ब्रह्मविज्ञानस्य न कोऽपि अन्तरः वर्तते।

४७) अधुना पुनरपि महावाक्यसम्बन्धिभाष्यम् यथा– "वार्तमानिकेषु पुरुषेषु तु ब्रह्मविद्याफले अनैकान्तिकता शङ्कत इत्यत आह-तस्य ह ब्रह्मविज्ञातुर्यथोक्तेन विधिना देवा महावीर्याश्च नापि अभूत्य अभवनाय ब्रह्मसर्वभावस्य, नेशते न पर्याप्ताः, किमुतान्ये"।[48]

अस्य समीक्षा यथा – आधुनिककालिकेषु पुरुषेषु ब्रह्मविद्यायाः फलस्य अनिश्चिततायाः शङ्कायाः आविर्भावः। अतः श्रुतिः इत्थं वदति– महाप्रभावशालिनः देवगणाः उपर्युक्तविधिमनुसृत्य ये ब्रह्म जानन्ति तेषां ब्रह्मरूपसर्वभावस्य सिद्धये सामर्थ्याभावः वर्तते। एवं कार्ये स्थिते अन्येषां विषये किं वक्तव्यम्?।

४८) पुनः श्रीशङ्कराचार्यः भाष्ये– "ब्रह्मविद्याफलप्राप्तौ विघ्नकरणे देवादयः ईशत इति का शङ्का? इत्युच्यते-देवादीन्प्रति ऋण-वत्त्वान्मर्त्यानाम्। "ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः" इति हि जायमानमेवर्णवन्तं पुरुषं दर्शयति श्रुतिः। पशुनिदर्शनाच्च "अथोऽयं वा" (बृ.उ-१-४-१६) इत्यादिलोकश्रुतेश्चात्मनो वृत्तिपरिपिपालयिषयाधमर्णानिव देवाः परतन्त्रान्मनुष्यान्प्रत्यमृतत्वप्राप्तिं प्रति विघ्नं कुर्युरिति न्याय्यैवैषा शङ्का"।[49]

अत्र उक्तस्य भाष्यस्य समीक्षा यथा- किन्तु ब्रह्मविद्यायाः फलप्राप्तौ विघ्नकरणे कार्ये देवादयः समर्थाः भवन्ति। इत्थंभूता शङ्का कुतस्सञ्जायते?। अत्र समाधानम्- कुत इति चेत् देवादीन् प्रति मनुष्यः ऋणवान् भवति। केन विधिना इति चेद्यथा– "ब्रह्मचर्यद्वारा ऋषीणां विषये यज्ञद्वारा देवतानां विषये पुत्रोत्पादनद्वारा पितृणां विषये मानवाः अधमर्णाः"। इयं श्रुतिः – जन्मनः आरभ्यैव मानवान् ऋणवतः करोति। "एवम् अथोऽयं वा आत्मा सर्वेषां भूतानां लोकः"। इमां

श्रुतिमनुसृत्य मनुष्याणां पशुत्वप्राप्तिः इत्यस्मात् कारणात् कथम् उत्तमर्णः अधमर्णानां कष्टं ददाति। तद्रीत्या देवगणोऽपि स्ववृत्तिनिर्वहणाय परतन्त्रान् मनुष्यान् प्रति अमृतत्वप्राप्तिविषये विघ्नं कुर्युः इति शङ्का न्याय्या भवति।

४९) अथ श्रीशङ्करभाष्यम् अनुवर्तते। "स्वपशून्स्वशरीराणीव च रक्षन्ति देवाः। महत्तरां हि वृत्तिं कर्माधीनां दर्शयिष्यति देवादीनां बहुपशुसमतयैकैकस्य पुरुषस्य। "तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः" (१-४-१०) इति हि वक्ष्यति। "यथा ह वै स्वाय लोकायारिष्टिमिच्छेदेवं हैवंविदे सर्वाणि भूतान्यरिष्टिमिच्छन्ति" (१-४-१६) इति च"।[50]

उपरितनस्य समीक्षा यथा– देवगणाः एषां पशूनाम् आत्मनः शरीरसमं रक्षणं कुर्वन्ति। एकैकस्य पुरुषस्य अनेकपशुभिस्सह तुल्यतां कृत्वा श्रुतिः पुरुषस्य देवादीनां बहुकर्माधीनवृत्तिं दर्शयिष्यति, किञ्च इत्थमपि वदिष्यति– "तस्मात् एषां तन्न प्रियं यदेतद् मनुष्याः विद्युः"- तस्मात् तेषाम् इदं न प्रियं भवति यत् मनुष्याः इदम् आत्मतत्त्वं विद्युः।

श्रीशङ्कराचार्यः पुनरपि भाष्ये–

५०) ब्रह्मवित्त्वे पारार्थ्यनिवृत्तेर्न स्वलोकत्वं पशुत्वञ्चेत्यभिप्रायोऽप्रियारिष्टि-वचनाभ्यामवगम्यते। तस्माद्ब्रह्मविदो ब्रह्मविद्याफलप्राप्तिं प्रति कुर्युरेव

विघ्नं देवाः, प्रभाववन्तश्च हि ते"।[51]

ब्रह्मज्ञाने सञ्जाते पारार्थ्यनिवृत्तेः सम्भवात् तस्मिन् पुरुषे देहात्मत्वभावः देवपशुत्वभावश्च न वर्तते। अयम् अभिप्रायः उपर्युक्ताप्रियवाक्येन अरिष्टिवाक्येन च विदितो भवति। अतः ब्रह्मवेत्तारं ब्रह्मविद्यायाः फलं प्राप्नुवन्तं पुरुषं प्रति देवगणः विघ्नानि आचरिष्यत्येव। ते तु प्रभावशालिनः खलु।

पुनरपि श्रीशङ्कराचार्यः भाष्ये-

५१) "नन्वेवं सत्यन्यास्वपि कर्मफलप्राप्तिषु देवानां विघ्नकरणं पेयपानसमम्। हन्त तर्ह्यविस्रम्भोऽभ्युदयनिःश्रेयससाधनानुष्ठानेषु। तथेश्वरस्याचिन्त्यशक्तित्वाद्विघ्नकरणे प्रभुत्वम्। तथा कालकर्ममन्त्रौषधितपसाम्। एषां हि फलसम्पत्तिविपत्तिहेतुत्वं शास्त्रे लोके च प्रसिद्धम्। अतोऽप्यनाश्वासः शास्त्रार्थानुष्ठाने"।[52]

अस्य भाष्यस्य समीक्षा यथा– अत्र शङ्का - कार्ये एवं सति अन्यकर्मफलानां प्राप्तिविषयेऽपि देवताकृतः विघ्नः जलपानवत् अनायासः भवति। एवं चेत् अभ्युदयनिःश्रेयसविषये प्रवर्तितुं विश्वासः न वर्तेत। एवं रीत्या अचिन्त्यशक्तिसम्पन्नहेतोः ईश्वरोऽपि विघ्नक्रियायां समर्थः इति आयाति। तथा कालकर्ममन्त्रौषधितपसाम् अपि प्रभुत्वं

भवति। शास्त्रे एवं लोके फलप्राप्तिविषये अपि तेषां हेतुता प्रसिद्धा। तस्मात् कारणात् शास्त्रज्ञानस्य अनुष्ठाने अविश्वासः वर्तेत।

५२) श्रीशङ्कराचार्यस्य भाष्यं यथा– "न, सर्वपदार्थानां नियतनिमित्तोपादानात् जगद्वैचित्र्यदर्शनाच्च। स्वभावपक्षे च तदुभयानुपपत्तेः। 'सुखदुःखादि फलनिमित्तं कर्म' इत्येतस्मिन्पक्षे स्थिते वेदस्मृतिन्यायलोकपरिगृहीते, देवेश्वरकालास्तावन्न कर्मफलविपर्यासकर्तारः कर्मणां काङ्क्षितकारकत्वात्। कर्म हि शुभाशुभं पुरुषाणां देवकालेश्वरादिकारकमनपेक्ष्य नात्मानं प्रति लभते, लब्धात्मकमपि फलदानेऽसमर्थम्, क्रियाया हि कारकाद्यनेकनिमित्तोपादानस्वाभाव्यात् तस्मात्क्रियानुगुणा हि देवेश्वरादय इति कर्मसु तावन्न फलप्राप्तिं प्रत्यविस्रम्भः"।[53]

अस्य समीक्षा यथा– इत्थं भवितुं न शक्यते। कुत इति चेत् सर्वे पदार्थानां निश्चितं भावम् अवगच्छन्ति। तथा जगति सुखदुःखादिवैचित्र्यमपि अवगच्छन्ति। यदि एतानि स्वाभाविकानि इत्यवगम्यन्ते उभयोः भानम् असम्भवं स्यात्। "सुखदुःखादीनां फलस्य कारणं कर्म भवति"। अयं वेदः, इयं स्मृतिः, अयं न्यायः तथा लोकद्वारा गृहीतस्य अभिप्रायस्यापि निश्चितत्वात् इदं निर्विवादं भवति यत् देवः, ईश्वरः तथा कालश्च कर्मफलस्य विपर्ययम् अकुर्वन्तः वर्तन्ते। कुत इति चेत् ते कर्मानुष्ठानेन अपेक्षितं कार्यं कृतवन्तः

वर्तन्ते। देवः कालः, ईश्वरादि कारकाणाम् अपेक्षां विना मनुष्याणां शुभाशुभकर्म स्वतः सम्पन्नं न भविष्यति। कदाचित् समर्थो भवतु नाम, तथापि फलानुभवविषये समर्थो न भविष्यति, कुत इति चेत् कारकादीनाम् अनेकेषां निमित्तानां स्वीकारः क्रियायाः स्वभाव एव। तस्मात्कारणात् देवता ईश्वरादयश्च कर्मणः गुणस्य नियन्तारः एव।

५३) अथ महावाक्यभाष्यं यथा – "कर्मणामप्येषां वशानुगत्वं क्वचित्, स्वसामर्थ्यस्याप्रणोद्यत्वात्। कर्मकालदैवद्रव्यादि स्वभावानां गुणप्रधानभावस्त्वनियतो दुर्विज्ञेयश्चेति तत्कृतो मोहो लोकस्य – कर्मैव कारकं नान्यत्फलप्राप्ताविति केचित्, दैवमेवेत्यपरे, काल इत्येके, द्रव्यादिस्वभाव इति केचित्, सर्व एते संहता एवेत्यपरे। तत्र कर्मणः प्राधान्यमङ्गीकृत्य वेदस्मृतिवादाः– "पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन" (बृ-उ-३-२-१३) इत्यादयः। यद्यप्येषां स्वविषये कस्यचित्प्राधान्योद्भव इतरेषां तत्कालीनप्राधान्यशक्तिस्तम्भः, तथापि न कर्मणः फलप्राप्तिं प्रत्यनैकान्तिकत्वाम् शास्त्रन्यायनिर्धारितत्वात्कर्मप्राधान्यस्य"।[54]

भाष्यविवरणं यथा – किञ्च देवादिना कृतः विघ्नः कर्मणः अधीनः भवति। कुत इति चेत् कर्मसामर्थ्यस्य बाधा न कदापि भविष्यति। अतः यावत्कालं पापमयः अदृष्टः न भवति तावत्कालं दुःखादीनां प्राप्तिरपि न भवति। कर्मणः, कालस्य, दैवस्य, द्रव्यादि

गुणानाञ्च गौणमुख्यभावः अनिश्चितः। एवं दुर्विज्ञेयश्च। तस्मात् कारणात् लोकानां मोहः सञ्जायते। केषाञ्चिन्मते फलप्राप्तिं प्रति कर्म एव कारकं भवति। नान्यत् किञ्चित्। अन्ये वदन्ति–दैवं हि तस्य हेतुः। अन्ये केचित् वदन्ति काल एव विषयेऽस्मिन् कारणम्। केचित् द्रव्यादीनां स्वभाव एव अस्य कारणम् इति चिन्तयन्ति। पुनरप्यन्ये सर्वं मिलित्वा कर्मफलप्राप्तये हेतुरिति अभिप्रयन्ति। विषयेऽस्मिन् कर्मणः प्राधान्यं स्वीकृत्य "पुण्यकर्मणा पुरुषः पुण्यवान् सञ्जायते"। तथा "पापकर्मणा पुरुषः पापी सञ्जायते"। अयमभिप्रायः वेदस्मृत्यादीननुसृत्य प्रवर्तते।

एकैका व्यक्तिः आत्मनः कार्ये उपर्युक्तात् तत्त्वात् रुचेः अनुसारेण यस्य कस्य वा तत्त्वस्य प्रधानतया स्वीकारं करोति। तस्यां वेलायाम् अन्येषां प्राधान्ये विरोधं करोति। तथापि फलप्राप्तिविषये कर्मणः अनैकान्तिकत्वरूपाप्राधान्यं नास्ति, कुत इति चेत् शास्त्रमनुसृत्य न्यायस्य आधारेण च कर्मणः प्राधान्यं सुनिश्चितं भवति।

५४) श्रीशङ्कराचार्यः भाष्ये पुनरपि – "न अविद्यापगममात्रत्वाद् ब्रह्मप्राप्तिफलस्य यदुक्तं ब्रह्मप्राप्तिफलं प्रति देवा विघ्नं कुर्युरिति तत्र न देवानां विघ्नकरणे सामर्थ्यम्, कस्मात्? विद्याकालानन्तरितत्वाद् ब्रह्मप्राप्तिफलस्य। कथम्? यथा लोके द्रष्टुश्चक्षुष आलोकेन संयोगो

यत्कालः, तत्काल एव रूपाभिव्यक्तिः। एवमात्मविषयं विज्ञानं यत्कालम्, तत्काल एव तद्विषयाज्ञानतिरोभावः स्यात्। अतो ब्रह्मविद्यायां सत्यामविद्याकार्यानुपपत्तेः प्रदीप इव तमः कार्यस्य, केन कस्य विघ्नं कुर्युर्देवाः यत्रात्मत्वमेव देवानां ब्रह्मविदः"।[55]

अस्य समीक्षा क्रियते यथा-

एवं ब्रह्मविद्यायाः फलप्राप्तौ विघ्नस्य अवकाशो नास्ति कुत इति चेत् ब्रह्मप्राप्तिरूपफलन्तु अविद्यायाः निवृत्तिजन्यं भवति। ब्रह्मप्राप्तिरूपफलदायके कर्मणि देवगणाः विघ्नं कुर्वन्तीति यत् पूर्वं कथितं वर्तते, तन्न, तादृशविघ्नकरणे देवानां तादृशशक्तिर्नास्ति। देवानां शक्तेः अभावे किं कारणम्?। ब्रह्मप्राप्तिरूपफलं तु ज्ञानजन्यवेलायां भवति इत्येतदेव कारणम्। तस्य का रीतिः? लोके यः नेत्रद्वारा अन्यान् पश्यति तथा नेत्राणां प्रकाशेन साकं यस्यां वेलायां संयोगो भवति तस्यामेव वेलायां रूपाभिव्यक्तिरपि सञ्जायते। एवं रीत्या यस्मिन् समये आत्मविषयकं ज्ञानं सञ्जायते तस्मिन् समये तद्विषयकस्य अज्ञानस्य निवृत्तिरपि भवति। अतः दीपे सन्निहिते अन्धकारः न किञ्चिदपि करोति, तद्रीत्या ब्रह्मविद्यायाः वर्तमाने अविद्यायाः भानस्य असम्भवत्वात्। यदा ब्रह्मवेत्ता देवानाम् आत्मत्वं प्राप्नोति तदा देवगणः केन उपाधिना विघ्नकरणाय प्रभवति?।

५५) पुनरपि भाष्यवचनम्– “तदेतदाह आत्मा स्वरूपं ध्येयं यत्तत्सर्वशास्त्रैर्विज्ञेयं ब्रह्म हि यस्मात्, एषां देवानाम्, स ब्रह्मविद्भवति। ब्रह्मविद्यासमकालमेवाविद्यामात्रव्यवधानापगमाच्छुक्तिकायाः इव रजतामालायाः शुक्तिकात्वमित्यवोचाम। अतो नात्मनः प्रतिकूलत्वे देवानां प्रयत्नः सम्भवति। यस्य ह्यनात्मभूतं फलं देशकालनिमित्तान्तरितम्, तत्रानात्मविषये सफलः प्रयत्नो विघ्नाचरणाय देवानाम्। न त्विह विद्यासमकाल आत्मभूते देशकालनिमित्तानन्तरिते अवसरानुपपत्तेः”।[56]

एतस्य विवरणं क्रियते यथा–

इमं विषयमधिकृत्य श्रुतिः– सः ब्रह्मवेत्ता देवतानां ध्येयस्वरूपः यः आत्मा, अर्थात् यः साकल्येन शास्त्रेण विज्ञेयः ब्रह्म अस्ति तद्रूपेण हि सः परिणतो भवति। अस्माभिः पूर्वम् उक्तं वर्तते यत् रजतरूपेण भासमानायाः शुक्तेः शुक्तिकात्वज्ञाने हि भ्रान्तिजनितस्य रजतत्त्वस्य प्रतीतेः निवृत्तिः भवति, यथा ब्रह्मज्ञानजननवेलायां अविद्यारूपव्यवधानस्य निवृत्तिः भवति। अतः आत्मनः प्रतिकूलत्वे देवानां प्रयत्नः न सम्भवति। यत्र देशकालनिमित्तैः व्यवहितम् अनात्मभूतं फलं वर्तते, तत्र परम् अनात्मविषयरूपविघ्नं कर्तुं देवाः प्रभवन्ति, तेषां प्रयत्नोऽपि सफलः जायते। यत्र देशः, कालः, निमित्तश्च अव्यवहितं, तथा ज्ञानोदयकाले देवानाम् आत्मभावं प्राप्तुं योग्यवन्तं ब्रह्मवेत्तारं प्रति विघ्नं

कर्तुं तेषां प्रयत्नः न कदापि सफलतां याति। बाधार्थं देवानाम् अवसरलाभः असम्भवः।

५६) पुनरपि श्रीशङ्करः भाष्ये– "एवं तर्हि विद्याप्रत्ययसन्तत्यभावाद् विपरीतप्रत्ययतत्कार्ययोश्च दर्शनात् अन्त्य एवात्मप्रत्ययोऽविद्यानिवर्तको न तु पूर्व इति"।[57]

अत्र भाष्यसमीक्षा यथा– विचारः इत्थं भवति चेत् बोधवृत्त्याः प्रवाहस्य अभावो भवतीति कारणात् तथा विपरीतवृत्तिः तज्जन्यप्रवाहस्य तत् द्रष्टुं शक्यत इत्यतः अयं निश्चयः भवति यत् अन्तिमात्माकारवृत्तेः परम् अविद्यायाः निवारणं कर्तुं शक्यते न तु ततः पूर्वम् इति।

५७) पुनरपि भाष्ये– "न प्रथमेनानैकान्तिकत्वात्। यदि हि प्रथम आत्मविषयः प्रत्ययोऽविद्यां न निवर्तयति, तथान्त्योऽपि, तुल्यविषयत्वात्"।[58]

भाष्यस्य समीक्षा अत्र क्रियते – इत्थं न वक्तव्यम्। कुत इति चेत् प्रथमात्मप्रत्ययवत् अन्तिमात्मप्रत्ययोऽपि अविद्यां न निवर्तयेत्। यदि आत्मविषयकः प्रथमः प्रत्ययः अविद्यायाः निवृत्तिं न करोति तर्हि तद्रीत्या अन्तिमः आत्मप्रत्ययोऽपि अविद्यां हन्तुं न प्रभवति। प्रथमान्त्यात्मप्रत्यययोः विषयः समानः खलु।

५८) भाष्यवचनं यथा– "एवं तर्हि सन्ततोऽविद्यानिवर्तको न विच्छिन्न इति"।[59]

कार्यमित्थं चेत्तर्हि अविच्छिन्नस्य आत्मप्रत्ययस्य परम् अविद्यायाः निवर्तकहेतुत्वम् न विच्छिन्नस्य।

५९) अथ भाष्यवचनम्– "न, जीवनादौ सति सन्तत्यनुपपत्तेः। न हि जीवनादिहेतुके प्रत्यये सति विद्याप्रत्ययसन्ततिरुपपद्यते, विरोधात्। अथ जीवनादिप्रत्ययतिरस्करणेनैव आमरणान्ताद्विद्यासन्ततिरिति चेन्न, प्रत्यये-यत्तासन्तानानवधारणाच्छास्त्रार्थानवधारणदोषात्। इयतां प्रत्ययानां सन्ततिरविद्यायाः निवर्तिकेनत्यनवधारणाच्छास्त्रार्थो नावध्रियेत, तच्चानिष्टम्"।[60]

अस्य समीक्षा यथा– न इत्थं भवति। कुत इति चेत् जीवनादि हेतुके वर्तमाने सति आत्माकारवृत्त्याः अविच्छिन्नता न सम्भवति। जीवनादि हेतुभूतायाः वृत्तेः भाने सति बोधवृत्त्याः अविच्छिन्नता न सम्भवति। तत्र विरोधात्। यदि इत्थं कथ्यते यत् जीवनादिहेतुभूतायाः वृत्तेः तिरस्कारं कृत्वा मरणपर्यन्तं बोधवृत्तेः प्रवाहो वर्तेत इति कथनं युक्तं न। कुत इति चेत्बोधवृत्तेः प्रवाहपरिमितेः निश्चयाभावात् शास्त्राभिप्राये अनिश्चयतारूपदोषस्य आविर्भावः भविष्यति। किञ्च इयतामात्रवृत्तेः प्रवाहः अविद्यानिवृत्तिकारणम् इति निर्णयस्य असम्भवात् शास्त्रतात्पर्यं निर्णीतं न भविष्यति। इयम् अनिश्चिता रीतिः शास्त्राय न रोचते।

६०) भाष्ये पुनः– “सन्ततिमात्रत्वेऽवधारित एवेति चेत्?”[61]

अस्य समीक्षा यथा– यदि इत्थं विचार्यते यत् बोधवृत्तेः सन्ततेः भाने सति शास्त्रतात्पर्यं निश्चितं भवति वा?

६१) पुनरपि भाष्ये यथा– “न, आद्यन्तयोरविशेषात्। प्रथमा विद्याप्रत्ययसन्ततिर्मरणकालान्ता वेति विशेषाभावात्, आद्यन्तयोः प्रत्यययोः पूर्वोक्तौ दोषौ प्रसज्येयाताम्”।[62]

एतस्य विवरणं यथा– इत्थं भवितुं न अर्हति। कुत इति चेत् अस्यामवस्थायामपि आद्यन्तप्रवाहयोः अन्तरो नास्ति। बोधवृत्तेः प्रथमप्रवाहो भवतु उत मरणकाले आसन्ने समाप्तिं प्राप्यमाणबोधवृत्तिर्वा भवतु, आद्यन्तयोः प्रत्यये भेदो नास्तीत्यतः पूर्वोक्तदोषद्वयस्यापि प्रसक्तिः भविष्यति।

६२) पुनः भाष्यं यथा– “एवं तर्ह्यनिवर्तक एवेति चेत्?”[63]

समीक्षा यथा– एवं तर्हि आत्माकारवृत्तिः अज्ञाननिवृत्तिं न करोत्येव–एवं वदति चेत्?।

६३) पुनः भाष्यवचनम्– “न, “तस्मात्तत्सर्वमभवत्” (बृ-उ-१-४-१०) इति श्रुतेः। “भिद्यते हृदयग्रन्थिः” (मु.उ-२-२-८) “तत्र को मोहः” (ईशा.७) इत्यादि श्रुतिभ्यश्च”।[64]

भाष्यस्य समीक्षा यथा–इत्थं न भवितुमर्हति कुत इति चेत् "तस्मात्कारणात् तद् सर्वं सञ्जातम् इत्यर्थकश्रुत्या तथा "हृदयस्य ग्रन्थिः भिद्यते", "तस्याम् अवस्थायां को मोहः" इत्याद्यर्थकश्रुतिद्वारा अज्ञाननिवृत्तिः सिद्धा भवति।

६४) पुनरपि भाष्यं यथा– "अर्थवाद इति चेत्? न, सर्वशाखोपनिषदामर्थवादत्वप्रसङ्गात्। एतावन्मात्रार्थत्वोपक्षीणा हि सर्वशाखोपनिषदः"।[65]

एतस्य विवरणं क्रियते यथा– पूर्वोक्ताः श्रुतयः अर्थवादपराः इति चेत्, नेति सिद्धान्ती। यतो हि यदि इयं रीतिः स्वीक्रियते तर्हि समस्तोपनिषच्छाखासु विद्यमानेषु उपनिषद्वाक्येषु अर्थवादापत्तिः।

६५) पुनरपि भाष्यवचनम्– "प्रत्यक्षप्रमितात्मविषयत्वादस्त्येवेति चेत्"?[66]

विवरणमस्य यथा– अत्र अर्थवादापत्तिर्नाम या आशङ्का कृता सा अस्थान एव। तथा च यद्युच्यते प्रत्यक्षप्रमाणद्वारा आत्मसम्बद्ध-कार्ये सिद्धे तत्र अर्थवादत्वमस्ति इति चेत् शृणु।

६६) पुनरपि भाष्ये– "न, उक्तपरिहारत्वात्। अविद्याशोकमोहभयादि दोषनिवृत्तेः प्रत्यक्षत्वादिति चोक्तः परिहारः। तस्मादाद्योऽन्त्यः सान्ततोऽसान्ततश्चेत्यचोद्यमेतत्। अविद्यादिदोष

निवृत्तिफलावसानत्वाद्विद्यायाः। य एवाविद्यादिदोषनिवृत्तिफलकृत्प्रत्यय आद्योऽन्त्यः सन्ततोऽसन्ततो वा स एव विद्येत्यभ्युपगमान्न चोद्यस्यावतारगन्धोऽप्यस्ति"।[67]

उपरितनभाष्यस्य विवरणं यथा– उक्तं न समीचीनम्। अस्य परिहारः पूर्वमेव कृतो वर्तते। तदुपरि आत्मज्ञानेन अविद्याशोकः, मोहः, भयम् इत्यादिदोषाणां निवृत्तिः प्रत्यक्षतया अनुभववेद्येति शङ्कायाः परिहारः कृतो वर्तते। तस्मात्कारणात् आद्यः, अन्त्यः अविच्छिन्नः, विच्छिन्नः इत्यादि विषयाणां शङ्का कर्तुं न शक्यते। कस्मात्कारणादिति चेत् ज्ञानं तु अविद्यादि दोषाणां निवृत्तिरूपे फले पर्यवस्यति। तादृशं कार्यम् आद्य-अन्त्य-अविच्छिन्न-विच्छिन्नता भवतु नाम, तदेव ज्ञानतया स्वीक्रियते। अतः अस्मिन् शङ्कायाः अवकाशो नास्ति।

६७) अथ भाष्यं पुनः– "यत्तूक्तं विपरीतप्रत्ययतत्कार्ययोश्च दर्शनादिति, न, तच्छेषस्थितिहेतुत्वात्। येन कर्मणा शरीरमारब्धं तद्विपरीतप्रत्ययदोषनिमित्तत्वात्तस्य तथाभूतस्यैव विपरीतप्रत्ययदोषसंयुक्तस्य फलदाने सामर्थ्यमिति, यावच्छरीरपातः तावत् फलोपभोगाङ्गतया विपरीतप्रत्ययं रागादिदोषं च तावन्मात्रमाक्षिपत्येव, मुक्तेषुवत्प्रवृत्तफलत्वात्तद्धेतुकस्य कर्मणः। तेन न तस्य निवर्तिका विद्या, अविरोधात्। किं तर्हि स्वाश्रयादेव स्वात्मविरोध्यविद्या कार्यं यदुत्पित्सु तन्निरुणाद्धि, अनागतत्वात्। अतीतं हीतरत्"।[68]

उपर्युक्तस्य भाष्यस्य समीक्षा यथा- किञ्च, किञ्चित् कथितं यत्- अहं ब्रह्म नास्मि इति रीत्या विपरीतप्रत्ययः तस्य सम्भवश्च यथा दृश्यते, तस्मात् आत्मज्ञानम् अविद्यायाः निवर्तकं न। इदं न युक्तम्। कुत इति चेत्, तत्तु प्रारब्धशेषस्य स्थितेः कारणं भवति। येन कर्मणा विदुषः शरीरस्य आरम्भः सम्भवति, सः विपरीतप्रत्ययेन रागादिदोषजनितेन तस्य तद्रूपेण अर्थात् विपरीतप्रत्ययस्य रागादिदोषेण च संयुक्तेन स्थित्वा हि फलप्रदाने सामर्थ्यं प्राप्नोति। अतः यावत्कालं शरीरपातः न सम्भवति तावत्कालं फलोपभोगानाम् अङ्गरूपेण तावन्मात्रः विपरीतप्रत्ययः रागादिदोषोपस्थितिः च। किं कारणम् इति चेत्, शरीरारम्भकर्म त्यक्तबाणेन समं फलप्रदाने शक्तं सञ्जातम्। अतः ज्ञानं न तस्य निवृत्तिकारणम्। निवृत्तिस्तु विरोधे सति आवश्यकी। इह विरोधो न वर्तते। एवमपि किं तत् यस्य कस्यापि वा निवृत्तिं करोति। स्वाश्रितो भवतीत्यतः यः आत्मनः विरोधिन्याः अविद्यायाः कार्यस्य उत्पादको भवति तमेव सः बाधते। कुतः इति चेत् सः अनागतः भवति, प्रारब्धम् अतीतं भवति।

६८) पुनः भाष्यवचनं यथा– "किञ्च, न च विपरीतप्रत्ययो विद्यावत उत्पद्यते, निर्विषयत्वात्। अनवधृतविषयविशेषस्वरूपं हि सामान्यमात्रमाश्रित्य विपरीतप्रत्यय उत्पद्यमान उत्पद्यते, यथा शुक्तिकायां रजतमिति। स च विषयविशेषावधारणकतोऽशेषविपरीतप्रत्ययाश्रयस्यो-

पमर्दितत्वान्न पूर्ववत्सम्भवति शुक्तिकादौ सम्यक्प्रत्ययोत्पत्तौ पुनरदर्शनात्"[69]

अस्य समीक्षा यथा–इतोपरि विदुषः विपरीतप्रत्ययस्य उत्पत्तिरपि भवितुं न शक्यते। कुत इति चेत् तस्य विपरीतार्थः न कोऽपि विषयः वर्तते। विषयस्य विशेषस्वरूपं प्रति निश्चयं विना सामान्यस्वरूपमाश्रित्य क्रियमाणः विपरीतप्रत्ययः भवति। यथा शुक्तौ रजतम्। किन्तु यस्य विषयविशेषरूपस्य निश्चयः सञ्जातः तं प्रति समस्तानां विपरीतप्रत्ययानाम् आश्रयस्य बाधा सञ्जाता इति कारणात् तस्य पूर्ववत् प्रादुर्भावः न सम्भवति। यथा शुक्तिकादिषु, तेषां सम्यक् ज्ञाने सञ्जाते रजतादिभ्रमस्तु न सञ्जायते।

६९) पुनरपि भाष्ये श्रीशङ्करः– "क्वचित्तु विद्यायाः पूर्वोत्पन्नविपरीतप्रत्ययजनितसंस्कारेभ्यो विपरीतप्रत्ययावभासाः स्मृतयो जायमानाविपरीतप्रत्ययभ्रान्तिमकस्मात्कुर्वन्ति, यथा विज्ञातदिग्विभागस्याप्यकस्माद्दिग्विपर्ययविभ्रमः। सम्यग्ज्ञानवतोऽपि चेत्पूर्ववद्विपरीतप्रत्यय उत्पद्यते, सम्यग्ज्ञानेऽप्यविस्रम्भाच्छास्त्रार्थविज्ञानादौ प्रवृत्तिरसमञ्जसा स्यात्सर्वं च प्रमाणमप्रमाणं सम्पद्येत प्रमाणाप्रमाणयोर्विशेषानुपपत्तेः"।[70]

भाष्यस्य विवरणं यथा– परन्तु कदाचित् ज्ञानोदयात्पूर्वमुत्पन्नात् विपरीतप्रत्ययजनितसंस्कारैः विपरीतप्रत्ययतुल्यरूपेण भासमानाः स्मृतयः

आविर्भूयानन्तरं यदृच्छया विपरीतप्रत्ययस्य भ्रान्तिं जनयन्ति। यथा दिशाविभागस्य सम्यक्ज्ञानवान् पुरुषोऽपि अकस्मात् दिग्भ्रंशस्य अधीनः सञ्जायते। यदि सम्यक् ज्ञानवतः पुरुषस्य पूर्ववत् विपरीतप्रत्यये उदिते सति सम्यक्ज्ञानविषयेऽपि अविश्वासः सञ्जायते इत्यतः शास्त्रतात्पर्ये विज्ञानादिविषये च प्रवृत्तिः कठिना सञ्जायते। किञ्च, समस्तं प्रमाणं अप्रमाणं सञ्जायेत। यतो हि तस्याम् अवस्थायां प्रमाणाप्रमाणविषये न कोऽपि अन्तरः वर्तेत।

७०) पुनरपि भाष्यम्– "एतेन 'सम्यग्ज्ञानानन्तरमेव शरीरपाताभावः कस्मात्? इत्येतत् परिहृतम्। ज्ञानोत्पत्तेः प्रागूर्ध्वं तत्कालजन्मान्तरसञ्चितानां च कर्मणामप्रवृत्तफलानां विनाशः सिद्धो भवति फलप्राप्तिविघ्ननिषेधश्रुतेरेव। "क्षीयन्ते चास्य कर्माणि" (मु-उ-२-२-८)। "तस्य तावदेव चिरम्" (छा.उ-६-१४-२)। "सर्वे पाप्मानः प्रदूयन्ते" (छा.उ-५-२४-३)। "तं विदित्वा न लिप्यते कर्मणा पापकेन" (बृ-उ-४-४-२३)। "एतमु हेवैते न तरतः" (४-४-२२)। "नैनं कृताकृते तपतः" (४-४-२२)। "एतं ह वाव न तपति" (तै.उ-२-९-१)। "न बिभेति कुतश्चन" (तै-उ-२-९-१) इत्यादि श्रुतिभ्यश्च। "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते" (गीता-४-३७) इत्यादि स्मृतिभ्यश्च"।[71]

अस्य समीक्षा यथा– त्यक्तबाणन्यायद्वारा शङ्कायाः अस्याः परिहारः कृतः। यत् सम्यक्ज्ञानात् परं झटित्येव देहपातः कुतो न सम्भवति इत्येतद् परिहृतम्। ज्ञानोत्पत्तेः पूर्वं, तदनन्तरं तदा तस्य उत्पत्तेः समये सञ्जातं तथा जन्मान्तरसिद्धं सञ्चितम् अप्रवृत्तफलं कर्मणां विनाशः चेत् "तस्य ह देवाश्च नाभूत्या ईशते" अस्य ज्ञानफलस्य प्राप्तेः य विघ्नः तस्य निषेधविहितया श्रुत्या हि सिद्धो भवति। तथा "अस्य कर्माणि प्रक्षीणानि सञ्जायन्ते", तस्य मोक्षप्राप्तौ तत्पर्यन्तं चिरम् "तस्य पापकल्मषाणि भस्म सञ्जातानि", "तं विशेषेण ज्ञात्वा पापकर्मणा न लिप्यते", "एतानि पापपुण्यानि आत्मज्ञानिनं न अतिक्रामन्ति", "अमुं पुरुषं पापपुण्ये संतप्ते न कुरुतः", "तं तापः न हरति", "सः अन्येभ्यः न बिभेति", इत्याद्यर्थिकाः श्रुतयः तथा च "ज्ञानाग्निः समस्तकर्माणि भस्म करोति" इत्यादि स्मृतिभिः च एतदेव साधयति।

७१) पुनरपि भाष्यवचनम्– "यत्तु ऋणैः प्रतिबध्यत इति, तन्न, अविद्यावद्विषयत्वात्। अविद्यावान्हि ऋणी, तस्य कर्तृत्वाद्युपपत्तेः। "यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येत्" (४-३-३१) इति हि वक्ष्यति। अनन्यत्सद्वस्त्वात्माख्यं यत्राविद्यायां सत्यामन्यदिव स्यात्तिमिरकृतद्वितीयचन्द्रवत्, तत्राविद्याकृतानेककारकापेक्षं दर्शनादिकर्म तत्कृतं फलं च दर्शयति, तत्रान्योऽन्यत्पश्येत्" इत्यादिना"।[72]

भाष्यस्य समीक्षा यथा– यत् पूर्वं ऋणेन बन्धितो वर्तत इति कथितमासीत् तन्न युक्तम्, यतो ऋणानां सम्बन्धः अविदुषः परं हि। अज्ञानी पुरुषः एव ऋणी भवति। कुत इति चेत् तस्मिन् हि कर्तृत्वादीनां भानं युक्तम्।

"यत्र अन्येन तुल्यता वर्तते तत्रैव अन्यः अन्यं पश्येत्" इत्थं रीत्या श्रुतिः। तात्पर्यन्तु आत्मसंज्ञकः यः वस्तुविशेषः वर्तते सः अनन्यः। तद् वस्तु यत्र अविद्यावस्थायां तिमिररोगकृतद्वितीयचन्द्र-तुल्यम् अन्यचन्द्रसदृशं वर्तते तत्रैव श्रुतिः– "यत्र अन्येन तुल्यता वर्तते तत्रैव अन्यः अन्यं पश्येत्" इति। अनेन वाक्येन अनेककारकापेक्षम् अविद्याकृतदर्शनादिकर्म तथा तेन लब्धुं योग्यं फलमपि दर्शयति।

७२) पुनः श्रीशङ्करः भाष्ये– "यत्र पुनर्विद्यायां सत्यामविद्याकृतानेकत्वभ्रम-प्रहाणम्, "तत्केन कं पश्येत्" (४-५-१५) इति कर्मासम्भवं दर्शयति। तस्मादविद्यावद्विषय एव ऋणित्वं, कर्मसम्भवात् नेतरत्र। एतच्चोत्तरत्र व्याचिख्यासिष्यमाणैरेव वाक्यैर्विस्तरेण प्रदर्शयिष्यामः"।[73]

एतस्य समीक्षा यथा– यत्र ज्ञाने सम्पन्ने अज्ञानजनितस्य अनेकत्वभ्रमस्य नाशो सम्भवति तत्र "तदा केन द्वारा कं पश्येत्" इति श्रुतिः कर्मणः असम्भवभावं दर्शयति। अतः ऋणित्वस्य अविदुषा सह सम्बन्धः। कुतः इति चेत् तेन द्वारा हि कर्मसम्पत्तिः युज्यते।

ज्ञानवता द्वारा न। इदमेव कार्यम् उपरि, यैः वाक्यैः व्याख्यानं कर्तुम् अस्माकम् इच्छा अस्ति तैः विस्तारपूर्वकं प्रदर्शयिष्यामः इति।।

७३) पुनपरि भाष्यम्- "तद्यथेहैव तावत् अथ यः कश्चिदब्रह्मविद् अन्यामात्मनो व्यतिरिक्तां यां काञ्चिद्देवताम्, उपास्ते स्तुतिनमस्कारयागबल्युपहारप्रणिधानध्यानादिना उप आस्ते तस्याः गुणभावमुपगम्य आस्ते– अन्योऽसावनात्मा मत्तः पृथक् अन्योऽहमस्म्यधिकृतः मयास्मै ऋणिवत्प्रतिकर्तव्यम् – इत्येवम्प्रत्ययः सन्नुपास्ते, न स इत्थम्प्रत्ययो वेद विजानाति तत्त्वम्"।[74]

अस्य विवरणं यथा-

इदं कार्यम् इत्थमेव हि।

यत् अस्मिन् मन्त्रे कथितं वर्तते तथा य कोपि अब्रह्मज्ञः अन्यः आत्मनः भिन्नस्य अन्यदेवतायाः उपासनां करोति स्तुतिः, नमस्कारः, यज्ञः, बलिः, उपहारः, इत्यादि सर्वकर्मार्पणञ्च ध्यानादिना निर्वहणं कृत्वा उपस्थितो वर्तते। अर्थात् तस्य गुणभावं स्वीकृत्य वर्तते। तथा मनसि इयं भावना स्थाप्यते यत् इयं देवता अन्या-अनात्मा अस्मात् पृथक् वर्तते, उपासनायै अधिकारी अहं देवतास्वरूपाद् भिन्नः अस्मि, मे अधमर्णवत् देवकृतोपकाराय प्रतिफलत्वेन उपासना करणीया- इत्थंभूतया भावनया सहितः उपासनां करोमि। सः उक्तप्रकारेण भावनावान् पुरुषः तत्त्वं न विजानाति।

७४) पुनः भाष्यं यथा– "न स केवलमेवं भूतोऽविद्वानविद्यादोषवानेव, किं तर्हि? यथा पशुर्गवादिर्वाहनदोहनाद्युपकारैरुपभुज्यते, एवं स इज्याद्यनेकोपकारैरुपभोक्तव्यत्वादेकैकेन देवादीनाम्, अतः पशुरिव सर्वार्थेषु कर्मस्वधिकृत इत्यर्थः"।[75]

अस्य विवरणं यथा–

इत्थंभूतः अज्ञानी न केवलं अविद्यारूपदोषेण युक्तः। एवं चेत् पुनः कथं भवति?। यथा गोमहिषादयः पशुविशेषाः दुग्धप्रदानेन वाहनादिरूपेण उपकारेण च प्रत्येकं देवानां विषये उपभोग्यत्वात् तेषां पशुः सञ्जायते। अत्र तात्पर्यन्तु पशुवत् सर्वप्रकाराणां फलानां प्रदातारः कर्मणाम् अधिकारिणः।

७५) पुनरपि भाष्यम्– "एतस्य ह्यविदुषो वर्णाश्रमादि प्रविभागवतोऽधिकृतस्य कर्मणो विद्यासहितस्य केवलस्य च शास्त्रोक्तं कार्यं मनुष्यत्वादिको ब्रह्मान्त उत्कर्षः। शास्त्रोक्तविपरीतस्य च स्वाभाविकस्य कार्यं मनुष्यत्वादिक एव स्थावरान्तोऽपकर्षः। यथा चैतत्तथा "अथ त्रयो वाव लोकाः" (१-५-१६) इत्यादिना वक्ष्यामः कृत्स्नेनैवाध्यायशेषेण"।[76]

अस्य समीक्षा यथा-एतस्य वर्णाश्रमादि विभागान्तर्भूतस्य कर्माधिकारिणः अविदुषः ज्ञानेन साकं केवलस्य च शास्त्रोक्तस्य च कर्मणां कार्यं मनुष्यत्वादारभ्य ब्रह्मत्वपर्यन्तम् उत्कर्षेण विराजनीयम्।

तथा शास्त्रोक्तात् विरुद्धं यत् स्वाभाविकं कर्म अस्ति तस्य कार्यं मनुष्यत्वादारभ्य स्थावरयोनिपर्यन्तानाम् अपकर्षः प्रापणीयः। इदं कथं भवति इत्यादिविषये अत्र अध्यायान्ते– "अथ त्रयो वाव लोकाः" इत्यादिवाक्यद्वारा सम्यक् प्रकारेण विवरणं करिष्यति।

७६) अथ भाष्यम्– "विद्यायाश्च कार्यं सर्वात्मभावापत्तिरित्येतत्सङ्क्षेपतो दर्शितम्। सर्वाहीयमुपनिषद् विद्याविद्याविभागप्रदर्शनेनैवोपक्षीणा। यथा चैषोऽर्थः कृत्स्नस्य शास्त्रस्य तथा प्रदर्शयिष्यामः"।[77]

एतस्य विवरणं यथा– ज्ञानस्य कार्यप्रवृत्तिः सर्वात्मभावस्य प्राप्तिर्भवति। विषयोऽयं सङ्क्षेपतः प्रदर्शितो वर्तते। एतानि सर्वाणि उपनिषद्, ज्ञानस्य अज्ञानस्य च प्रविभागप्रदर्शनेन समाप्तिम् अगमत्। विषयेऽस्मिन् सम्पूर्णानां शास्त्राणां कः अभिप्रायः इत्येतत् कथयिष्यमाणे प्रकरणे यथावसरं प्रदर्शयिष्यामः।

७७) भाष्ये आचार्यः पुनरपि– "यस्मादेवम्, तस्मादविद्यावन्तं पुरुषं प्रति देवा ईशत एव विघ्नं कर्तुमनुग्रहं चेत्येतद्दर्शयति- यथा ह वै लोके बहवो गोऽश्वादयः पशवो मनुष्यं स्वामिनमात्मनोऽधिष्ठातारं भुज्ज्युः पालयेयुरेवं बहुपशुस्थानीय एकैकोऽविद्वान्पुरुषो देवान् देवानिति पित्राद्युपलक्षणार्थं-भुनक्ति पालयतीति। इन्द्रादयोऽन्ये मत्तो ममेशितारो भृत्य इवाहमेषां स्तुतिनमस्कारेज्यादिनाराधनं कृत्वाभ्युदयं निःश्रेयसं च तत्प्रत्तंफलं प्राप्स्यामीत्येवमभिसन्धिः"।[78]

अस्य विवरणं क्रियते यथा-

कस्मात्कारणात् इत्थं भवति, तत्तु इदानीं श्रुतिः एतत् दर्शयति यत् देवगणः अविद्वांसं पुरुषं प्रत्येव विघ्नस्य अनुग्रहस्य च प्रदाने समर्थः भवति। यथा लोके गोऽश्वादयः पशवः बाहुल्येन आत्मनः स्वामिनः- मनुष्याणां पालनपोषणादिकं कुर्वन्ति तद्रीत्या अनेकपशुस्थानीयः एकैकः अज्ञानी पुरुषः देवतानां पालनपोषणादिकं करोति। "देवान्" इति पदं पित्राद्युपलक्षणार्थम्। मत्तः भिन्नाः ये इन्द्रादयः देवाः ते अस्माकं शासकाः, अहं सेवकभावेन स्तुत्या, नमस्कारेण एवं यज्ञादिकर्मणा तेषाम् आराधनां कृत्वा तैः प्रदत्तान् भोगान् तथा मोक्षञ्च प्राप्स्यामि। इत्थम् अज्ञानिनः सङ्कल्पः अस्ति।

७८) अथ, भाष्ये पुनः आचार्यः– "तत्र लोके बहुपशुमतो यथैकस्मिन्नेव पशावादीयमाने व्याघ्रादिनापह्रियमाणे महदप्रियं भवति, तथा बहुपशुस्थानीय एकस्मिन्पुरुषे पशुभावात् व्युत्तिष्ठत्यप्रियं भवतीति, किं चित्रं देवानां बहुपश्वपहरण इव कुटुम्बिनः। तस्मादेषां देवानां तन्न प्रियम्, किं तत्? यदेतद्ब्रह्मात्मतत्त्वं कथञ्चन मनुष्या विद्युर्विजानीयुः तथा च स्मरणमनुगीतासु भगवतो व्यासस्य–

"क्रियावद्भिर्हि कौन्तेय
देवलोकः समावृतः।

न चैतदिष्टं देवानां

मर्त्यैरुपरि वर्तनम्"।।[79]

अस्याम् अवस्थायां यथा लोके बहुपशुमतः पुरुषस्य एकमपि पशुं कानने विनष्टं व्याघ्रादिद्वारा हरणञ्च समभवत् इति ज्ञात्वा तद् तस्य विषये अतिदुःखदायकं भवति, तद्रीत्या कुटुम्बिनः बहवः गावः अपहृताः इति ज्ञात्वा तस्य अत्यधिकः शोकः सम्भवति। तद्रीत्या तेन तुल्यस्य अनेकपशुस्थानीयस्य एकपुरुषस्य कार्येऽपि पशुभावेन व्युत्तिष्ठत्यप्रियं भवतीति किमाश्चर्यं यदि देवानां कुटुम्बिनः पश्वपहरणमिव दुःखं सञ्जायते। तस्मात् एषां देवानां तत् न प्रियं यत् मनुष्याः ब्रह्मात्मतत्त्वं येन केन प्रकारेण विजानीयुः। अनुगीतायां भगवता व्यासेन उक्तम्- "हे कौन्तेय देवलोकः कर्मपरायणानां पुरुषाणां बाहुल्येन परिपूर्णः वर्तते। देवानां न एतद् इष्टं यत् मनुष्यः तेषामप्युपरि ब्रह्मलोके वर्तेत इति।

७९) पुनरपि भाष्यम्– "अतो देवाः पशूनिव व्याघ्रादिभ्यो ब्रह्मविज्ञानाद्विघ्न- माचिकीर्षन्ति, अस्मदुपभोग्यत्वान्मा व्युत्तिष्ठेयुरिति। यं तु मुमोचयिषन्ति तं श्रद्धादिभिर्योक्ष्यन्ति विपरीतमश्रद्धादिभिः। तस्मान्मुमुक्षुर्देवाराधनपरः श्रद्धाभक्तिपरः प्रणेयोऽप्रमादी स्याद्विद्याप्राप्तिं प्रति विद्यां प्रतीति वा काक्वैतत्प्रदर्शितं भवति देवाप्रियवाक्येन"।[80]

अस्य समीक्षा यथा– देवगणभूतानाम् अस्माकमुपरि मनुष्याणां गमनं न भवतु कदापि। ते मानुषाः देवभूतानाम् अस्माकं कृते भोग्याः।

गोप्रभृतीनां संरक्षणार्थं व्याघ्रादीनां सकाशात् यथा तेभ्यः दूरे अवस्थापनं क्रियते। तद्वत् मनुष्याणां विषयेऽपि तेषां ब्रह्मविज्ञानात् दूरे अवस्थापनं करणीयमिति देवाः। देवाः यं पुरुषं मोचयितुम् इच्छन्ति तं श्रद्धादिना सम्पन्नं कुर्वन्ति। तथा यं मोचयितुं न इच्छन्ति तम् अश्रद्धादिना युक्तं कुर्वन्ति। अतः मोक्षकामिना पुरुषेण देवाराधनायां श्रद्धाभक्तिपरायणतया भवितव्यम्। एवं देवानां प्रियः अनुष्ठानपरः श्रवणादियुक्तः ज्ञानं प्रति अप्रमादयुक्तः च स्यात्। अयमाशयः अप्रियत्वनिवारणसाधकात् वाक्यात् काकूक्तिद्वारा प्रदर्शितो वर्तते। काकूक्तेः विवरणम् इत्थं भवति- शोकामग्नस्य भयचकितस्य च पुरुषस्य उच्चारणे कश्चन कम्पः उत्पद्यते। तदेव काकूसंज्ञया व्यवह्रियते। श्रुतौ "देवादीनाम् इदं न प्रियम्" इत्युक्त्वा काकूक्तिद्वारा एतत् कथितं वर्तते यत् मोक्षकामेन ज्ञानप्राप्तये उपासनादिद्वारा देवताप्रीत्यै श्रद्धावता भवितव्यम्।

६.२. मध्वमतम्

माध्वमतानुसारेण "अहं ब्रह्मास्मीति" महावाक्यस्य विवरणम् इदानीं कर्तव्यं वर्तते। श्रीराघवेन्द्रतीर्थः मध्वमतानुयायी भवति। तेन उपनिषद्भागस्य अस्य महावाक्यस्यापि खण्डार्थनामव्याख्यानेन विवरणं कृतं दृश्यते। श्रीराघवेन्द्रोऽपि मध्वमतानुयायीत्यतः विषयेऽस्मिन् तेन यत्किञ्चित् खण्डार्थनामव्याख्यया विवृत्तं वर्तते तदपि इह भाष्यसमीक्षायाः प्राक् निवेशनीयमिति प्रतिभाति। यथा– "इदम् अग्रे अस्य जगतः पूर्वं

ब्रह्मैव आसीत्। तद्ब्रह्म अहेयं सर्वनियन्तृतया सर्वगतत्वेन न केनापि हातुं अशक्यं ब्रह्म पूर्णं अस्मि अस्तीति मेयं, ज्ञेयमिति आत्मानमेवावेत्-व्यजानात्। स्वस्मात् अन्यस्य पूर्णस्य ब्रह्मणो अभावेन स्वस्यैव पूर्णब्रह्मत्वादिति भावेन स्वात्मानमेवेत्येव शब्दः। "तस्मात् ब्रह्मस्वरूपत्वादेव तद् ब्रह्म सर्वं पूर्णमभवत्। अत्रासीदवेदभवदित्यनद्यतनरूपकालविशेषवाचि लङ्प्रयोगेऽपि 'आत्मा वा इदमेक एवाग्र आसीत् (ऐत. २-२) 'सदेव सोम्येदमग्र आसीत्' (छा-उ-६-२-१) इत्यादौ यथा सत्त्वमनाद्यनन्तकालीनमित्युपेयते त्रिकालवाचिनो लकारस्य कस्यचिदभावेन येन केनचिल्लकारेण निर्देशेऽपि न तत्र विवक्षेति। एवं स्वरूपवेदनपूर्णताभवनयोरप्यनाद्यनन्त-कालीनत्वमेवेति भावः। अत एव तदात्मानमेवेत्यादिनैव परिहारप्राप्तावासीदित्यन्तोक्तिः"।[81]

'तस्मात् सर्वमभवत्' इति एतत् व्याचष्टे सत्यमित्यादिना भाष्येण। "तदपि स्वरूपं नित्यापरोक्षज्ञानेन सर्वदा जानात्येव। अत एव सर्वदा परिपूर्णमिति"।

तदात्मानमेवावेत् तस्मात् तत्सर्वमभवदिति। "आत्मा वा इदमेक एव अग्र आसीत्" सदेव सोम्येदमग्र आसीत्" इत्यादिवत् सदातनज्ञानं पूर्णभावं च आह"[82] अत्र भाष्ये। श्रीरघूत्तमतीर्थविरचितटिप्पण्यां सदातनत्वं प्रति एवमुक्तम्–

“प्रयोग एककालीनः सर्वकालेऽनुषज्यते।

ददर्श विष्णुरित्यादौ नित्यचिद्रूपतो हरेः”।।[83] इति

श्रीमध्वाचार्यमतानुसारेण ‘अहं ब्रह्मास्मि’ इत्येतद् न अभेदबोधकम्। तन्मतानुसारेण इदम् अग्रे अस्य अग्र इति षष्ठ्यर्थे द्वितीया। अहम् अहेयं, ब्रह्म परिपूर्णम्। अस्मि सर्वदा अस्तीति। “यद्यहं शब्दो अस्मद् शब्दार्थवाची ‘अस्मि’ शब्दश्च उत्तमपुरुषे तदात्मानमिति व्यर्थं स्यात्। अतः अहमस्मि शब्दावुक्तार्थावेव”[84]

तथा च ‘अहं’ शब्दस्य अहेयत्ववाचित्वं भाष्ये– “तद्योऽहं सोऽसौ योऽसौ सोऽहं योऽसावसौ पुरुषः सोऽहमस्मि’ इत्यादिष्वप्यहं शब्दोऽन्तर्यामित्वेनाहेयत्ववाची”।[85] माध्वमते “स आत्माऽतत्त्वमसि इति भेदस्य नवकृत्वोऽभ्यासात्”। अतः साधकस्य ब्रह्मणा अभेदकल्पना अयुक्ता। माध्वसिद्धान्तरीत्या “आत्मशब्दस्य परमात्मनि मुख्यत्वेऽपि जीवे भ्रान्तिरुपपद्यते। “यथा सोम्यैकेन मृत्पिण्डेन”[86] इति मृत्पिण्डादि दृष्टान्तश्च भेदानुकूलः भवति।

“वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्”।[87] इत्यादि वाचारम्भणवाक्यमपि जगत्सत्यत्वबाधकं न भवति। श्रीहरेः सर्वोत्तमत्वज्ञापनार्थं सृष्टिनिरूपणं च करोति। सर्वेषाम् सृष्टिः श्रीविष्णोः सकाशादिति द्वैतिनः। यथा भाष्यम्–

“तेजोऽभिमानवान् ब्रह्मा वायुश्चाबभिमानवान्।
रुद्रः क्षित्यभिमानी चाप्येतन्मयमिदं जगत्।।
अभिमन्यमानसहितास्त्रय एतेऽभिमानिनः।
विष्णोर्जाताः क्रमेणैव पूर्वस्मादुत्तरोत्तरम्।।
तेजोऽबन्नाभिधा तस्मादेषामेव प्रकीर्तिता।
एते च त्रीणिरूपाणीत्यभिधागोचराः सुराः।।
ब्रह्मावायुगिरीशेभ्यस्तेभ्यो जातमिदं जगत्।
अतोऽग्निसूर्यसोमानामपि रूपं तदुद्भवम्।।
अतोऽग्निसूर्यसोमानां नामाप्येषां प्रकीर्तितम्।
सादनाद्यमनाच्चैव सत्यमेषां त्रयः सुराः।।
तेषां सत्यं हरिः साक्षाद्यतस्तेषां नियामकः।
प्रधाने सत्यशब्दोऽयं श्रुतिभिः समुदाहृतः”।।[88]

उद्धृतेषु श्लोकेषु प्रथमश्लोकेन “तत्तेजोऽसृजत” तदपोऽसृजत’ ता अन्नमसृजन्त इति वाक्यत्रयगततेजोबन्नशब्दा व्याख्याताः”।।[89]

यथा सर्वलोहानां काञ्चनं प्रथमं स्मृतं तथा मृत्पिण्डसदृशाः निर्णयाः स्मृताः इति कारिकया उक्त्वा अनन्तरं कारिकामेव आश्रित्य सर्वज्ञत्वम् सर्वस्त्रष्टृत्वं, सर्वनियन्तृत्वं, सर्वरक्षितृत्वं च हरौ निक्षिपति। तेन व्याप्यं सर्वमप्युक्तम्। स एवात्मा पूर्णगुणयुक्तः। सः सूक्ष्मः सदा सर्वगः च इत्यपि उक्तम्। यथा–

"हरिस्तेन तु तज्ज्ञानाज्जगज्ज्ञातमिवाखिलम्।
स स्रष्टा चैव संहर्ता नियन्ता रक्षिता हरिः।।
तेन व्याप्तमिदं सर्वमैतदात्म्यमतो विदुः।
स आत्मा पूर्णगुणतःस सूक्ष्मः सर्वगः सदा।।
सर्वोत्तमत्वात्सत्यं तज्जीवाभिन्नं तदासुराः।
विदुर्न त्वं तथा विद्धि श्वेतकेतो कदाचन।।"[90]

अनन्तरं मध्वः जीवब्रह्मभेदज्ञानमेव मोक्षसाधनमिति वदति। सः सर्वदेवदेवेश्वरः प्रभुः पृथक् इत्यप्युक्तम्। सर्वोत्तमः इति ज्ञातः विष्णुः मोक्षमिमं नयेत्। विष्णोः दासरूपेण तस्य समीपप्राप्तिरेव मोक्षः इत्यप्युक्तम् अत्र। यथा- "विष्णोर्दासतया विष्णोः सामीप्यं मोक्ष उच्यते"[91] इति। तस्य मते विष्णुत्वं न मोक्षः। एषः अहमिति वा स्मृतिः मोक्षः। "न विष्णुत्वं तु मोक्षः स्यादेषोऽहमिति वा स्मृतेः"।[92]

जीवेशयोः भेदज्ञानात् विष्णोः उच्चतां ज्ञात्वैव पुरुषः मुच्यते। यथा–

"एवं जीवेशयोर्भेदज्ञानाद्विष्णोः सदोच्चताम्।
ज्ञात्वैव मुच्यते तस्मादेवं जानीहि पुत्रक"।[93]

सालोक्य-सारूप्य-सामीप्य-सायुज्यादीनां मोक्षसाधनत्वं प्रतिपादयति। न कदापि ब्रह्मणा सह ऐक्यं प्रतिपादयति। ऐक्यं न शास्त्रप्रतिपाद्यमिति

मध्वाचार्यः वदति। अनिपुणाः परं जीवब्रह्मैक्यं प्रतिपादयन्ति। उक्तं च भाष्ये–

“ऐकात्म्यं नाम यदिदं केचिद् ब्रूयुरनैपुणाः।
शास्त्रतत्त्वमविज्ञाय तथावादबला जनाः”।।[94]

अन्ये मतानुयायिनः तमःशरीरिणः इत्येव तेषां मतम्। यदुक्तं भाष्ये–

“तेषां तमःशरीराणां तम एव परायणम्”[95]

विपश्चिताम् ईशः अन्यः, अहम् अन्यः इति ज्ञानम्। तदुक्तम्– “अन्य ईशस्तथान्योऽहमिति ज्ञानं विपश्चिताम्”[96] इति।

उत्तमः पुरुषः परमात्मा। सः ईश्वरः अव्ययः लोकत्रयमाविश्य बिभर्ति। यथा “उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः”।[97] विष्णोः गुणान् सदा सर्वगुणात्मकान् ज्ञात्वा मानुषः तस्य प्रसादात् विमुच्यते। यथा–

“प्रत्येकं तु गुणांस्तांस्तु सदा सर्वगुणात्मकान्।
ज्ञात्वा विमुच्यते विष्णोः प्रसादान्मानुषोऽपि सन्”।।[98]

जीवब्रह्मणोः ऐक्यविचिन्तनं अनर्थसाधकमित्येव तस्य मतम्। तदुक्तं भाष्ये–

"जीवाभेदं तथाभेदं जगता ये विदुः प्रभोः।
तेऽपि यान्ति तमो घोरमधरं ब्रह्मतस्कराः।।
भेदाभेदं विदुर्ये च जीवैस्तु जगतापि वा।
परस्य ब्रह्मणो यान्ति तमस्तेऽप्युत्तरं सदा"।।[99]

श्रवणमननध्यानभक्त्यादिकं विना न कस्यापि कदाचन मोक्षः भवेत्। पैङ्गिश्रुतिमाश्रित्य मध्वाचार्येणोक्तं यथा–

"श्रवणं मननं चैव ध्यानं भक्तिस्तथा दृशिः।
ज्ञानञ्चोक्तविशेषाणां सर्वेषां साधनं भवेत्।।
त्यक्त्वैतानि न कस्यापि भवेन्मोक्षः कदाचन"।[100]

भक्तिः मुक्तौ नियतसाधनमिति तस्य मतम्। तेन उद्धृता पैङ्गिश्रुतिः (भाष्यभागः) यथा।

"विष्णुभक्तिर्देवभक्तिर्गुरौ भक्तिस्तथैव च।
तत्तच्छ्रेष्ठ्यानुसारेण मुक्तौ नियतसाधनम्"।।[101]

दुःखहीनां नित्यसुखावस्थाम् एव श्रीमध्वाचार्यः मोक्षत्वेन विश्वसिति। तदुक्तं तस्य भाष्ये (पैङ्गिश्रुतिः)–

"निर्दुःखं तु सुखं नित्यं मोक्ष इत्यभिधीयते।
......मोदन्ते सहिताः सर्वे सदा विष्णुपरायणाः"।।[102]

एकमेवाद्वितीयं ब्रह्म" "नेह नानास्ति किञ्चन" इत्यादयः श्रुतयः न अभेदपराः इति श्रीमध्वाचार्यः। अर्थात् तत्सदृशाभावे तदधिकाभावे च विवक्षा इति। तदुक्तं श्रीमध्वाचार्येण भाष्ये–

"यथैकमुत्तमं पुरुषमपेक्ष्य तस्मिन् पुरे एक एव नान्योऽस्तीत्युक्तेऽपि तत्सदृशस्तदधिको वान्यो नास्तीत्युक्तं भवति।

"एक एवाद्वितीयोऽसौ तदन्यस्य वर्जनात्।
तत्समस्याधिकस्यापि ह्यभावात्पुरुषोत्तमः"।।[103] इति

विष्णोः दर्शनकालात् क्षिप्रमेव तमोवारणं भवतीत्येव तस्याभिप्रायः।

"पुरुष एवेदं सर्वम्" इत्यत्र यत् भूतं यच्च भव्यं यच्च भवदमुक्तमिदं सर्वं पुरुष एव - पुरुषाधीनमेवेति पुरुषस्यामुक्त सर्वेशितृत्वमेवोक्तं न तु सर्वैक्यमित्यर्थः। तदुक्तं भाष्ये (भारते)–

"पुरुष एवेदं सर्वं भूतं भव्यं भवच्च यत्।
इत्युच्यते तदीयत्वान्नतु सर्वस्वरूपतः।।
भूतभव्यादिजातस्य मुक्तानामपि चेश्वरः।
इत्युच्यते श्रुतौ विष्णुः सर्वदा पुरुषोत्तमः"।।[104]

स्नेहयुता मतिः सुस्थिरा भक्तिः मोक्षसाधिका इत्युक्तं श्रीमध्वाचार्येण। यथा–

“सर्वस्मादुत्तम इति सम्यक् स्नेहयुता मतिः।”

सुस्थिरा भक्तिरुद्दिष्टा तया मोक्षो न चान्यतः।।[105]

अनुमानस्य सार्वत्रिकत्वं निरस्यति श्रीमध्वाचार्यः। तस्य मतं यथा।

“निर्णयस्त्वागमेनैव नानुमागमवर्जिता।

क्वचिन्निर्णीतिहेतुः स्यादतः शास्त्राद् विनिर्णयः”।।[106]

माध्वमतमनुसृत्य अक्षपादकणादौ सांख्ययोगार्हताः शिवशक्ति-महायानलोकायताः गाणपत्याः सौरवाश्च दुरागमानुयायिनः। तदुक्तं भाष्ये पाद्मे–

“अक्षपादकणादौ च सांख्ययोगार्हतास्तथा।

शिवशक्तिमहायानलोकायतपुरःसराः।।

गाणपत्याश्च सौराश्च सर्वे प्रोक्ता दुरागमाः”।।[107]

सौगताद्याः शब्द एव प्रमाणमित्यामनन्ति। तन्न युक्तम्। आगमस्यैव प्रामाण्यम्। आगमस्य प्रामाण्ये प्रमाणं नावश्यकम् स्वतः एव प्रामाण्यात्।

“अहं ब्रह्मास्मि” इति बृहदारण्यकोपनिषत्स्थं वाक्यं प्रत्यक्षतः श्रीरामानुजमतमाश्रित्य व्याख्यातुम् अवसरो नास्ति। बृहदारण्यकोपनिषदः व्याख्यानं श्रीमता रामानुजाचार्येण न कृतं भवति इत्यतः। पूर्वमुक्तस्य महावाक्यत्रयस्य रामानुजाचार्यस्य मतविवरणवेलायां तस्य शिष्याणां

विवरणं, तथैव विषयेऽस्मिन् सामान्यतया वेदार्थसङ्ग्रहनामके ग्रन्थे रामानुजाचार्येण यदुक्तं वर्तते तदप्याश्रित्य समीक्षा कृता आसीत्। अतः इदानीमपि तां सरणिमाश्रित्य श्रीरामानुजपक्षविवरणाय यत्नं करोमि।

६.३. रामानुजमतम्

श्रीरामानुजाचार्येण 'वेदार्थसङ्ग्रहे' ब्रह्मणः शिवस्यापि नारायणात्मकता प्रतिपादिता वर्तते। महाभारते ब्रह्मरुद्रसंवादे ब्रह्मा रुद्रं प्रत्याह–

"तवान्तरात्मा मम च ये चान्ये देहिसंज्ञिता' (म.भा.शा. ३३९-४) इति, रुद्रस्य ब्रह्मणश्च, अन्येषां च देहिनां परमेश्वरो नारायणः, अन्तरात्मतया अवस्थित इति"[108]

सामान्येन सर्वबीजानां परमात्मात्मकत्वे सिद्धेऽपि ब्रह्मशिवयोः परमात्मात्मकत्वं विशेषतो दर्शयितुमेव। केचित् अवैदिकाः भगवत उपादानत्वं रुद्रस्य निमित्तत्वं च वदन्ति। तेषां मते "उपादानं तु भगवान् निमित्तं तु महेश्वरः" इति एतन्न समीचीनम्– "ब्रह्म स वृक्ष इति उपादानता। ब्रह्माध्यतिष्ठत्, इति तस्यैव निमित्तत्वम्।

चित्, अचित्, ईश्वरः इति तत्त्वत्रयं रामानुजमते वर्तते। चित् जीवः, अचित् जगत्, ईश्वरः परमात्मा। रामानुजमते जीवेश्वरयोः माध्वमतवत् ऐक्यं नास्ति। अत्र जीवेश्वरयोः भेदो वर्तते। श्रीरामानुजमते

जीवः दुःखत्रयविशिष्टः भवति ईश्वरस्तु दुःखत्रयरहितः ब्रह्म ईशनसमर्थः। जीवस्तु अनीशः। उक्तं च ऋग्वेदे–

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति"।।[109]

अत्र जीवः कर्मफलभोक्ता, ईश्वरः कर्मफलदाता, परमात्मा अखण्डः आधारश्च। जीवः खण्डः आश्रितः। ईश्वरः नियामकः, जीवः नियम्यः। उक्तञ्च यतीन्द्रमतदीपिकायाम्– "अयं च कर्ता भोक्ता शरीरी शरीरं च भवति। प्रकृत्यपेक्षया शरीरी ईश्वरापेक्षया अशरीरम्। संसारदशायां स्वरूपज्ञानयोः सङ्कोचात् अणुपरिमाणम् आत्मस्वरूपम्"। मोक्षदशायां तु सर्वगतं सर्वव्यापी स्वरूपज्ञानं च विस्तीर्णतया प्रकाशते। विशिष्टाद्वैतवादे मुक्तावपि न जीवब्रह्मणोरैक्यम्। तत्र साम्यमात्रं वर्तते। "मम साधर्म्यमागताः"[110] इति गीतायां भगवता उक्तम्। अतः श्रीमध्वाचार्यवत् "अहं ब्रह्मास्मि" इति वाक्यस्थस्य 'अहं' शब्दस्य जीवात्मार्थकत्वं न स्वीकृतं वर्तते। मध्वाचार्यवत् रामानुजसम्प्रदायेऽपि 'अहम्' इत्यस्य 'अहेय' इति रीत्या व्याख्यानं स्वीकरणीयम् इति प्रतिभाति।

देहेन्द्रियमनःप्राणेभ्यः विलक्षणः आत्मा। शरीरात् पृथक् आत्मनः सिद्धिं स्वीकुर्वन्तो वर्तन्ते नैयायिकवैशेषिकाः। शरीरं यदि आत्मा

स्यात्तर्हि हस्तपादादीनां नाशेन आत्मनोऽपि नाशः स्यात्। शरीरात् पृथक् आत्मनः अस्तित्वे इदं प्रमाणम्। यदि आत्मा शरीरे वर्तते तर्हि तत्र कुत्र वर्तते इति जिज्ञासायाः समाधानम् आवश्यकम्। अवयवेषु आत्मा वर्तते इत्युच्यते तर्हि शरीरे बहवः आत्मानः वर्तन्ते इति वक्तव्यम् आपद्येत। अतः एकस्मिन् शरीरे आत्मनः बहुत्वं न युक्तम्। अवयवसङ्घाते आत्मा वर्तत इति चेत् न। यदि एकस्मिन् अवयवे आत्मा नास्ति तर्हि कथं समाहारे आत्मा भविष्यति? अतः आत्मा शरीरात् भिन्नः भवति। शरीरं क्षेत्रम्, आत्मा क्षेत्रज्ञः खलु। अतः कदापि, 'अहं ब्रह्मास्मि' इति वाक्यस्थः 'अस्मद्' शब्दः मद्भिन्नः आत्मा नास्ति इत्यर्थे नान्वेति।

अन्योपनिषदन्तर्गतानि "अहं ब्रह्मास्मि" इति महावाक्यसदृशानि कानिचन वाक्यानि

सदृशवाक्यानि	उपनिषद्	पुटसंख्या
१) योऽसावसौ पुरुषः सोऽहमस्मि (यः असौ- पुरुषः सः असौ अहम् अस्मि	ईशावास्योपनिषद् मन्त्र-१६	4 112 UPANIṢADS I Part "
२) सोऽहमस्मि	बृहदारण्यकोपनिषद् मन्त्रः १-४-१	218 112 UPANIṢADS I Part
३) अहं ब्रह्मास्मि इति (आवर्तनमात्रम्)	बृहदारण्यकोपनिषद् मन्त्रः १-४-१०	221 112 UPANIṢADS I Part
४) प्रत्याहाहं ब्रह्म	बृहदारण्यकोपनिषद् मन्त्रः १-५-१७	228 112 UPANIṢADS I Part
५) अहं ब्रह्मेति विज्ञानात्	अध्यात्मोपनिषद् मन्त्रः ५०	312 112 UPANIṢADS II Part
६) तद्ब्रह्माहम्	कैवल्योपनिषद् मन्त्रः १७	345 112 UPANIṢADS I Part
७) तद्ब्रह्माद्वयमस्म्यहम्	कैवल्योपनिषद् मन्त्रः १९	345 112 UPANIṢADS I Part

८) अहमीशोऽस्मि	कैवल्योपनिषद् मन्त्रः २०	346 112 UPANIṢADS I Part
९) ब्रह्म भवाम्यहम्	शुकरहस्योपनिषद् मन्त्रः ३४	476 112 UPANIṢADS I Part
१०) ब्रह्मैवाहमस्मि	परमहंसोपनिषद् मन्त्रः ४	369 112 UPANIṢADS I Part
११) ब्रह्माहमस्मि	परमहंसपरिव्रा- जकोपनिषद् मन्त्रः ४	304 112 UPANIṢADS उपनिषत्सर्वस्वम्
१२) सोऽहम् (सः इति ब्रह्म)	दक्षिणामूर्त्युपनिषद् मन्त्रः २०	144 112 UPANIṢADS II Part
१३) ब्रह्माहमिति वेदनम्	आत्मोपनिषद् मन्त्रः ८	326 112 UPANIṢADS II Part
१४) सोऽहमस्मि	कौषीतकि ब्राह्मणोपनिष् मन्त्रः ६	389 112 UPANIṢADS II Part
१५) तद्ब्रह्माहम्	स्कन्दोपनिषद् मन्त्रः ५	153 112 UPANIṢADS II Part
१६) आत्माहम्	सर्वसारोपनिषद् मन्त्रः १६	464 112 UPANIṢADS I Part

१७) ब्रह्मैवाहम्	सर्वसारोपनिषद् मन्त्रः २०	464 112 UPANIṢADS I Part
१८) ब्रह्मैवाहमिति	नारदपरिव्राजको- पनिषद् मन्त्राः-६६	503 112 UPANIṢADS उपनिषत्सर्वस्वम्
१९) अहं ब्रह्मास्मि	पैङ्गलोपनिषद् मन्त्रः ३-४	207 112 UPANIṢADS II Part
२०) अहं ब्रह्मेति	पैङ्गलोपनिषद् मन्त्रः ४-२५	212 112 UPANIṢADS II Part
२१) ब्रह्मैवाहमस्मीति	निरालम्बोपनिषद् मन्त्रः ३९	470 112 UPANIṢADS I Part
२२) अहं ब्रह्मास्मि	मैत्रेय्युपनिषद् मन्त्रः ३-१	436 112 UPANIṢADS II Part
२३) अहं ब्रह्मैवास्मि	महोपनिषद् मन्त्रः २-११	220 112 UPANIṢADS II Part
२४) ब्रह्मैवाहमिति	महोपनिषद् मन्त्रः ४-२५	233 112 UPANIṢADS II Part
२५) अहं ब्रह्मेति	महोपनिषद् मन्त्रः ४-७२	238 112 UPANIṢADS II Part

२६) तद्ब्रह्माहमिति	ब्रह्मबिन्दूपनिषद् मन्त्रः ८	342 112 UPANIṢADS I Part
२७) तद्ब्रह्माहमिति स्मृतम्	ब्रह्मबिन्दूपनिषद् मन्त्रः २१	343 112 UPANIṢADS I Part
२८) ब्रह्माहमिति संस्थितिः	त्रिशिखीब्राह्म- णोपनिषद्	102 112 UPANIṢADS II Part
२९) परंब्रह्मैवाहमिति	मुद्गलोपनिषद् मन्त्रः ३-३	176 112 UPANIṢADS II Part
३०) तद्ब्रह्मास्मि परं पद्म्	पञ्चब्रह्मोपनिषद् मन्त्रः २५	414 112 UPANIṢADS II Part
३१) सोऽहमस्मीति	पञ्चब्रह्मोपनिषद् मन्त्रः २८	414 112 UPANIṢADS II Part
३२) तद्ब्रह्माहमिति	अध्यात्मोपनिषद् मन्त्रः १०	310 112 UPANIṢADS II Part
३३) तद्ब्रह्माहमिति	कैवल्योपनिषद् मन्त्रः १७	345 112 UPANIṢADS I Part
३४) ब्रह्म...... अहमस्मीति	जाबालदर्शनोपनिषद् मन्त्रः ९-५	554 112 UPANIṢADS I Part

परामर्शाः

1. बृहदारण्यकोपनिषद् - 1-4-10
2. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 631
3. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 631
4. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 631
5. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 632
6. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 632
7. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 632
8. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 632
9. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 632
10. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 632
11. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 632
12. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 632
13. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 633
14. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 633
15. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 633
16. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 633
17. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 633

18. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 633

19. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 633

20. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 634

21. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 634

22. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 634

23. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 634

24. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 634

25. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 634

26. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 634

27. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 634

28. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 635

29. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 635

30. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 635

31. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 635

32. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 635

33. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 635

34. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 635

35. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 635

36. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 635

37. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 635

38. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 635

39. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 636

40. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 636

41. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 636

42. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 636

43. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 636

44. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 636

45. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 636

46. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 636

47. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 636

48. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 637

49. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 637

50. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 637

51. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 637

52. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 637

53. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 637

54. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 637

55. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 638

56. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 638

57. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 638

58. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 638

59. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 638

60. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 638

61. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 638

62. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 638

63. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 638

64. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 638

65. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 638

66. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 638

67. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 638

68. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 639

69. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 639

70. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 639

71. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 639

72. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 639

73. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 639

74. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 639

75. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 640

76. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 640

77. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 640

78. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 640

79. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 640

80. शङ्करग्रन्थावलिः (प्रथमो भागः) उपनिषद्भाष्यम् - पुटसंख्या - 640

81. बृहदारण्यकोपनिषत्खण्डार्थः - पुटसंख्या - 40, 41

82. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 91

83. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 92

84. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 92

85. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 93

86. छान्दोग्योपनिषद् - 6-1-4

87. छान्दोग्योपनिषद् - 6-1-4

88. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 102, 103

89. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 103

90. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 105

91. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 106

92. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 106

93. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 107

94. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 111

95. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 111

96. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 112

97. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 113

98. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 116

99. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 116

100. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 126

101. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 126

102. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 126, 127

103. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 128

104. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 141

105. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 142

106. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 160

107. बृहदारण्यकोपनिषद्भाष्यम् - पुटसंख्या - 162

108. वेदार्थसंग्रहः - पुटसंख्या - 118

109. ऋग्वेदः - 1-164-20

109. श्रीमद्भगवद्गीता - 114-2

सप्तमोऽध्यायः

निर्णयसंक्षेपः

अस्य शोधप्रबन्धस्य अध्यायसप्तकं वर्तते। यथा-

१. प्रथमोऽध्यायः

आमुखपठनम्

१.१. नास्तिकदर्शनानां सामान्यनिरूपणम्

१.१.१. दर्शनम् - स्वरूपपर्यालोचना

१.१.२. दर्शनम् - जिज्ञासाविर्भूतम्

१.१.३. चार्वाकदर्शनम्

१.१.४. जैनदर्शनम्

१.१.५. बौद्धदर्शनम्

१.२. आस्तिकदर्शनानां सामान्यविचारः

१.२.१. सांख्यदर्शनम्

१.२.२. योगदर्शनम्

१.२.३. न्यायदर्शनम्

१.२.४. वैशेषिकदर्शनम्

१.२.५. मीमांसादर्शनम्

१.३. वेदान्तदर्शनम् (उत्तरमीमांसा)

१.३.१. श्रीशङ्कराद्वैतवेदान्तवादः

१.३.२. श्रीशङ्करोत्तरवेदान्तवादाः

१.३.२.१. विशिष्टाद्वैतदर्शनम्

१.३.२.२. द्वैतदर्शनम्

१.३.२.३. भेदाभेददर्शनम्

१.३.२.४. द्वैताद्वैतदर्शनम्

१.३.२.५. शुद्धाद्वैतदर्शनम्

२. द्वितीयोऽध्यायः

महावाक्यानां सामान्यविचारः स्वरूपकथनं च

२.१. महावाक्यानां सामान्यस्वभावः

२.२. महावाक्यानां पाठक्रमः

२.३. महावाक्यानां सार्थकता

२.४. शुकरहस्योपनिषदि महावाक्यानां स्वरूपम्

२.५. पैङ्गलोपनिषदि महावाक्यानां स्वरूपम्

२.६. बह्वृचोपनिषदि महावाक्यानां स्वरूपम्

२.७. उपनिषत्संख्यायां मतभेदः

२.८. मुक्तिकोपनिषदनुसारेण उपनिषत्संख्या

३. तृतीयोऽध्यायः

"अयमात्मा ब्रह्म" इति महावाक्यस्य समीक्षा

३.१. शङ्करमतम्

३.२. मध्वमतम्

३.३. रामानुजमतम्

४. चतुर्थोऽध्यायः

"प्रज्ञानं ब्रह्म" इति महावाक्यस्य गौरवात्मकं पठनम्

४.१. शङ्करमतम्

४.२. मध्वमतम्

४.३. रामानुजमतम्

५. पञ्चमोऽध्यायः

"तत्त्वमसि" इति महावाक्यस्य अन्वेषणात्मकं पठनम्

५.१. शङ्करमतम्

५.२. मध्वमतम्

५.३. रामानुजमतम्

६. षष्ठोऽध्यायः

"अहं ब्रह्मास्मि" इति महावाक्यस्य गहनतमं पठनम्

६.१. शङ्करमतम्

६.२. मध्वमतम्

६.३. रामानुजमतम्

७. सप्तमोऽध्यायः

निर्णयसंक्षेपः

आमुखपठनात्मके प्रथमेऽध्याये नास्तिकदर्शनानां सामान्यनिरूपणं कृतं वर्तते। अत्र चार्वाकदर्शनम्, जैनदर्शनम्, बौद्धदर्शनम्, शून्यवादः, क्षणिकविज्ञानवादः, ज्ञानाकारबाह्यार्थवादः, प्रत्यक्षस्वलक्षणक्षणिक बाह्यार्थवादः, सांख्यदर्शनम्, योगदर्शनम्, न्यायदर्शनम्, वैशेषिकदर्शनम्, मीमांसादर्शनम्, वेदान्तदर्शनम् इत्यादयः विषयाः, विन्यस्ताः। नास्तिकदर्शनस्य विन्यासानन्तरम् आस्तिकदर्शनानां सामान्यविचाराय श्रद्धा प्रदत्ता वर्तते। तत्र आस्तिकदर्शनेषु सांख्यदर्शनम्, योगदर्शनम्, न्यायदर्शनम्, वैशेषिकदर्शनम्, मीमांसादर्शनं च अधिकृत्य विषयाः लिखिताः। तदनन्तरं वेदान्तदर्शनस्य (उत्तरमीमांसायाः) विचारः। तत्र श्रीशङ्कराद्वैतवेदान्तः, श्रीशङ्करोत्तरवेदान्तविषयाश्च परिगणिताः। तत्र भेदाभेददर्शनम्, द्वैताद्वैतदर्शनम्, द्वैतदर्शनम्, विशिष्टाद्वैतदर्शनम्, शुद्धाद्वैतदर्शनम् इत्यादिविषयाः समुपन्यस्ताः वर्तन्ते।

वेदान्तर्गतेषु कर्मकाण्डोपासनाकाण्डज्ञानकाण्डेषु कर्मकाण्डः ऐहिकसुखसम्पादनाय, उपासनाकाण्डः ऊर्ध्वलोकप्राप्तये, ज्ञानकाण्डः जननमरणराहित्याय ब्रह्मप्राप्तये च उपायभूताः सन्ति। कर्मकाण्डोपासनाकाण्डौ संसारान्तर्गतौ। ज्ञानकाण्डस्तु संसारातीतश्च।

नरजन्मपरमलक्ष्यन्तु संसारसागरस्य तरणेन संसारदुःखात् मोचनम् इति आमनन्ति विद्वांसः। तत्र परं शाश्वती शान्तिः समाधानञ्च। एवं ज्ञानकाण्डं मनुष्यान् परमलक्ष्यं नेतुं समर्थं भवति। ज्ञानकाण्डविषयाः उपनिषदन्तर्भूताः। आत्मविद्यायाः अमूल्यानि रत्नानि भवन्ति उपनिषदः। भौतिकविज्ञाने आर्जितानि सर्वाणि विज्ञानानि नितान्तशान्तये समाधानाय च न प्रभवन्ति। आध्यात्मिकज्ञानं परं परमशान्तये समाधानाय च अलम्। अधुनापि तस्मादेव कारणात् वेदान्तविषयः तत्त्वदर्शनरूपताम् आदाय मानवहृदयेषु नरीनर्ति सदा मुदा।

उपनिषद्दर्शनेषु बहवः विभागाः सन्ति। तेषु आदिशङ्कराचार्यस्य अद्वैतमतम्, मध्वाचार्यस्य द्वैतमतम्, रामानुजाचार्यस्य विशिष्टाद्वैतमतञ्च विशिष्य प्रतिपादनम् अर्हन्ति। शोधप्रबन्धेऽस्मिन् उपर्युक्तमतत्रयमाश्रित्य "अयमात्मा ब्रह्म", "प्रज्ञानं ब्रह्म", "तत्त्वमसि", "अहं ब्रह्मास्मि" इत्येतत् महावाक्यचतुष्टयं विवेचनात्मकबुद्ध्या पठितं वर्तते। यद्यपि एतानि वाक्यानि भिन्नोपनिषदन्तर्गतानि तथापि तानि वाक्यानि परस्परसमन्वयभावम् आवहन्ति। यथा– "अयमात्मा ब्रह्म" इति महावाक्यं ब्रह्मनिर्देशकथनात्मकं भवति। "प्रज्ञानं ब्रह्म" इति वाक्यं ब्रह्मस्वरूपकथनात्मकं भवति।

“तत्त्वमसि” इति वाक्यं साधकं प्रत्युक्तम् उपदेशवाक्यं भवति। “अहं ब्रह्मास्मि” इति अन्तिमं महावाक्यं भक्तविषये अन्तिमम् अनुभववाक्यं च भवति।

यद्यपि एतानि वाक्यानि भिन्नोपनिषदन्तर्गतानि तथापि तानि परस्परसाकाङ्क्षवाक्यानि च भवन्ति इति वैशिष्ट्यम्। तस्मादेव कारणात् उपनिषदां मध्यात् एतानि वाक्यानि स्वीकृत्य परस्परान्वयेन दर्शनसमष्टेः विवरणाय प्रयुज्यन्ते। एतदेव महावाक्यानामेषां प्रथमं महत्त्वम्। ब्रह्मैक्यसूचकानि वेदान्तमुख्यवाक्यानि भवन्ति इमानि।

१) यद्यपि महावाक्यचतुष्टयं बहुप्राचीनकालादारभ्य स्वीकृतं वर्तते तथापि तेषां विषये इतःपर्यन्तं न कोऽपि पृथक् पठनं कृतवान् इत्यतः ममायं प्रबन्धः विषयेऽस्मिन् प्रथमः प्रयत्नः इति विशेषः।

२) आत्मैक्यसूचकानि अन्यान्यपि वाक्यानि यद्यपि उपनिषत्सु प्रभूततया वर्तन्ते तथापि तानि न इह मुख्यतया स्वीकृतानि। एवमपि शोधप्रबन्धेऽस्मिन् तान्यपि यथायोग्यं सञ्चयनं कृत्वा पट्टिकारूपेण प्रदत्तानि वर्तन्ते इति शोधप्रबन्धस्यास्य द्वितीयं वैशिष्ट्यम्।

३) प्रकृतमहावाक्यचतुष्टयस्य अन्यवाक्यापेक्षया वैशिष्ट्यं वर्तते वा इति प्रश्ने कृते वर्तते इत्युत्तरम्। एषां वाक्यानां ऋग्यजुस्सामाथर्ववेदाधारत्वं वर्तते इति वाक्यानां वैशिष्ट्यमपि इह सूचितम्।

वस्तुतः एतानि महावाक्यानि तत्तद्वेदान्तर्गतानि इत्येतदेव तादृशीं संज्ञां वोढुं अर्हन्ति। तथा हि– "प्रज्ञानं ब्रह्म" इत्येतद् ऋग्वेदसम्बन्धि महावाक्यम्। "अहं ब्रह्मास्मि" इत्येतद् यजुर्वेदान्तर्गतं महावाक्यम्। "तत्त्वमसि" इति वाक्यं सामवेदसम्बन्धि। "अयमात्मा ब्रह्म" इत्येतद् अथर्ववेदसम्बन्धि वाक्यम्। "प्रज्ञानं ब्रह्म" इति वाक्यं जीवस्य ब्रह्मणः च लक्षणवाक्यं भवति। "अहं ब्रह्मास्मि" इति वाक्यं तत्त्वश्रवणानन्तरं शिष्ये सञ्जातम् अनुभवं द्योतयति। गुरूपदेशद्वारा निरस्तसंशयः शिष्यः यदा प्रबोधितो भवति तदा तस्मिन् सञ्जाता अवस्था इयं भवति। 'तत्त्वमसि' इति वाक्यं शिष्यस्य अज्ञानापनोदनाय तं ब्रह्मस्वरूपतया निवेदयति। "अयमात्मा ब्रह्म" इति जीवात्मपरमात्मनोः अपरोक्षत्वं द्योतयति। स्वरूपसाक्षात्कारेऽपि इदं वाक्यं सूचनां प्रददाति।

अध्याये द्वितीये महावाक्यानां तत्त्वं, तेषां महत्वं ब्रह्मात्मैक्यप्रतिपादनत्वं च सूचितम्। उपनिषदन्तर्गतवाक्यान्तर्भूतानां तेषां विषये पूर्णार्थप्रतिपादनं युक्ततया कृतं वर्तते। केन महावाक्येन किं कार्यं इत्यपि इह चिन्तितं भवति। "प्रज्ञानं ब्रह्म" प्रभृतीनि वाक्यानि महावाक्यत्वं कुतः अलङ्कुर्वन्ति इति विषयेऽपि विचारः कृतो वर्तते। महावाक्यानां क्रमविषये अपि अत्र विचारः कृतः। वाक्यानामेषां सिद्धार्थबोधकत्वमपि इह सूचितम्। एवम् एषां– १) महावाक्यानि २) वेदान्तवाक्यानि ३) सिद्धार्थबोधकानि वाक्यानीति च संज्ञा।

महावाक्यानाम् अवबोधः न केवलेन वाच्यार्थेन भवतीत्यतः अत्र लक्ष्यार्थोऽपि स्वीकृतः। प्रकरणानुसारेण शब्दशक्तिवृत्तिमधिकृत्यापि लघुपठनं कृतम्। प्रसङ्गवशात् लक्षणाप्रभेदोऽपि इह पठितो वर्तते। शुकरहस्योपनिषदि महावाक्यचतुष्टयस्य यत् प्रतिपादनं कृतं तत् पट्टिकायां प्रदत्तं वर्तते इह।

महावाक्यम्	वेदः	उपनिषद्
१. प्रज्ञानं ब्रह्म	ऋग्वेदः	ऐतरेयोपनिषद्
२. अहं ब्रह्मस्मि	यजुर्वेदः	बृहदारण्यकोपनिषद्
३. तत्त्वमसि	सामवेदः	छान्दोग्योपनिषद्
४. अयमात्मा ब्रह्म	अथर्ववेदः	माण्डूक्योपनिषद्

संवेदनानुकूलक्रमम् आश्रित्य या पट्टिका वर्तते सापि इह लिखिता वर्तते। यथा–

महावाक्यम्	वेदः	उपनिषद्
१. अयमात्मा ब्रह्म	अथर्ववेदः	माण्डूक्योपनिषद्
२. प्रज्ञानं ब्रह्म	ऋग्वेदः	ऐतरेयोपनिषद्
३. तत्त्वमसि	सामवेदः	छान्दोग्योपनिषद्
४. अहं ब्रह्मास्मि	यजुर्वेदः	बृहदारण्यकोपनिषद्

एवं वेदानां स्वतःसिद्धप्रामाण्यं पौर्वापर्यञ्चाश्रित्य प्रथमरेखाचित्रस्थः क्रमः। संवेदनक्रममाश्रित्य द्वितीयरेखाचित्रस्थः क्रमः। शुकरहस्योपनिषदि महावाक्यानि यया रीत्या लिखितानि तान्यपि इह सूचितानि। यथा–

१. ॐ प्रज्ञानं ब्रह्म

२. ॐ अहं ब्रह्मास्मि

३. ॐ तत्त्वमसि

४. ॐ अयमात्मा ब्रह्म

शुकरहस्योपनिषदि महावाक्यानां विषये कृतं अर्थविवरणमपि इह सूचितम्। उपनिषदां भाष्यं श्रीशङ्कराचार्येण प्रथमं कृतमित्यतः, ऋषित्रयस्वीकृतः, शङ्कर-मध्व-रामानुजकृतः महावाक्यक्रमः श्रीशङ्करकल्पितः इत्यवगन्तुं शक्यते।

पैङ्गलोपनिषदि अपि महावाक्यचतुष्टयं दृश्यते। तत् वैशिष्ट्यमावहति। यथा–

"तत्त्वमसि",

"त्वं तदसि"

"त्वं ब्रह्मासि"

"अहं ब्रह्मास्मि" इति।

महावाक्येषु एषु प्रथमवाक्यं शिष्यं प्रति, अन्तिमं वाक्यं स्वानुभवात्मकं वाक्यम् इत्यपि उक्तं भवति। इह महावाक्यानां

पट्टिकाद्वयं पैङ्गलोपनिषदि याज्ञवल्क्यानुसारेण, शङ्करादिभिः अङ्गीकृतानुसारेण च प्रदत्तं वर्तते। यथा–

पैङ्गलोपनिषदि याज्ञवल्क्यमहावाक्यानि	श्रीशङ्करादिभिः अङ्गीकृतानि अन्योपनिषन्महावाक्यानि
तत्त्वमसि - (तत् प्रज्ञानं त्वम् असि)	तत्त्वमसि
त्वं तदसि - (त्वं तद् ब्रह्म असि)	प्रज्ञानं ब्रह्म
त्वं ब्रह्म असि - (त्वं ब्रह्म भवसि)	अयमात्मा ब्रह्म
अहं ब्रह्मास्मि - (न मे ब्रह्मणा पार्थक्यम्)	अहं ब्रह्मास्मि

एवं महावाक्यानां त्रैविध्यं अत्र प्रथमतया सूचितम्। तत्रत्यानां न्यूनतां वैशिष्ट्यञ्च अधिकृत्य विमर्शनानि च प्रदत्तानि।

तृतीयाध्यायादारभ्य षष्ठाध्यायपर्यन्तं महावाक्यानां समीक्षात्मकं पठनं कृतं वर्तते। इह महावाक्यानाम् अद्वैतद्वैतविशिष्टाद्वैतरीत्या समीक्षा कृता वर्तते। अत्र श्रीशङ्कराचार्यभाष्यवत् मध्वरामानुजयोः भाष्ये महावाक्यमधिकृत्य कदाचित् बहुधा कथनं द्रष्टुं न शक्यते। एवमपि

व्याख्यानत्वेन समादरणीयत्वात् शोधग्रन्थेऽस्मिन् यथार्हं विन्यासो वर्तते। "अयमात्मा ब्रह्म" इति महावाक्यस्य समीक्षा कृता वर्तते। आचार्यत्रयस्यापि भाष्यवचनमनुसृत्य महावाक्यस्यास्य विवरणवेलायां भाष्यवचनानि साकल्येन अत्र न लिखितानि। तथापि भाष्यविषयस्य अन्यूनतया विवरणं आत्मनः शैलीमवलम्ब्य इह कृतं वर्तते। एवं श्रीशङ्करस्य-मध्वस्य-रामानुजस्य च अभिप्रायप्रकटनवेलायां भाष्यात् यथार्हम् उद्धरणं कृत्वा विवरणाय प्रयत्नं कृतवान्। वादप्रतिवादरूपेण महावाक्यस्यास्य अर्थकथनं श्रीमच्छङ्कराचार्येण अतिविस्तृततया कृतं मनीषिणां तृप्तये। आचार्यत्रयस्य पद्धतिमनुसृत्य महावाक्यस्यास्य एकत्र पठनं न केनापि इतः पर्यन्तं कृतं वर्तते। महावाक्यस्यास्य अन्यमहावाक्यनाञ्च वैशिष्ट्यं द्वितीयाध्याये सम्यक् विस्तारितं वर्तते। प्रथमतया यानि औपनिषदिकानि वाक्यानि अर्थविषये अनेन वाक्येन साधर्म्यम् आवहन्ति तेषामपि सङ्कलनं कृत्वा इह प्रदर्शितानि वर्तन्ते। एकस्य महावाक्यस्य सदृशानि द्वात्रिंशत् अन्यानि वाक्यानि इह सूचितानि वर्तन्ते। उपवाक्येन सूचितानां एषाम् उपरि "अयमात्मा ब्रह्म" इति माण्डूक्योपनिषदि अन्तर्भूतस्य वाक्यस्य प्राधान्यं महत्त्वं च द्वितीयाध्याये विस्तृतं खलु। उपवाक्यानां तेषां पट्टिका तत्र प्रदत्ता वर्तते।

"प्रज्ञानं ब्रह्म" इति महावाक्यं ऋग्वेदोपनिषद्भूतस्य ऐतरेयस्य भागः। इह प्रथमं किन्नाम प्रज्ञानमिति विवृतं वर्तते। तदनन्तरं भाष्यत्रयमवलम्ब्य समीक्षात्मकपठनाय यत्नः आरभ्यते। अत्रापि पूर्वोक्तवत् श्रीमच्छङ्कराचार्यस्य भाष्यं पक्षविपक्षरूपेण विस्तरेण प्रतिपादितं वर्तते। मध्वस्तु द्वैतमतानुसारेण ब्रह्मणः इन्द्रत्वं प्रकल्प्य द्वैतं स्थापयति। आचार्यस्यास्य सिद्धान्तानुरोधेन प्रज्ञानरूपः आत्मा एव इन्द्रः प्रजापतिः हरिश्च। मध्वाचार्येण तु नवभिः पद्यैः "प्रज्ञानं ब्रह्म" इति महवाक्यस्य भाष्यं लिखितं दृश्यते।

श्रीरामानुजाचार्यस्य मते ब्रह्म नारायणः भवति। रामानुजाचार्यस्य मतानुयायी भवति रङ्गरामानुजः। अतः रामानुजाचार्यस्य मतविवरणवेलायां रङ्गरामानुजस्य प्रकाशिका नाम व्याख्या अपि आश्रिता वर्तते। रामानुजानुयायिषु पञ्च पण्डिताः विद्यन्ते। ते भारद्वाजरामानुजाचार्यः, रङ्गरामानुजमुनिः, कूरनारायणमुनिः, रामानन्दमुनिः, गोपालानन्दयोगी च भवन्ति। अतः विद्वद्वरेण्यानाम् एतेषाम् अभिप्रायोऽपि प्रसङ्गवशात् इह योजितः वर्तते। "प्रज्ञानं ब्रह्म" इति महावाक्यविषये अपि महावाक्यसदृशानि वाक्यानि अपि सङ्कलितानि।

आहत्य द्वाविंशतिः वाक्यानि इह सञ्चितानि। तेषामपि पट्टिका रेखाचित्ररूपेण अत्र योजिता वर्तते।

अनन्तरं "तत्त्वमसि" इति महावाक्यस्य अन्वेषणात्मकं पठनम्। इदं महावाक्यं छान्दोग्योपनिषदि अन्तर्भवति। अस्य महावाक्यस्य विषये किञ्चित् वैशिष्ट्यम् अत्र उल्लेखनीयं वर्तते। तत्त्वमसीति महावाक्यभागः छान्दोग्योपनिषदः षष्ठाध्याये नववारम् उक्तो वर्तते। उक्तविषयस्य पट्टिका यथा –

१) अध्यायः - ६, खण्डः - ८, मन्त्रः - ७
२) अध्यायः - ६, खण्डः - ९, मन्त्रः - ४
३) अध्यायः - ६, खण्डः - १०, मन्त्रः - ३
४) अध्यायः - ६, खण्डः - ११, मन्त्रः - ३
५) अध्यायः - ६, खण्डः - १२, मन्त्रः - ३
६) अध्यायः - ६, खण्डः - १३, मन्त्रः - ३
७) अध्यायः - ६, खण्डः - १४, मन्त्रः - ३
८) अध्यायः - ६, खण्डः - १५, मन्त्रः - ३
९) अध्यायः - ६, खण्डः - १६, मन्त्रः - ३

पूर्वमहावाक्यविषयवत् महावाक्यस्यास्यापि दलप्रयोजनं सम्यक् कृतं वर्तते। इदं महावाक्यं गुरुशिष्यसंवादान्तर्गतं वर्तते इति वैशिष्ट्यम् आवहति। शिष्यस्य अज्ञाननिवारणं कृत्वा तं प्रबुद्धं कर्तुं महावाक्ये अस्मिन् सम्यक् परिश्रमो वर्तते इति अस्य प्राधान्यम्। अत्र तत्त्वोपदेश नाम्ना आचार्येण श्रीशङ्करेण सप्ताशीत्यात्मकः श्लोकग्रन्थः लिखितो वर्तते। लक्षणायाः लक्षणसमीक्षापि महावाक्यस्यास्य विषयविन्यासवेलायाम् आवश्यकी आसीत्।

तत्त्वमसीति पदत्रयात्मके महावाक्ये तत्पदस्य वाच्यार्थः ईश्वरः, त्वं पदस्य वाच्यार्थः जीवः, 'असि' इति क्रियापदं 'तत्' 'त्वम्' इत्यनयोः संयोजकम्। अत एव महावाक्यस्यास्य जीवेश्वरैक्यप्रतिपादकत्वमुक्तम्। इयं रीतिः न युक्ता इति प्रतिभाति। जीवः दुःखमग्नः ईश्वरः प्रज्ञानस्वरूपः सर्वज्ञश्च। जीवेश्वरौ यथाक्रमं परिमितापरिमितौ। अतः जीवेश्वरयोः एकत्वसङ्कल्पे बाधा। अतः अत्र लक्ष्यार्थमादायैव अर्थकथनं कृतम्। एते आशयाः आचार्यमतानुसारेण विस्तृततया कथिताः।

‘तत्त्वमसि’ महावाक्यविषयेऽपि अन्योपनिषदन्तर्गतानां सदृशवाक्यानां समाहरणं कृतं वर्तते। पट्टिकानुसारेण तेषां सङ्कलनमपि अत्र कृतम्। महावाक्यचतुष्टये, अन्तिमं महावाक्यं भवति “अहं ब्रह्मास्मि” इति। अत्रत्यं श्रीशङ्करभाष्यम् अत्यन्तं विस्तृतं भवति। अतः विषयवैविध्यमवलम्ब्य सङ्ख्यापूर्वकं क्रममनुसृत्य इह स्ववाक्येन व्याख्यातं वर्तते। पक्षप्रतिपक्षरूपेण पूर्वपक्षः, समाधानम् इति रीत्या अत्र भाष्यस्य समन्वयः कृतः। इतरमहावाक्यापेक्षया महावाक्यस्यास्य प्राधान्यमपि द्वितीयाध्याये विवृतं वर्तते। महावाक्यस्यास्य आशयगाम्भीर्यमादायैव श्रीशङ्करेण विस्तृततया इह विचारः कृतः। आवर्तनभिया न तस्य सङ्कलनमिह क्रियते।

मध्वोऽपि अन्यमहावाक्यविवरणापेक्षया इह किञ्चिदधिकम् उक्तवान् वर्तते। राघवेन्द्रतीर्थस्य माध्वमतानुयायिनः पण्डितस्य “खण्डार्थ” नाम व्याख्याम् अनुसृत्य माध्वमतसमर्थनाय इह परिश्रमः कृतो वर्तते। श्रीरघूत्तमतीर्थः माध्वप्रस्थानस्थः अन्यः पण्डितः। अतः तस्यापि टिप्पणी, माध्वमतानुसारेण ‘अहं ब्रह्मास्मीति’ महावाक्यस्य विवरणाय उपयुक्ता वर्तते।

श्रीमता रामानुजाचार्येण बृहदारण्यकोपनिषदः भाष्यं न कृतमित्यतः तस्य शिष्याणां विवरणमाश्रित्यैव “अहं ब्रह्मास्मि” इति महावाक्यस्य व्याख्या कृता वर्तते। ‘वेदार्थसङ्ग्रहो’ नाम ग्रन्थतल्लजः श्रीमता रामानुजाचार्येण लिखितो वर्तते। ग्रन्थविशेषस्यास्यापि उपयोगः रामानुजपक्षस्थापनाय कृतः।

इहापि पूर्ववत् अन्योपनिषदन्तर्गतानि ‘अहं ब्रह्मास्मि’ इति महावाक्यसदृशानि कानिचन वाक्यानि समाहृत्य पट्टिकाद्वारा अवतार्यन्ते। अष्टात्रिंशत् सदृशवाक्यानि पट्टिकारूपेण प्रदर्श्यन्ते। एवम् उपनिषदां भाष्यम् आश्रित्य शङ्करमध्ववेदान्तपक्षौ इह प्रतिपादितौ समर्थितौ च। श्रीरामानुजाचार्यः उपनिषदां भाष्यं न पृथक् कृतवान्। अतः रामानुजाचार्यस्य विषये शिष्याणाम् अनुयायिनां च मतमादाय तत्कृतवेदार्थविचारञ्च स्वीकृत्य महावाक्यानां विचारः तत्तन्मतविचारानुसारेण समर्थितो वर्तते ।

सहायकग्रन्थसूची

संस्कृतग्रन्थाः

अपरोक्षानुभूतिः	-	श्रीशङ्कराचार्यः (विमर्शनात्मकमध्ययनम्) डा. सी. ए. षैला. सुकृतीन्द्र ओरियन्टल् रिसर्च् इन्स्टिटय़ूट्, तम्मनम्, 2007
उपनिषद्भाष्यम् शङ्करग्रन्थावलिः (प्रथमो भागः)	-	श्रीकृष्ण सेमवालः, दिल्ली संस्कृत अकादमी, 2007
उपनिषद्भाष्यम्	-	श्रीमदानन्दतीर्थभगवत्पादाचार्यः, पं. शङ्करनारायण अडिगः, पं रङ्घनाथ कट्टिटः, पूर्णप्रज्ञसंशोधनमन्दिरम्, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - 2005
उपनिषद्भाष्यम्	-	श्रीरङ्गरामानुजमुनिप्रभृतिविरचितम्, श्री उत्तमुर वीरराधवाचारियार - सेन्टिनरि ट्रस्ट्, चेनै - 2003
उपनिषद्वाक्यमहाकोषः	-	श्रीगजानन शम्भु साधले, चौखम्बा विद्याभवन्, वाराणसी 1990
ऋग्वेदसंहिता	-	स्वामी जगदीश्वरानन्द सरस्वती, संस्कार प्रकाशन्, दिल्ली 2000
ऐतरेयोपनिषत् (विमर्शात्मकं सम्पादनम्)	-	एम्. ए. एस्. राजन्, संस्कृतसंशोधन संसत्, यादवाद्रिः 1997
गौतमीयन्यायदर्शनम् (सवात्स्यायनभाष्यम्)	-	श्रीमान् अनन्तलालठक्कुरः, भारतीयदार्शनिकानुसंधानपरिषत्प्रकाशितम्, 1997

छान्दोग्योपनिषत् (आनन्दगिरिकृतटिका) - डॉ. उमेशानन्द शास्त्री, श्री कैलास आश्रम शताब्दी समारोह महासमिति, ऋषीकेश, 2000

छान्दोग्योपनिषत् - सम्पादकौ-विद्वान् शङ्करनारायण अडिगः, विद्वान् रङ्गनाथ कट्टिः, पूर्णप्रज्ञसंशोधनमन्दिरम्, पूर्णप्रज्ञविद्या-पीठम्, बेङ्गलूरु-2004

छान्दोग्योपनिषद्भाष्यम् - (आनन्दतीर्थभागवत्पादः) सम्पादकौ-विद्वान् रङ्गनाथ कट्टिः, पूर्णप्रज्ञसंशोधन मन्दिरम्, पूर्णप्रज्ञविद्यापीठम्,बेङ्गलूरु 2004

तर्कसंग्रहः - अन्नंभट्टः, आचार्यः, एम्.एल्.नरसिंहमूर्ति। राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति- 2003

तर्कभाषा - श्रीकेशवमिश्रः, सम्पादकः- पण्डित श्रीरुद्रधर हरिदास संस्कृत ग्रन्थमाला, वाराणसि, 1952

तर्कसंग्रहः - अन्नंभट्टः पदकृत्यटीकासहितः, चौखम्बासुरभारती प्राकाशनं, वाराणसि- 1996

नैष्कर्म्यसिद्धिः - सुरेश्वराचार्यः, सम्पादकः- जी.ए.जैकब, सञ्जय प्रकाशन्, दिल्ली २००६

नैषधीयचरितम् (जीवातु 'चन्द्रिका' संस्कृत हिन्दीव्याख्योपेतम्) - श्रीहर्षः, कृष्णदास अकादमी, वाराणसी, 2002

न्यायविशिष्टाद्वैतमतयोः ईश्वरतत्त्वविचारः - डा. दिलीपकुमार मिश्रः, राष्ट्रिय संस्कृतविद्यापीठम् तिरुपतिः, 2007

पूर्णप्रज्ञदर्शनम् - डा. डि. एन् शान्भाग, द्वैतवेदान्तप्रतिष्ठानम्, बङ्गलूर, 1992

प्रबन्धरत्नाकरः - डा. रमेशचन्द्रशुक्लः, चौखम्बा विद्याभवन, वाराणसी, 1989

बृहदारण्यकोपनिषद् - डा. ए.वि. नागसम्पिगे, पूर्णप्रज्ञसंशोधन-मन्दिरम्, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु, 2005

बृहदारण्यकोपनिषद्भाष्यम् - (श्रीमध्वाचार्यः) डा.विद्वान् रघुत्तमाचार्य नागसम्पिगे, विद्वान् रघूत्तमाचार्य नागसम्पिगे, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु 2006

बृहदारण्यकोपनिषत् (रङ्गरामानुजभाष्योपेता) (आङ्गलानुवादसंहिता) प्रथमो भागः - विद्वान् ए. श्रीनिवासराधवः, संस्कृत संशोधन संसत्, यादवाद्रिः 1995

भारतीयतत्त्वचिन्तासारः - डा. एस्. एस्. विवेकानन्दः मैत्री बुक्स्, तिरुवनन्तपुरम्, 2009

भेदनिरासः - अन्नम्भट्टः, विद्वान् डॉ. एच्, पि. मल्लेदेवरु, प्राच्यविद्यासंशोधनालयः, मैसूरु, 1989

भेदसाम्राज्यम् - श्रीरङ्गरामानुजमहादेशिकः, (श्री कोकिलायम् स्वामिनः) श्री उत्तमुर, वीरराधवाचारियार सेन्टिनरि, ट्रस्ट्, चैन्नै -2002

भेदोज्जीवनम् - (श्रीव्यासतीर्थः), सम्पादकौ- डा. एच्. सत्यनारायणाचार्य, विद्वान् तिरमलकुलकर्णी, पूर्णप्रज्ञसंशोधनमन्दिरम्, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु 2007

माण्डूक्योपनिषत् (विमर्शात्मकं सम्पादनम्)	-	प्रा. भाष्यम् स्वामी, संस्कृतसंशोधन-संसत् यादवाद्रिः (मेलुकोटे) 2005
माण्डूकोपनिषद्भाष्यम्	-	विद्वान् उपाध्याय कृष्णाचार्यः, श्रीमाध्वसिद्धान्तप्रतिष्ठानम्, उत्तरादि मठः, मध्वसिद्धान्तप्रतिष्ठानम्, श्रीजयतीर्थविद्यापीठम्, बेङ्गलूरु 1998 (प्रथमसंस्करणम्)
मध्वसिद्धान्तसारः (आङ्गलानुवादसहितः)	-	श्रीपद्मनाभसूरिः, संपादकः, डा.डि.एन्. षान्भाग् द्वैतवेदान्त स्टडीस् & रिसर्च फौण्डेशन्, बेङ्गलूर, 1994
महाभारततात्पर्यनिर्णयः	-	आनन्दतीर्थः, सम्पादकः- डा. व्यासनकेरे प्रभञ्जनाचार्यः, श्री व्यासमाध्वसेवाप्रविष्ठानम्, बेङ्गलूरु 1998
यतीन्द्रमतदीपिका	-	श्रीनिवासदासः, श्रीरामकृष्णमठः, मैलापुरम्, मद्रास् 1978
वेदार्थसंग्रहः (विमर्शात्मकं सम्पादनम्)	-	एम्. ए.एस्.राजन् संस्कृतसंशोधन-संसत् यादवाद्रिः (मेलुकोटे) प्रथम-संस्करणम् १९९१
विशिष्टाद्वैतवादसम्मतः जीवविमर्शः	-	डॉ. केदारप्रसादपरोहा, अमर् ग्रन्थ् पब्लिकेशन्स्, दिल्ली 2006
व्याकरणमहाभाष्यम्	-	प्रोफसर्. भीमसिंह वेदालङ्कार, विद्यानिधि शोधसंस्थान, कुरुश्रेत्रम्, 2006

वेदार्थसङ्ग्रहः	-	रामानुजयतीन्द्रः सम्पादकः पण्डित श्रीरामवदनशुक्लः, सम्पूर्णानन्द संस्कृतविश्व-विद्यालयः, वाराणसी, 1991
श्रीमहैतरेयोपनिषद्भाष्यम्	-	विद्वान् पि.वि. उपाध्यायः, पूर्णप्रज्ञसंशोधनमन्दिरम्, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु 2010
श्रीशङ्करवाङ्मयसर्वस्वम् Volume -IV	-	श्रीशङ्कराचार्य संस्कृत सर्वकलाशाला, कालटि 2012
सर्वदर्शनसंग्रहः (आङ्गलानुवादसंहिता)	-	सायणमाधवः, भारतीयकला प्रकाशन्, दिल्ली 2008
संक्षिप्तशांकरी	-	हेमराद शास्त्री, कल्चरल् फौण्डेशन, कोलालम्पुर इन्दु प्रकाशन्, दिल्ली 1998
सर्वदर्शनसमन्वयः	-	डा.के.बि. सुब्बरायुडु सदानन्द पब्लिकेशन्स्, पूङ्कुन्नम्, केरलम्, 2003
सर्वदर्शनसङ्ग्रहः	-	माधवाचार्यः, डा. माधव जनार्दन रटाटे (व्यख्याकारः) भारतीय विद्या प्रकाशनम्, वाराणसी, 2011
सर्वमूलग्रन्थाः	-	श्रीमध्वाचार्यः, श्रीव्यासमध्वसेवा-प्रतिष्ठानम्, बङ्गलूर् 1999
सिद्धित्रयम् (सिद्धाञ्जनव्याख्या सहितम्)	-	यामुनाचार्यः लक्ष्मीबाई नारायण चौधुरी निर्णयसागर प्रेस, मुम्बै 1954
संस्कृतसाहित्येतिहासः	-	आचार्य रामचन्द्रमिश्रः चौखम्बा विद्याभवन, वाराणसी, 1993

आङ्गलग्रन्थाः

An interpretation of the Life and Teachings of Sri Shankaracharya	-	Swami Mukhyānanda, Sri Ramakrishna Advaita Ashrama, Kalady, Ekm, Kerala (1998)
Dvaita Vedanta	-	T.P. Ramachandran, Gulab Vazirani for Arnold Heinemann, Publishers, New Delhi (1976)
History of the Dvaita School of Vedanta and its Literature	-	B. N.K. Sharma, Motilal Banarsidass, Delhi (1981)
Life and Teachings of Adi Śankarācārya	-	P. George Victor, D.K. Print world (P) Ltd. New Delhi (2002)
Madhva's Aupaniṣadam Darśanam	-	Dr B.N.K. Sharma, Dvaitavedanta Studies and Research foundation, Bangalore,
Mahātātparya of Mahāvākyas and other Advaita Srutis Part II of Advaitasiddhi versus Nyāyāmṛta an up- to date Re-appraisal	-	Dr. B.N.K. Sharma, Anandatīrtha pratiṣṭhāna of Akhila Bhārata Mādhva Mahāmaṇḍal, Bangalore (1999)
Madhva's Teachings in his own words	-	B.N.K. Sharma, Bharatiya Vidya Bhavan, Bombay (1979)
Navaratnam of Harirāma Vyāsa (A study in Mādhva Gauḍiya Vaiṣnavism)	-	Anant Sharan Tiwari, Pratibha Prakashan, Delhi (2003)
Philosophy of Realism (A study based on chandogya upanishad)	-	Dr.K.B. Archak, Sundeep Prakashan, Delhi 2003

The Bhagavad Gītā	-	Swami Chidbhavananda, Tapovanam Publishing House, Tiruchirapalli (1967)
The Principal Upaniṣads Vol II (with English translation and note according to Sri. Madhvācāryas bhāṣya)	-	Prof. K.T. Pandurangi Dvaita Vedanta Studies and Research foundation, Bangalore (1999)
The Principal Upaniṣads	-	Prof. K.T. Pandurangi Dvaita Vedanta Studies and Research Foundation, Bangalore (1999)
The Philosophy of Advaita	-	T.M.P. Mahadevan, Bharatiya Kala Prakashan, Delhi (2006)
The Philosophy of Viśiṣṭādviata vedānta (A study based on Vedānta Deśikas Adhikaraṇa Sārāvalī)	-	S.M. Srinivasachari, Motilal Banarsi dass Publishers Private Limited, Delhi (2008)
112 UPANIṢADS I Part	-	Board of scholars - K.L. Joshi, O.N. BIMALI, BINDIYA TRIVEDI, PARIMAL Publishers, Delhi (2004)
112 UPANISADS II Part	-	Board of scholars - K.L. JOSHI, O.N. BIMALI, BINDIYA TRIVEDI, PARIMAL Publishers, Delhi (2004)

हिन्दीग्रन्थाः

अद्वैतमार्त्तण्ड और शाङ्करवेदान्त	-	डा. शारदा गुप्ता, ईस्टर्न बुक लिंकर्स, दिल्ली, २००७
अद्वैतवाद का संक्षिप्त इतिहास	-	डॉ. गोपीनाथ कविराज, भारतीय विद्या प्रकाशन, वारणसी २०११
उपनिषद्भाष्य (सानुवाद) खण्ड - २	-	गीताप्रेस, गोरखपुर, २००९
उपनिषदों के निर्वचन	-	डॉ. वेदवती वैदिक, नाग पब्लिशर्स्, दिल्ली (२००३)
पातञ्जल योगदर्शन (व्यासभाष्य एवं भोजवृत्ति सहित)	-	पतञ्जलि, सतीश आर्य, वेद विश्वायतन, पश्चिम पुरी, नई दिल्ली (२०२०)
बृहदारण्यकोपनिषद् (सानुवाद शाङ्कभाष्यसहित)	-	गोविन्द भवन, कार्यालय गीताप्रेस, गोरखपुर, १९९५
भारतीय दर्शनिक परम्परा में परम सत्	-	डा. शान्ति पाण्डेय, मनीष प्रकाशन, वाराणसी, (२०१३)
मीमांसालोक	-	डा. गायत्री शुक्ला, हरिलीला पब्लिकेशन्स, २८६, स्टेनली रोड्, कमला नगर, इलहाबाद, २००७

विशिष्टाद्वैतवादसम्मत ईश्वरस्वरूप विचार - डॉ. केदारप्रसादपरोहा, अमर ग्रन्थ पब्लिकेशन्स, विजय नगर, दिल्ली २००७

विशिष्टाद्वैत की आचार-मीमांसा - डॉ. सुमन लता, परिमल पब्लिकेशन्स, दिल्ली - २०००

वेदान्त दर्शन का इतिहास - आचार्य उदयवीर शास्त्री, विजयकुमार गोविन्ददास् हासानन्द, दिल्ली, १९९७

वेदान्तदर्शन एवं आधुनिक चिन्तन - डॉ. शङ्करदत्त ओझा, शिवाराधन प्रकाशन, लखनऊ २००६

वेदान्त-छन्दामृत - भवेश नाथ पाठक, ईस्टेण बुक् लिङ्केरस्, दिल्ली २००४

शंकर का अद्वैत दर्शन - डॉ. अञ्जना, परिमल पब्लिकेशन्स, दिल्ली (२००६)

श्रीमध्वाचार्य के उपदेश - कृष्ण अ.हारनहल्लि, पूर्णप्रज्ञसंशोधनमन्दिरम्, पूर्णप्रज्ञविद्यापीठ बेङगलूर, २००७

शंकराद्वैत के प्रमुख सिद्धान्तों का पारम्परिक विश्लेषण - डा. तारादत्त, नाग पब्लिशर्स, दिल्ली, २००२

कैरलीग्रन्थाः

अद्वैतवेदान्तसारम् - वि. जि. नम्पूतिरि, कुरुक्षेत्र प्रकाशन्, एरणाकुलम्, केरलम् - २०००

उपनिषत्सर्वस्वम् - डि. श्रीमान् नम्पूतिरि, सम्राट् पब्लिषर्स, तृश्शिवपेरूर - २००२

नालु महावाक्यङल् - डा. टि. एन्. एन्. भट्टतिरिप्पाट्, श्रीरामकृष्णमठम्, पुरन्नाट्टुकर, त्रिश्शूर् - २०१३

पञ्चदशीप्रकाशिका - जि. बालकृष्णन् नायर्, एम्. सरस्वति अम्म, शिवारविन्दम्, तिरुवनन्तपुरम् - १९६६

बृहदारण्यकोपनिषद् - व्याख्याता - मृडानन्दस्वामी, श्रीरामकृष्णमठम्, पुरन्नाट्टुकर, त्रिश्शूर् - १९८६

भारतीयदर्शनङ्ङल् - सि. वि. वासुदेवभट्टतिरि, साहित्यप्रवर्तकसहकरणसंघम्, नाषनल् बुक् स्टाल, कोट्टयं, केरलम् - १९९०

भारतीयदर्शनङ्ङल् - प्रोफ. आर. वासुदेवन् पोट्टि, सुकृतीन्द्र ओरियन्टल् रिसर्च इन्स्टिट्यूट, तम्मनम् - २०१०

विवेकचूडामणि - श्रीशङ्कराचार्यः, विवर्तकः - सिद्धिनाथानन्द स्वामी, श्रीरामकृष्णमठम्, पुरन्नाट्टुकर, त्रिश्शूर् - १९७२

वेदान्तदर्शनम् - व्यासमहर्षिः, विवर्तकः - वि. बालकृष्णः, आर. लीलादेवी, विद्यार्थिमित्रं बुक् डिप्पो, कोट्टयम् - १९८०

श्रीमध्वाचार्यर जीवितवुम् दर्शनवुम् - प्रोफ. आर. वासुदेवन् पोट्टि, सुकृतीन्द्र ओरियन्टल् रिसर्च इन्स्टिट्यूट, तम्मनम् - २००६